कारणागमः

पूर्वकारणागमे प्रतिष्ठातन्त्रे तन्त्रावतारपटल प्रारम्भः

कल्याणं कुरतां कश्चित् करुणावरुणालयः
मयूरनगराथीशोममनृत्तविनायकः १
भूधरस्योर्ध्वशृंगेषु रत्नशृङ्गनिकेतने
तत्रासीन महादेवं श्रीकण्ठं सुरवन्दितम् २
योगपीठस्थितं तस्य वामे गौरीसमायुतम्
सर्वदेवावृतं सिद्धं मुनिगन्धर्वसेवितम् ३
आद्यंत कारणं पूज्यमपृच्छच्छर्वरुद्रकम्
प्रणम्य चरणौ तस्य प्रजापतिरथाब्रवीत् ४
ब्रह्म उवाच
देवदेवमहेशानस्थित्युत्पत्तिलयेशक
जगतामपि प्रीत्यर्थं योगिनां मुक्तिहेतुकम् ५
शिवज्ञानं परं गुह्यं वद मे शर्वरुद्रक ६
शर्वरुद्रोवाच
त्वया पृष्टमिदं सर्वं वक्ष्येहं सुखसाधनम्
कारणाख्यं महातन्त्रं प्रतिष्ठातन्त्रमुत्तमम् ७
कोटयेकग्रन्धसंयुक्तं कर्षणाद्यर्चनान्तकम्
संक्षेपेणाधुना विप्र श्रुणु वक्ष्ये समासतः ८
तस्यादौ तन्त्रसद्भावं मूलभेदोपभेदयुक्
कामिकं योगजं चिन्त्यं कारणं त्वजितन्तथा ९
दीप्तं सूक्ष्मं सहस्रञ्च अंशुमान्सुप्रभेदकम्
विजयञ्चैव निश्वासं स्वयंभुवन्तथानिलम् १०
वीरञ्च रौरवञ्चैव मकुटं विमलन्तथा
चंद्रज्ञानञ्च बिंबञ्च प्रोद्गीतं लळितं तथा ११
सिद्धं सन्तानसर्वोक्तं पारमेश्वरमेव च

किरणं वातुळञ्चैव अष्टाविंशति संख्यया १२
विपुलार्त्थन्तमोघ्नीति तत्वमन्त्रार्त्थदर्शनम्
तन्त्रदेहसमाख्यातं तन्त्रसंज्ञा च संहिता १३
तेषु पूर्वे दशप्रोक्ताश्शिवभेदेति संज्ञिकम्
तथापराष्टदशकं रुद्रभेदमिति स्मृतम् १४
महेशात् शिवभेदानां श्रोतारस्तु त्रयस्त्रयः
रुद्रभेदो महेशाच्च श्रोतारौ द्विद्विकौ मतौ १५
महेशात् प्रणवः प्राप्तः प्रणवात्त्रिकलस्थितः
त्रिकलाच्च हरः प्राप्तः श्रोतारः कामिकस्य तु १६
सादाख्यात् भस्मसंप्राप्तं ततः प्राप्तो विभुस्तथा
योगतन्त्रस्य विख्यातात्सुदीप्तादुपतिः स्मृतः १७
गोपतेरंबिकाख्याता चिन्त्याख्यस्य प्रकीर्तिता
कारणात्सर्वरुद्रस्तु सर्वरुद्रात्प्रजापतिः १८
कारणस्य तु विख्यातस्सूक्ष्माद्वैश्रवणस्तथा
प्रभंजनोधनेशाच्च सूक्ष्मतन्त्रस्य कीर्तितः १९
कालात् भीमस्ततः प्राप्तो विमलं वीरभद्रकः
चंद्रज्ञानमनन्तञ्च संप्राप्तस्तु बृहस्पतिः २०
मुखबिंबं प्रशान्ताच्च संप्राप्तो दधिचिस्मृतः
प्रोद्गीतं शूलिनाप्राप्तः त्वचाख्यो मुनिसत्तमः २१
शूलया लळितं प्रोक्तं रुद्रभैरव एव च
बिन्दोश्चण्डेश्वरः प्राप्तस्सादाख्यं तंत्रकस्य तु २२
सन्तानं शिवनिष्टाच्च संप्राप्तश्शिवसाधने
सर्वोक्तं सोमदेवाच्च नृसिह्मं प्राप्तवांस्तथा २३
श्री देव्याश्चोशनप्राप्तः पारमेश्वरमेव च
देवपित्रात्तु सिद्धाच्च संवर्तः प्राप्तवांस्ततः २४
शिवात् प्राप्तो महाकाळो वातुळन्तंत्रमुत्तमम्

रुद्रभेदास्सुधी प्रोक्ता ग्रन्धसंख्याश्श्रुणुष्वथ २५
परार्द्धसंख्ययाग्रन्धं प्रथमं परिकीर्तितम्
द्वितीयं लक्षसंख्यञ्च तृतीय्यन्तु सहस्त्रकम् २६
चतुर्त्थं कोटिसंख्यञ्च पञ्चमं त्वयुतं स्मृतम्
षष्ठस्य नियुतं प्रोक्तं सप्तमं पद्मसंख्यया २७
अष्टमं शंखसंख्यञ्च नवमं पञ्चलक्षकम्
दशमन्तु त्रिकोटी च एकादशन्तथैव च २८
द्वादशं कोटिसंख्यञ्च सार्द्धकोटि त्रयोदश
अयुतं चतुर्दशं प्रोक्तं नियुतं पञ्चदशं स्मृतम् २९
षोडशञ्चार्बुदञ्चाष्ट शतसाहस्त्रमाकुटम्
त्रिलक्षं विमलं प्रोक्तं चंद्रज्ञानं त्रिकोटिकम् ३०
मुखबिंबं सहस्त्रञ्च प्रोद्गीतन्तु त्रिलक्षकम्
लळितञ्चाष्टसाहस्त्रं सिद्धञ्च सार्द्धकोटिकम् ३१
सन्तानं षट्सहस्त्रञ्च शिवोक्तन्तु द्विलक्षकम्
पारमेश्वरतन्त्रस्य लक्षद्वादशमुच्यते ३२
किरणं पञ्चकोटिस्स्यात् शतसहस्त्रन्तु वातुळम्
तन्त्राणां कामिकादीनां ग्रन्धसंख्याः प्रकीर्तिताः ३३
नारसिह्मञ्च वक्त्रारं भैरवोत्तरमेव च
कामिकस्य त्रयोभेदा सुदासन्तादिकारकौ ३४
वीणाशिखोत्तरञ्चैव आत्मयोगं तथैव च
योगजस्य तु भेदानि पञ्चधा कीर्तितानि वै ३५
पापनाशं परोद्भूतं सुचिन्त्यममृतान्वितम्
सुभगं वामसंज्ञञ्च चिन्त्यभेदस्तु षड्विधः ३६
माहेन्द्रं कारणं दौर्गं पावनं भीमसंहिता
विद्वेषं मारणं चैव सप्तधा कारणस्य तु ३७
पार्वती च परोभूतं प्रभूतं पद्मसंहिता

अजितस्य चतुर्भेदा अमेयाख्यमतः परम् ३८
असंख्यमब्दमाच्छाद्य मानन्दममितौजसम्
अद्भुतं माधवोद्भूतमक्षयं दीप्तिकेऽपि वै ३९
सूक्ष्मस्य सूक्ष्ममेकन्तु अतीतम्मण्डलं तथा
जातिभागो प्रमेयञ्च प्रभूद्भविबुधन्तथा ४०
हस्तं शुद्धमलंकारं सुबोधं सहस्रके दश
काश्यपं वासवं नीललोहितं भूततन्त्रकम् ४१
विद्यापुराणमैंद्रञ्च आत्मालंकारमेव च
वासिष्ठं गौतमं ब्राह्मं ईशानोत्तरमेव च ४२
प्रकारणं तथांशुमान् प्रोक्तं द्वादशभेदकम्
अभेदं सुप्रभेदस्तु भवं सौम्यमथोद्भवम् ४३
मृत्युनाशमघोरञ्च महाघोरन्ततः परम्
परमेश्वरञ्च विजयं विजयस्याष्टभेदकाः ४४
निश्वासोत्तरतन्त्रञ्च यमं निश्वासकैव च
निश्वासाख्यं महातन्त्रं निश्वासोर्ध्वमुखोदयम् ४५
निश्वासनयनञ्चैव मन्त्रं निश्वासमेव च
निश्वासकारीका चैव निश्वासाघोरमेव च ४६
निश्वासञ्चाष्टधा प्रोक्तं प्रजापतिमतं तथा
पद्मञ्च द्विविधंविद्यात् स्वायंभुवविशेषतः ४७
आग्नेयं व्योमतन्त्रन्तु आग्नेयस्य द्विधामतम्
प्रस्तारं फुल्लनयनं प्रबोधं बोधबोधकौ ४८
हकटं मोहसमयं प्रमोहं शकटादिकम्
विलेखनं हलं भद्रं वीरं वीरत्रयोदश ४९
कालाख्यं कालदहनं रौरवं रौरवोत्तरम्
महाकाळ मतञ्चैंद्रं रौरवे षड्विधं स्मृतम् ५०
मकुटोत्तरञ्च मकुटं मकुटस्य द्विधास्मृतम्

वृषगुह्यमथाक्रान्तं वृषभं वृषभोत्तमम् ५१
सुदन्तमथभूतञ्च रौद्रं भोगं तथैव च
आरेवतं सुभद्रञ्च अतिक्रान्तमलंकृतम् ५२
अर्चितञ्चाट्टहासञ्च अनन्तं तारणं तथा
भेदो विमलतन्त्रस्य षोडशैव प्रकीर्तिताः ५३
एकपादपुराणञ्च स्थाणवाख्यं नन्दिकेश्वरम्
स्थिराख्यं शंकरं प्रोक्तं श्रीमुखं शिवभद्रकम् ५४
कल्पभेदमिति प्रोक्तं शिवशासनमेव च
देवीमताख्य तन्त्रञ्च शिवशेखरमेव च
वारुणञ्चैव वायव्यं चंद्रज्ञानञ्चतुर्दश
चतुर्वक्त्रञ्च संस्तोभं प्रतिबिंबमयोगजं ५६
आत्मालंकारवायव्यं तु डिनीरन्तुतौटिकम्
कुट्टिमाख्यं तुलायोगं कुलाप्रत्ययमेव च ५७
पट्टशेखरमेवञ्च महाविद्या महासुरम्
निश्चित्य तिथिविख्यातं मुखबिंबस्य भेदकाः ५८
दंडाधारं पाशबन्धं पिंगळं मतमेव च
वराहांकुश कवचं शिवज्ञानं धनुर्द्धरम् ५७
कालज्ञानञ्च विज्ञानमायुर्वेदञ्च गीतकम्
भरतञ्च धनुर्वेदमातोद्यं सर्वदंष्ट्रकम् ५८
प्रोद्गीताख्यस्य तन्त्रस्य भेदाष्षोडश एव च
लळितोत्तरञ्च कौमारं लळिताख्यमतः परम् ५९
लळितस्य त्रयोभेदाश्शालाख्यं शशिखंडकम्
सारोत्तरञ्च त्वीशानं सिद्धतन्त्रं चतुर्विधम् ६०
अमरेशं सुराद्धयद्धं लिंगाद्धयद्धमसंख्यकम्
अनिलं शंकरद्वन्द्वे सन्ताने सप्तभेदकाः ६१
ईशानं शिवधर्मञ्च शिवधर्मोत्तरं तथा

दिव्यं प्रोक्तं कुबेराख्यं सर्वोक्तस्येहपञ्चधा ६२
हंसं पद्मञ्च मातंगं सामान्यं यद्मणी तथा
पुष्करं सुप्रयोगं च सप्तधापरमेश्वरे ६३
गारुडं नैर्ऋतं नीलं रूद्मं भानुकमेव च
प्रबुद्धन्धेनुकं बुद्धं कालाख्यं किरणेन च ६४
वातुळोत्तरतन्त्रञ्च कालज्ञानं पुरोहितम्
श्रेष्ठं धर्मात्मकं सर्वं शुद्धं नित्यं महाननम् ६५
विश्वं विश्वात्मकं तन्त्रं वातुळं द्वादशस्मृताः
मूलभेदोपभेदाश्च समासात्परिकीर्तिताः ६६
सदाशिवमुखाब्जेषु महेशेन पुराश्रितः
कामिकाद्यजितान्तञ्च सद्योजातमुखोद्भवम् ६७
दीप्तादिसुप्रभेदान्तं वामदेवमुखोद्भवम्
विजयारभ्यवीरान्तं पञ्चैते घोरवक्त्रजाः ६८
रौरवामुखबिंबान्तं पुरुषाख्यनरोद्भवम्
प्रोद्गीताद्यष्टतन्त्रञ्च ईशाननसमुद्भवम् ६९
येन वक्त्रोक्ततन्त्रेण दीद्मायां कुरुते तथा
तन्त्रेणैव शिवस्येव कर्षणाद्यर्च्चनान्तकम् ७०
कुर्यात्सर्वसमुद्दिष्टमनुक्तञ्चेत्तथान्यके
तन्त्रे संग्राह्य तन्त्रांश्च क्रियां कुर्याच्छिवस्य च ७१
प्रागुक्तानिव तन्त्राणि सिद्धान्तानि विदुर्बुधाः
शैवतंत्रा इमे प्रोक्ताश्शैवं पाशुपतन्तथा ७२
सोमसिद्धान्तकञ्चैव वातुळन्तु चतुर्विधम्
एतेषां सांकरन्दोषं संकरे कर्तृनाशनम् ७३
तस्मिन् प्रोक्तेन कर्तव्यं संकरञ्चतुदोषकम्
येनसिद्धाख्य तंत्रेण दीद्मितश्चादिशैवकः ७४
आदिशैवस्त्रिशैवेषु तथापाशुपतादिषु

स्थापनं यजनं कुर्यात्सिद्धान्तोक्तविधानतः ७५
तत्सौम्य छलतंत्राच्च संकरन्नेति कीर्तितम्
स्थापितं शुद्धशैवेन नहि पाशुपदादिषु ७६
ते रौद्रफलकन्दत्वा न कुर्यादर्च्चनादिकम्
इमे रौद्रन्तथान्तश्च शैवसौम्यमिति स्मृतम् ७७
रौद्रसौम्येन धर्माणि सौम्ये रौद्रेण वर्जयेत्

इति कारणे प्रतिष्ठातन्त्रे तन्त्रावतारपटल प्रथमः

अथ द्वितीयो मंत्रावतारपटलः

अस्मिन् तंत्रे समासेन मंत्रोच्चारं श्रुणुष्व तत्
मंत्रं विना क्रिया नास्ति कर्षणाद्यर्चनान्तका १
शिवस्सदाशिवश्चैव महेशो वा तथा क्रयः
वाच्यवाचकराहित्यो वाङ्मनातीतगोचरः २
सर्वज्ञानगुणोपेतस्सर्वतत्वामलप्रभुः
इत्थं भूतश्शिवः प्रोक्तो निष्कळश्चेति कीर्तितः ३
सकळन्निष्कळोपेतस्त्वष्टत्रिंशत्कलात्मकः
सकलोत्कोंऽगसंपूर्णो भुवनाध्वोत्तरो महान् ४
वर्णावेवध्वजोपेतो मंत्रत्वा शुद्र आत्मकः
पदाध्वाद्धस्तिरोमांस शुक्लमज्जास्थितत्वधृत् ५
सदाशिवषडध्वात्मा तस्य प्राणी शिवस्मृतः
हृदयाद्यगसंपूर्णो ध्याने सकळरूपधृक् ६
निष्कळस्तदभावे तु तस्मात् सकळनिष्कळः
सदाशिवगुणोपेतो तस्य वामे मनोन्मनी ७
महेशस्सकळः प्रोक्तो नानारूपधरो हरः
वह्नावाहनचिह्नाद्यैर्लयभोगाधिकारवान् ८
भवानी सहितो देवस्सर्वाकारेषु वामके

तस्मात्क्रियाणां मूर्तीनां मंत्राणां श्रुणुवर्म्मते ९
नादं नादादिकं कूटं कलाण्डं पार्त्थिवान्वितम्
वारुणं वह्निसंयुक्तं मरुत्षष्ठस्वरान्वितम् १०
स्वरान्तबिन्दुनादाढयं नवर्णात्मा शिवं विदुः
नादो हुंकारमित्युक्तं नादाद्यन्तु सकारकम् ११
कूटाक्षरो क्षकारं स्यात्कालार्णन्तु मकारकम्
पृथ्वी बीजं लकारं स्यात् वरौ वरुणवह्नयोः १२
यकारं मारुतं बीजं षष्ठं स्वरसमन्वितम्
मंत्रः प्रोक्तश्शिवस्येह जगत्सृष्टिलयात्मकः १३
नादार्णन्तु समुद्धृत्य अर्चतुर्दशसंयुतम्
बिन्दुनादसमायुक्तं नादाद्यं प्रथमान्वितम् १४
अष्टवर्गादिमञ्चैव तृतीयस्वरसंयुतम्
सप्तवर्गान्तमुद्धृत्य प्रथमस्वरमण्डनम् १५
पञ्चाक्षरमिदं ह्येवं मंत्रं सदाशिवस्य तु
नादं कालसमोपेतं वह्निमारुतसंयुतम् १६
षष्ठस्वरसमायुक्तं बिन्दुनादसमन्वितम्
एते महेशमंत्रन्तु सर्वसिद्धिकरं परम् १७
पुनस्सान्तं समुद्धृत्य वह्निमाया समन्वितम्
बिन्दुनादसमायुक्तं मनोन्मन्यास्तु मञ्चकम् १८
द्वितीयस्य तृतीयन्तु मायानलसमन्वितम्
बिन्दुनादसमायुक्तं गौरी बीजमिदं परम् १९
षोडशस्वरसंघे तु नपुंसकविवर्जितम्
द्वादशस्वरसङ्घेषु नादाख्याणुसमन्वितम् २०
शान्तमीशानमित्युक्तं मन्ये रौद्रा इति स्मृताः
शुक्लपीतारुणश्चैव रक्तं वामञ्च कृष्णकम् २१
वर्णानीव षडंगानि त्रिणेत्राश्च चतुर्भुजाः

शूलं कपालहस्ताश्च अभयं वरदान्वितः २२
हस्तनेत्रौ तु रौद्रौ तु शेषाः सौम्या इति स्मृताः
सदाशिवस्य रूपन्तु वक्ष्येऽहं द्विजसत्तमाः २३
कुन्देन्दुस्फटिकाभासा जटामकुटमंडिताः
पञ्चवक्त्रयुतास्तेषु प्रतिवक्त्रं त्रिलोचनम् २४
सर्वाभरणसंयुक्तं दशदोर्भिस्समन्वितम्
शूलं परशुखड्गञ्च वक्त्राभयौ च दक्षिणे २५
पाशन्नागांकुशञ्चैव घण्टां वह्निञ्च वामके
दिव्यांबरधरन्देवं दिव्यपुष्पैरलंकृतम् २६
दिव्यगन्धानुलिप्ताङ्गं शान्तरूपं स्मिताननम्
मंत्रोच्चारे स्मरेन्मंत्री चतुर्दोर्भिस्समन्वितम् २७
रक्तवर्णो ज्वलां शुक्लवक्त्रेणैव विभूषिताम्
सर्वाभरणसंपूर्णपीनोरुजघनस्तनाम् २८
त्रिणेत्रां गन्धपुष्पाढ्यां केशाळकविभूषिताम्
पद्मोत्पलधरां देवीं वरदाभयपाणिनीम् २९
देवस्य वामभागे तु दिव्यरूपां मनोन्मनीम्
चतुर्भुजो महेशस्तु जटामकुटमंडितः ३०
करण्डमकुटोपेतां नेत्रत्रयसमन्विताम्
इत्थं भूतां वरां गौरीं भावयेत्तु विचक्षणः ३१
पृथिव्यादीनि बीजानि लवरयहकारकः
प्रणवः प्रथमं प्रोक्तं आ ई ऊ तदनन्तरम् ३२
व्योमव्यापिन् चतुर्त्थञ्च तदूर्ध्वं प्रणवं भवेत्
अस्मिन् तंत्रे विशेषेण दशाक्षरमिति स्मृतम् ३३
हुं फट्कारविसर्गान्तं मंत्रं पाशुपदं स्मृतम्
चिच्छचीच्छच्यक्षरं गृह्य ---- कृद्वर्णसंयुता ३४
क्षुरिकाद्यष्टवर्णन्तु सर्वकार्येषु पूजितम्

हृं सृं त्तृं बीजमुख्यास्तु विद्यांगानि ततश्शृणु ३५
प्रशान्तायेति हृदयं प्रणवात्मने नमश्शिवः
शिवाय हृं शिखाज्ञेयं हुंकारस्तु पुरुष्टुतः ३६
फट् कारममृतश्चास्त्रमोजुंसो नेत्रमुच्यते
विद्यांगस्त्विति विद्याता वषट्कारसमन्वितः ३७
अनन्तेशस्तथा सूक्ष्मश्शिवोत्तमश्चैकनेत्रकः
एकरुद्रस्त्रिमूर्तिश्च श्रीखण्डश्च शिखण्डिकः ३८
अष्टविद्येश्वरा ह्येते त्रिणेत्राश्च चतुर्भुजाः
सव्ये अभयवज्रौ तु वामे तु वरदांकुशौ ३९
अंगसव्य सदोभेरी टंकशूलसमन्वितः
रक्तं श्वेतं तथा नीलं पीतं कृष्णञ्च कुंकुमम् ४०
अरुणञ्चांजनं पूर्णं क्रमाद्विद्येशवर्णकम्
गौरी चण्डेशनन्दीशो महाकाळो वृषस्तथा ४१
गणेशश्चैव भृंगीशो महासेनो गणेश्वरः
द्विनेत्राद्विभुजाश्यामा गौरी दक्षकरोत्पला ४२
द्विनेत्रा द्विभुजाश्चण्डाश्शंभोर्वै टंकहस्तकाः
चतुर्भुजं त्रिणेत्रस्तु कृष्णवर्णश्चतुर्भुजः ४३
अभयं वरदोपेतो शूरस्तोमरशूलधृक्
वृषभः श्वेतवर्णस्तु तीक्ष्णग्राहो महाबलः ४४
गजाननः त्रिणेत्रस्तु कुंकुमाभश्चतुर्भुजः
पाशदन्तौ तु सव्ये तु वामे त्वंकुशलड्डुकौ ४५
नागयज्ञापवीतश्च लंबोष्ठस्तु गणाधिपः
चतुर्भुजस्त्रिणेत्रस्तु भृंगीशः पिंगळः प्रभुः ४६
दक्षिणे भयटंकौ तु वामे वरदशूलधृक्
रक्तवर्णो महासेनो द्विनेत्रश्च चतुर्भुजः ४७
पुरन्दरोऽथ वह्निश्च यमो वै राक्षसेश्वरः

वरुणो नीलवर्णश्च ईशानो नन्तपद्मजः ४८
श्यामं रक्तन्तथा कृष्णं नीलञ्चानन्तनीलकम्
शंखधूम्रञ्च शुक्लञ्च स्फटिकाभञ्च वर्णकम् ४९
अतसीपुष्पसंकाशं दिक्पालानां निभानि वै
वज्रादिपद्मपर्यन्तं लोकपालायुधस्मृतः ५०
कुलिशश्शक्तिदण्डौ च खड्गपाशांकुशस्तथा
गदात्रिशूलञ्चक्रञ्च पद्मञ्चेति दशायुधाः ५१
नानावर्णमहाविद्युन्नीलजीमूतनीलगे
पावकं पद्मरागञ्च तुषारञ्चेंद्रनीलकम् ५२
शारदाभ्रञ्च मुक्तञ्च वज्रादीनान्तु वर्णकम्
यक्षराक्षसपैशाचगन्धर्वाणां तथैव च ५३
सिद्धानां किन्नराणाञ्च ऋषीणां भैरवैरपि
अन्येषां देवतानाञ्च स्वनामाद्यक्षरेण तु ५४
बिन्दुनादसमायुक्तं तेषां मन्त्रं प्रयोजयेत्

इति कारणाख्ये प्रतिष्ठातन्त्रे मन्त्रावतारपटलो द्वितीयः

अथ वास्तुविन्यासपटलस्तृतीयः

अतः परं प्रवक्ष्यामि वास्तुविन्यासमुत्तमम्
वास्तुविन्नयासमूलं हि प्रजानामास्पदास्पदम् १
कीर्तिदं जयति द्रव्यमिह पुत्रफलप्रदम्
वास्तूक्तदेवतानान्तु यजनार्त्थं विशेषतः २
अग्रहारस्तथा ग्रामो नगरं राजधानिकम्
पत्तनं कुट्टिमञ्चैवा विकं सेनामुखं त्विति ३
नृपवासप्रधानानां महर्षीबालभूभुजाम्
आरामोपवनानाञ्च नारीणां वणिजामपि ४
नृत्तगेयनियुक्तानां सद्भटानां निवासभूः

चंडालानामथान्येषां राजधानीति कीर्तिता ५
द्वीपान्तरगतद्रव्यक्रयविक्रयहेतुकम्
अभूमिरेवं वणिजा मापादपत्तनं स्मृतः ६
केवलं भद्रजातीनां तेषां कृत्याधिकारिणाम्
निवेशः कुटिकः प्रोक्तो राजवेश्मसमायुतम् ७
राजसेनासमायुक्तं वित्तद्वितिय संज्ञकम्
सर्वजिद्धिस्समायुक्तं मंत्रिभिस्सचिवैर्युतम् ८
सेनामुखमिति ज्ञातं प्रोच्यंतेऽष्टविधास्तुते
ज्येष्ठमद्धयकनिष्ठो यमग्रहारस्त्रिधा स्मृतः ९
तदैकैकन्तु नवधा विंशत् सप्ताधिका स्मृता
वेदवेदांगतत्वज्ञान् श्रोतियान् सात्विकान्वितान् १०
पत्नीसन्तानसहितान् वेदाद्धयनतत्परान्
देवाग्निगुरुभक्तांश्च दारिद्र्ये दोषवर्जितान् ११
उक्तषट्कर्मनिरता ननुष्ठानपरायणान्
विप्रानाहूयसंपूज्य निश्चित्य वसुधाक्रियाः १२
दद्यात्पूर्वन्तु संभारान् ग्रहोपकरणानि च
स्त्रीणामाभरणं धान्यं वस्त्रंगाञ्च पयस्विनीम् १३
दासीदासांश्च विप्रेभ्यो दद्यात् ज्ञानान्वितो नृपः
नास्तिकान् पिशुनान् क्रूरान् वेदाग्निगुरुनिन्दकान् १४
ब्रह्मघ्नांश्च खलानज्ञान् तद्ववेत्तुःस्वहारकान्
स्वधर्माचाररहितान् दानकर्मविवर्जितान् १५
लोभान्वितानप्यशुचीन् प्राङ् नृपद्रोहसंयुतान्
वर्जयेदनिशं विप्रान् नृपस्तान् दानकर्मणि १६
चतुर्दशसहस्राणां विप्राणामग्रहारकम्
उत्तमे नवमे ज्येष्ठं सहस्रार्द्धद्वयं ततः १७
अर्द्धाधिकसहस्रान्तं मद्धयमं नवकं स्मृतम्

सहस्त्रभूसुराणान्तु निवासस्त्वग्रहारकः १८
कन्यसेनवके ज्येष्ठं सहस्त्रं तद्विजान्तकम्
शतसंख्याक्षयेणैव कन्नयसं नवकं स्मृतम् १९
दशोन द्विदशाप्राग्वत् शतं द्विशतमुत्तमम्
दशहीनक्रमेणैव क्षुद्रेषु विष्ट उच्यते २०
शतमारभ्य विष्टान्तं पञ्चपञ्चक्षयेण तु
षष्ठकं मद्धयमं प्रोक्तं नवकन्तु समासतः २१
पञ्चपञ्चदशारभ्य यावत्पञ्चदशं पुनः
दशार्द्धेन क्रमेणैव क्षुद्रेषु च कनीयसम् २२
प्रागुक्तगुणसंपन्नान् ज्ञानाकृष्टान् तपोधिकान्
दशारभ्य द्विपर्यन्तमेषामेकैकहीनकम् २३
वेदार्त्थं भूमिदां यद्वा तद्वदारंभमुच्यते
प्रागुक्तगुणयुक्ताय वेदार्त्थनिपुणाय च २४
कुर्यात्तत् ज्ञाननिधये दानं स्यादुत्तमोत्तमम्
एकभोगमिति ख्यातं प्रशस्तमतिदुर्लभम् २५
अथापि विधमारभ्य तत्राढयावर्द्धयेत्क्रमात्
अयुतैकसहस्त्रन्तु षट् शतञ्च ततः परम् २६
चतुष्षष्टि ततोयावदग्रहारस्समासतः
अष्टोत्तरशतं प्रोक्तं श्राद्धपूर्वविधानतः २७
कुर्यादेकमतं तेषु न्यूने न्यूनफलं स्मृतम्
अधिके तत्फलाधिक्यं तस्माद्धीनं नकारयेत् २८
कालं भूमिं परीक्ष्यादौ कर्षणात्तदनन्तरम्
द्वितीयं यत्र विन्यासं तदन्ते वास्तुपूजनम् २९
पञ्चमं ग्रहनिर्माणं देवानां स्थापनं ततः
सप्तमं गतविन्यासमष्टमञ्च तथैव च ३०
प्रायशः परिघारामे जलमार्गे विधानकम्

नवमं भूमिभागन्तु दशमन्तु प्रकीर्तितम् ३१
क्रमेण तानि सर्वाणि श्रेष्ठा वा वर्ज्यतत्वतः
श्रयनञ्चोत्तरं श्रेष्ठं देवचत्वावरान्विते ३२
मार्गशीर्षकमाघौ द्वौ वर्जयेत्तु प्रयत्नतः
शेषेष्वपि च कर्तव्यं त्वरिते तु प्रजायते ३३
कर्षणोक्तविधानेन क्षेत्राधिक्य फलं क्षयेत्
श्वेताभापितृभूमिस्स्यात् भवस्यारुणसन्निभा ३४
पीताभा वैश्यजातेस्तु कृष्णाशूद्रस्य कीर्तिता
मधूद्रक्तामृत्तिका तु वर्णानामपि च क्रमात् ३५
प्रदक्षणैकपत्ती च शस्ताकन्दाहवर्जिताः
ऊषरीतुमभिज्युष्टा वल्मीकाद्याश्च वर्जिताः ३६
हस्तप्रमाणतश्चैवं खात्वा संपूरयेन्मृदा
श्रधिका तु विफलदा समासमफलप्रदा ३७
न्यूनं मेदिनिविज्ञेया ह्येवं भूमिपरीक्षणम्
ततस्तु कर्षणार्द्धन्तु तत्तज्जात्यार्हकौ वृषौ ३८
शुभौ नासालवृत्तौ च तरुणौ प्रियदर्शनौ
नागहीनौ बलोपेतौ भूरिस्वर्णान्वितौ वृषौ ३९
गुणवन्तौ सहस्त्रेभ्य हेमशृंगखुरान्वितौ
वस्त्रैर्नानाविधैश्शृंगमलंकृत्य विधानतः ४०
श्रार्द्रादूर्वातृणं दत्वा क्षीरवृक्षमथ दृढम्
युगं कृत्वा तथा चैव सफलं फलमेव वा ४१
भंजेत फल्लवो भूतपाशेनैवाथ पत्रयेत्
पुण्याहं तत्र कुर्वीत दद्यात्पुण्याहदक्षिणाम् ४२
वस्त्रहेमांगुलीयाद्यैस्तदा सन्तोषयेत् गुरुम्
प्राङ्मुखः प्रथमं कृत्वा ततस्तत्र उदङ्मुखः ४३
वास्तुविन्यासभूमेस्तु कथयेदखिलं तथा

सूक्ष्मपूर्णघृतायान्तु मुद्गमाषतिलास्तथा ४४
सिद्धार्त्थयवधान्यानि वापयेत् क्रमशो मृदि
देशिकस्य वृषौ दद्यात् हलञ्चापि युगन्तथा ४५
वरभूम्यादिसस्यानि ब्राह्मणानान्तु दापयेत्
बधानव्या शुभेनैव सौहारैरघमर्षणैः ४६
उर्वीचार्द्रकृतायावत् तावत् गास्सन्निवासयेत्
गोभिर्निवासिताभूमिस्सर्वदोषाणि नाशयेत् ४७
कर्षणं त्वेवमाख्यातं भूमानमधुना श्रुणु
परमाणवादिरज्वन्तं मानसं धनमुच्यते ४८
रेणुर्वालाग्रविख्याति
लयवकरवजारेणुभिश्चाष्टवृद्ध्याभ्यांगुळ्यन्तदस्मिदिनकारकर
वेदाष्टवृत्तिक्रमेण
तालोभस्तश्च दण्डभवति सहिरणमेवमल्पं ग्रामो द्यादिनि
मेयान्यतधनुशमृतः प्रोच्यते भूमिभागः ४९
दण्डं पञ्चशतेनैव कोशं तत् द्विगुणं भवेत्
गोरुतार्त्थमिति ख्यातं तद्वयं गोरुतं मतम् ५०
योजिनौ कृष्णं स्यादेव विनक्रमं भवेत्
चतुरश्रन्तनुवृत्तं त्रिकोणं चतुराकृतिः ५१
ओजो युग्मपदे वर्त्म विवरं योगमेव तु ५२
द्विगुणेतां सवर्गार्वेति षट्प्रमाणतः
शेषं नक्षत्रमाख्यातमष्टभिर्गुणिते ततः ५३
त्रिंशत् भाजिमशेषस्तु स्थितिरित्यभिधीयते
नक्षत्रशेषमाख्यातं स्थिताय करणे पुनः ५४
रंध्रे हन्ते शान्नमेव निर्गुणितन्तु यत्
मुनिभिर्भाजिते शेषो वर्रीत्युपरिदृश्यते ५५
आयाधिक्यं व्ययाकीर्णमत्रेदं सर्वभूमिदम्

अशुभं विपरीतञ्चेत् ध्वजो धूमश्च केसरी ५६
श्वावृषो गर्दभश्चैव गजः काकोष्टयोनिषु
गजसिह्मौ च नागश्च शुभाश्शेषा विपत्कराः ५७
कर्तृनामाद्यरामाला द्विचतुर्त्थं द्विषड्वथ
स्युः सुनामानि शुभदाश्शेषास्त्वशुभदा स्मृताः ५८
सवायुबर्हळीशस्तमप्रशस्तमथेरितम्
द्वितीया च तृतीया च पञ्चमीशततःपरम् ५९
षष्ठी चैव विशेषेण सप्तमी तु तथैव च
दशम्येकादशी चैव शुक्लपक्षे त्रयोदशी ६०
अपरे प्रतिपच्चैव वास्तुकर्मणि संस्मृताः
कृष्णे प्रागुक्ततिथयस्तथा मद्धयफलप्रदाः ६१
तस्करो भुक्तिशक्तिश्च धन्यो पूपो नपूंसकः
निर्भयोथ दरिद्रस्तु प्रेष्योंशनवमस्मृताः ६२
शुभनाम्नि शुभं तेषु दुर्नामाप्यशुभं भवेत्
त्याज्यास्सौरारसूर्याश्च शेषाश्शुभफलप्रदाः ६३
मुखं सर्वानुकूलञ्चेद्दत्ताधिक्यन्तु मद्धयमम्
समयञ्चेदथ स्यात्तु दोषारुयन्तु विवर्जयेत् ६४
दण्डं दण्डेन वर्द्धन्ते हस्तं हस्तेन रोपयेत्
अंगुलञ्चांगुलेनैव सूत्रपातस्त्वनन्तरम् ६५
दिक्भ्रान्तिनाशनार्त्थाय शंकुच्छायावशेन तु
प्राचीमुदीचीं विज्ञाय सूत्रपादं समारभेत् ६६
पलाशं ब्राह्मणस्योक्तमश्वत्थः स्यान्नृपस्य तु
खादिरं वैश्यजातेस्तु कृष्णस्य तु मधूकजः ६७
षडंगुलपरीणाहं तच्च द्विगुणमायतम्
सुवृत्तमरुणं शंकु कलितस्तंभमेव वा ६८
मूलादष्टांशहीनाग्रं शिरस्यापस्कलकम्

शंक्वग्रदारसदृशं वेशं तद्वेदभागतः ६९
कर्णौ भुजौ च कोटी च समकरठफलाकृति
कंठवर्गाभवेत् कोटिभुजवर्गसमासतः ७०
शस्तस्य दशमूलं स्याद्देवमूलक्रमो भवेत्
संवर्गे तु भुजाकोटि तदर्द्धन्तु भुजाफलम् ७१
त्रिवर्गं घनमाख्यात्ं द्वादशं च षडश्रकः
परिधिर्वित्तविष्कंभस्त्रिगुणञ्च स्वरांशयुक् ७२
नाहं विष्कंभपादघ्नं फलमूलं हतं घनम्
धनुषो बाणसंवर्गन्नचावर्गान्तमुदीरितम् ७३
मणपेन तु सादृश्यं षड्भागन्तु षडश्रभाक्
भुजापिरडदभूतञ्च चतुर्त्थावप्यतन्त्रतु ७४
बाह्यस्योक्त्वा क्रमेरौव फलवर्गसवर्गजः
पातरेखामनेनैव क्रमेण च समानयेत् ७५
इच्छयाफलमाहत्य प्रथमाप्तफलन्तु यत्
तत्फलं सर्वमानीय प्रत्युपन्ननमेव च ७६
श्रेयसंकिलनादीनि चानेयानि दशानधा
एवं संक्षेपतः प्रोक्तं भूमानं दरडमुच्यते ७७
निधिर्दरडविवृत्यर्त्थमूहात्संवर्द्धयेत् बुधः
एकोनत्रिसहस्त्रान्तं तदूर्ध्वं नेष्यतेत्र तु ७८
संख्यायैकोनपञ्चाशत् द्विशतं हीनमुच्यते
तदूर्ध्वं मद्धचमं प्रोक्तं तत्समञ्चोत्तमं भवेत् ७९
मानं सप्तदशं ज्ञेयं चत्वारिंशत् स्वरोत्तरम्
एवं विस्तारमाख्यातं ग्रामादीनां विशेषतः ८०
कुर्यादेकमतं तेषु ञ्रानुकूल्यं सहैव तु
भूमानमिति विज्ञेय मायादीन् लक्षयेत्क्रमात् ८१
धनर्णौ योनिनक्षत्रौ वस्वायुश्चांशुकन्तथा

वारोष्टैतानि संशोद्धय गृहवास्तुसमारभेत् ८२
विस्तरेणाभ्यदेदैर्घ्यन्ताद्रजियुधवा पुनः
विस्तारायामसंयुक्त राशी वाथ निरीक्षयेत् ८३
वसुभिर्गुणिते भानुभूतेशेषो यवः स्मृतः
सगुणयवह्निभिस्सूत्रैर्भक्तशेषो व्ययस्तथा ८४
रामघ्नेष्टभृते योनिरष्टभिर्विधिते पुनः
सप्तविंशतिभक्तैव स्वायुस्तच्च फलं स्मृतम् ८५
कृत्वैवं वास्तुभूमेस्तु मद्धये निलदिगाश्रितम्
मण्डलन्दण्डमानेन षडंगुलसमन्वितम् ८६
जलेन समतां नीत्वा दर्पणोदरवत्समम्
कृत्वा तु तस्य मद्धयन्तु द्विमयेच्छंकुमानतः ८७
शंकुद्विगुणमानेन वृत्तस्संभ्रामयेत् बहिः
तद्बहिर्ग्रामशंकुश्च त्रिगुणेनैव मद्धयतः ८८
शंकुस्थापनकात्पूर्वरात्र्यामेवाधिवासयेत्
प्रोक्षयेत्पञ्चगव्यैस्तु शुभैश्च शुद्धमृज्जलैः ८९
नवांबरैरसैर्वेददर्भैस्सृग्भर्मनोरमैः
शालिभिस्थंडिलं कृत्वा मण्डले तिलतंडुलैः ९०
वस्त्रेणास्तीर्य दर्भैस्तु संप्रोक्ष्य प्रणवेन तु
स्थंडिले शाययेच्छंकुं प्राक्छिरस्कं सदर्भकम् ९१
अपरे दिवसे भानोरुभयेत्तु शुभे तथा
पुण्याहं वाच्य तत्रैव शंखकूजननिस्वनैः ९२
शयनाच्छंकुमादाय शंकुमंडलमद्धयमे
स्थापयेत्प्राङ्मुखोधीमानाचार्यश्शिल्पिभिस्सह ९३
गुरुं संपूजयेत्पश्चात् शिल्पिनं पूजयेत्तदा
वस्त्रहेमांगुलीयाद्यैर्गन्धपुष्पादिभिस्तथा ९४
पूर्वाह्णायोश्चायाप्रवेशे निर्गमेऽपि वा

सूत्रत्रयेण तत्प्राची निश्चित्यदृढमानसः ९५
इष्टमासे तु तद्वयक्तत्रयोलाञ्छनबीजकान्
संख्यादिकामनायैव न्यूने रोप्यधिके ह्रसेत् ९६
शुद्धप्राचीति विज्ञेय सर्वशास्त्रानुसाश्रितम् ८६
मध्याह्ने यनसवेश्चाभाचैवं विधेत्सुधीः
प्राचीसूत्रप्रमाणेन कृत्वामस्य द्वयं ततः ८७
शफलं तस्थसूत्रेण याम्ये सौम्यविनिर्दिशेत्
द्रोणषूत्पलकुर्यान्तु विन्यसेश्चावरं क्रमात् ८८
तद्वत्सूत्रत्रयं कृत्वा प्राचीसूत्रस्य पार्श्वयोः
तथोदीचीनसूत्रस्य सूत्रं याम्योत्तरद्वयम् ८९
लेखयेत्तु चतुष्कोष्ठं चतुरश्रं भवेदिह
सूत्राणि विसृजेत्तस्मात् तदभीष्टप्रमाणतः ९०
विप्राणं समकूर्याश्रं प्रशस्तमथवा पुनः
चतुरश्रार्धभागं वा चतुर्भागमथार्धकम् ८१
त्रिपादं वा त्रिभागं वा त्रियंशे द्वयंशकं भवेत्
आरोप्य समतुर्यश्रे यथा पूर्वापराधिकम् ९२
कल्पयेदाद्यसौम्यं तु दीर्घं तुर्याश्रमावहेत्
अशुभं युग्मदण्डं च दशयुग्मशुभं भवेत् ९३
दण्डच्छेदनकार्यं स्यात् गृहत् ग्रामे तु यत्नतः
ग्रामं तु पञ्चधा कृत्वा भागमेकं बहिन्यसेत् ९४
तत्पैशाचमिति ज्ञेयं तत्र देवालयं भवेत्
ककितस्मिन् विशेषोऽस्ति तं विशेष शुणु द्विजाः ९५
वास्तुपैशाचिके स्थित्वा ईशो विष्णुश्च मात्रभिः
अन्येषां वास्तुदेवानां पदे पैशाचिके तथा ९६
चतुष्षष्टयेकशीति वास्तुभूम्यखिलं ततः
चतुष्षष्टिविभागे तु प्राचीनानि निवैव हि ९७

सूत्राणि कल्पयेत्तद्वदुदीचीनानि वास्तुवित्
ब्राह्मचं विद्याच्चतुष्षष्टिपदेष्वन्तश्चतुष्पदम् ९८
तद्बहिर्द्वादशपदं परितो देविकं विदुः
दैविकादि हितो विंशत् पदं मानुषमुच्यते ९९
पैशाचान्तं बहिः प्रोक्तमष्टविंशत्पदं तथा
एकाशीते तु षष्टचानि स्थानानि निच वर्जयेत् १००
युग्मकोष्ठे सूद्दमसूत्रयुग्मकेषु पदस्थिताम्
देवानभ्यर्चयेत्तत्र पूर्वाद्यै स्वस्वनामभिः १०१
ब्रह्माणं संयजेत्तेषां मध्ये कोष्ठे चतुष्ककके
मरीचिश्च विवस्वांश्च मित्रे द्मोधर एव च १०२
ब्रह्माणस्तु चतुर्दिद्मु द्विपदार्थद्वयानुगाः
महेन्द्रादित्यसत्याश्च भ्रशेग्रहद्मतोय सः १०३
गन्धर्वभृङ्गराजस्तु पुष्पदन्तो जलेश्वरः
असुरश्शोषभल्लाटौ सोमौ मृगोदितस्तथा १०४
षोडशैते द्विकोष्ठेस्था प्रागम्य वरुणेन्दुषु
आपस्तथापवत्सश्च साविन्द्रश्च सविन्द्रकः १०५
इन्द्रश्चेन्द्रजयस्सर्व रुद्रो रुद्रजयस्तथा
द्वितीयावरणे वाह्ये चार्धार्धपदभोगिनः १०६
जयन्तस्वन्तरिद्मश्च पीतस्थस्तु भ्रगस्त्वभिः
सुग्रीवः पापयद्मा च मुख्यकं च दितिस्तथा १०७
पार्श्वयोस्त महादिद्मु तदैकैकपदानुगाः
ईशानस्त्वथ पर्जन्यो बहिः पूषा तथैव च १०८
नीलो द्वारितकश्चैव रोगनागोष्टवे तथा
बाह्यावृतेशकोष्ठादि विदिद्मुर्धार्धकोष्ठगाः १०९
बाह्ये शूलचतुष्केषु चरक्याद्यास्तु संस्थिताः
वास्तुदेवां चतुष्षष्ठपदेष्वेवं प्रकल्पयेत् ११०

अपामार्गत्सकोष्ठेषु तस्य वामा भुजा स्मृताः
सविता सवित्रिपदे भुजेन दक्षिणस्तथा १११
मरीच्यान्तस्य वक्त्रं तु पदे भानोगिरिस्तथा
वामपार्श्वे धरित्रीन्द्रे सव्यपार्श्वो विवस्वति ११२
इन्द्रे चन्द्रे जये तस्य दक्षिणं पादमुच्यते
रुद्रे रुद्रजये तस्य वामपादः प्रकीर्तिताः ११३
मित्रे गुह्यप्रदेशस्तु हृन्नाभिश्चाम्बुजासने
एवं चाथोमुखं वास्तु पुरुषं प्रबलं विदुः ११४
एकाशीति पदान्यत्र लभन्तेषास्तु मध्यमे
देवता यजताद्वास्तु नर आप्तो भवेत्ततः ११५
दश प्राङ्मुखसूत्राणि दशैवोदङ्मुखानि तु
एकाशीति पदान्यत्र लभन्तेषांस्तु मध्यमे ११६
ब्राह्मे नवपदं विद्यात् तद्बाह्येकावृते तथा
षोडशानि पदानीह विद्यते देशिकं त्विति ११७
बाह्येश्चकावृते चैव चतुर्विंशतिमानुषम्
बहिरावरणे चैव द्वात्रिंशेत् पदकं तथा ११८
पैशाचं त्विति विख्यातं तदेवाश्चान्तरे स्थिताः
नवपञ्च तथा बाह्ये चतुरश्रं शूलगं तथा ११९
चत्वारिंशन्नवैतानि संयजेदात्मभूतये
वस्वन्धरां धरां देवीसर्वभूताश्रयां वराम् १२०
वराहात्महरेर्वक्त्रदंष्ट्रोद्धृतममेदिनीम्
सरित्समुद्रवसनां ध्यात्वा तन्नाम मन्त्रतः १२१
समर्च्य गन्धपुष्पैश्च वास्तुभूमेस्तु मध्यमे
शालिभिस्थण्डिलं कृत्वा तण्डुलैश्च तिलैस्सह १२२
तस्मिन्नेकोनपञ्चाशत्पदान्यलिखितेषु वै
शालितण्डुलसंसिद्धां चत्वारिंशन्नवाधिकान् १२३

चरुं विन्यस्य तेष्वेव घृतेनैवाभिघार्य च
संप्रोद्य प्रणवेनैव वस्त्रैशाच्छाद्य सत्कुशैः १२४
द्वादशं बहिसंपूर्णं विप्रजातिसमुद्भवम्
सर्वलक्षणसंपूर्णं स्नातामाभरणो द्यताम् १२५
शुक्लाम्बरधरां शुक्लां गन्धपुष्पैरलङ्कृताम्
शुक्लाम्बरोत्तरीयां तां संभोज्यात्र यथेच्छितम् १२६
ततस्यैव तु दत्तां तां ताम्बूलं च चरू ---
वास्तुदेवपदेष्वेव पीठे हस्तप्रमाणतः १२७
त्रिमेखलसमायुक्तो गोमये लेपिते पदे
देशिकस्तु बलिं दद्याददीयां तु समाहितः १२८
तदन्ते बलिदातारं पूजयेत्तु विशेषतः
वस्त्रहेमाङ्गुलीयाद्यैर्धान्यगोभूमिकाञ्चनैः १२९
उच्चार्य प्रणवत्तादौ मध्यमे तत्स्वनाम च
समुच्चारं नमोन्ते तु दत्वा पुष्पोदकेषु च १३०
तन्मन्त्रेणबलिं दद्यात् दध्याज्यगुलसंयुतम्
ब्रह्मणे ब्रह्मकोष्ठेषु बलिं दत्वा विशेषतः १३१
मरीचिश्च विवस्वांश्च मित्रश्च पृथिवी धरः
अब्जोद्भवश्चतुर्दिक्षु दिक्षु प्रागादि दिक्स्थिताः १३२
षट् षट् पदेषु तासुष्ट्वा पायसं कृसरं तथा
हरिद्रान्नं गुलान्नं च तेभ्यो दद्यात् क्रमेण तु १३३
आपश्चैवापवत्सश्च पत्मजेशानमध्यतः
सविता चैव सावित्रौ ब्रह्माग्निमध्यमे स्थितौ १३४
इन्द्रइन्द्रजयादिश्चैवीरं चनिलमध्यमे
तावद्विद्विपदे यष्ट्वा कर्णमार्गप्रदानुगात् १३५
प्रियङ्गन्नवमुद्गान्नं माषान्नं वैणवान्नकम्
गोधूमान्नं यवान्नं च कुलस्थान्नतृणान्तकम् १३६

आपादिनामथाष्टान्नं बलिं दद्यात् क्रमेण तु
ईशानस्त्वथ पर्जन्यो जयन्तश्च महेन्द्रकः १३७
भास्करस्सत्यकभ्राज अन्तरिक्षं च पूर्वगाः
तान्यष्टगन्धपुष्पाद्यैः स्वस्वमन्त्रैर्यथाकृतम् १३८
पत्मकन्दसमायुक्तं लाजापूपसमायुतम्
क्रमेणैव चरुं दद्यादेकैकस्य पृथक्पृथक् १३९
वह्निपुष्पा च वितथो गृहक्षतयमौ तथा
गन्धर्वो भृङ्गराजश्च मृगौ दक्षिणतस्थिताः १४०
पूजयित्वा तु तान् गन्धपुष्पाभितसमक्रमात्
कदलीफलसंयुक्तसिदसिद्धार्थसंयुतम् १४१
शाल्यान्यं तु यथान्यान्ते ष्वन्तर्दद्यात् बलिं पृथक्
नीलौ दौवारिकं चैव सुग्रीवं दन्तपुष्पकः १४२
पाशभृच्चासुरश्चैव पापयक्ष्मा तथैव च
पश्चिमे संस्थिता देवा ताद्यष्ट्वा विधिपूर्वकम् १४३
सतिलं पृथुकोपेतं पनसस्य फलान्वितम्
शुद्धान्नं च बलिं तेषां क्रमेणैव तु दापयेत् १४४
पावनौ नागमुख्यौश्च भल्लाटेन्दुर्भगस्तथा
अदीतिश्चातिश्चैव सौदिक्सव्यं व्यवस्थिताः १४५
तान्यष्ट्वा गन्धपुष्पद्यैर्नालिकेरफलान्वितम्
तथा चोत्पलकन्दश्च चारुमात्रफलान्वितम् १४६
बलिक्रमेण चरुणा दद्यान्नाम्नामयाबुधः
सर्वेषामथ शुद्धान्नं बलिं वा दापयेत्पृथक् १४७
वास्तुपूजाविहीनं चेत् स्वच्छं ग्रामो विनश्यति
बलिदानं ततः कृत्वा गृहनिर्माणमारभेत् १४८
अथवा गृहनिर्माणं कृत्वा दद्यां बलिं ततः
कृत्वा तु गृहनिर्माणं कृत्वा ग्रामप्रवेशनम् १४९

तदन्ते तु बलिं दद्यादुत्तमो मध्यमोऽधमः
दण्डकं प्रथमं प्रोक्तं द्वितीयं भद्रमुच्यते १५०
श्रीवत्सं तु तृतीयं स्यात् नाभियुक्तं चतुर्थकम्
पञ्चमं पार्श्वयुक्तं तु षष्ठं चैव प्रकीर्णकम् १५१
सप्तमं स्वस्तिकं प्रोक्तमष्टमं पार्श्वसंयुतम्
दण्डकारक्रमेणैव तेषां लक्षणमुच्यते १५२
यथेष्टामतकथ्यैकद्वारद्वयसमन्वितम्
स दण्डकमिति प्रोक्तं गृहारम्भादि नामतः १५३
पूर्वाग्रमुत्तराग्रं च कृत्वा वीथिद्वयं पुनः
शस्तरभ्या तु परितो भद्रमेतत्प्रकीर्तितम् १५४
सर्वेषां परितः कुर्यात् महामङ्गलवीथिका
पञ्चवीथिसमारभ्य नवत्रिंशतिका विधिः १५५
उदङ्मुखास्त्वायुग्माश्च वीथयस्समुदाहृतः
प्राङ्मुखो वीथयस्तिस्रस्त्वविच्छिन्नोस्तथैव च १५६
अष्टादशविधं ह्येवं श्रीवत्समिह भाषितम्
श्रीवत्सं पूर्ववत्कृत्वा देविकांशसमाप्युतम् १५७
नाभिवीथिं नतः कुर्याच्चतुरश्रं समन्ततः
श्रीवत्सं नाभियुक्तं तु द्वितीयं समुदाहृतम् १५८
श्रीवत्सं पार्श्वयुक्तं चेदात्मसौम्ये त्रियांशके
मध्यवीभ्यास्तु पार्श्वाभ्यां वीथिद्वे मध्यवीथिवत् १५९
पूर्वापरे समाख्याते शेषं श्रीवत्स उच्चरेत्
विस्तारस्यां महावीथ्यां सप्तषट्पञ्च दण्डके १६०
क्षुद्रवीथ्यास्तु विस्तारं चतुस्त्रिद्वेकदण्डकैः
षट्वीभ्याश्चैव पूर्वाग्राचोत्तराग्राष्षसेव हि १६१
पञ्चविंशपदाकारपदेष्वन्तः पृथक्पृथक्
प्राङ्मुखोदङ्मुखाक्षुद्रवीथयस्तिस्र एव च १६२

प्राङ्मुखोदङ्मुखास्तस्माद्वीथयस्त्वेकविंशतिः
एवं प्रकीर्णकं प्रोक्तं स्वस्तिकं त्वधुनोच्यते १६३
प्राङ्मुखा वीथयस्तिस्रस्तथैवोदङ्मुखास्मृताः
वास्तुमध्ये त्रियंशे तु वीथयः परिकीर्तितः १६४
दक्षिणाभिमुखाश्चैव पूर्ववीथिं तयेत्तदा
पश्चिमाभिमुखाश्चैव याम्यवीथिनयेदथ १६५
आनयेत्पञ्चवीथिं तु उत्तराभिमुखं ततः
तथैवोत्तरवीथिं च प्रागग्रं तु विनिर्णयेत् १६६
चतुष्काणामन्तराले क्षुद्रवीथीचतुष्टयम्
सङ्कल्प्य परितः कुर्यात् महामङ्गलवीथिकाम् १६७
तन्मध्ये कल्पयेत्कर्तुः प्रधानाङ्गनपञ्जरम्
आग्नेयादिषु कोणेषु जनानां निर्गमं कुरु १६८
त्रिदण्डं गृहविस्तारं तद्दैर्घ्यं सप्तदण्डकम्
गृहः कन्यसमुद्दिष्टं विस्तारं पञ्चदण्डकम् १६९
नवदण्डं तथायामं मध्यमं समुदाहृतम्
दैर्घ्यमेकादशो दण्डो विस्तारं सप्तदण्डकम् १७०
गृहं तदुत्तमं विद्यादेविभीष्टं तु कारयेत्
तत्रैव हस्तमानेन गेहः कुर्याद्विशेषतः १७१
दण्डाभावगमे मावा त्रिचतुर्थालयायुतम्
एकद्वित्रिकविन्यासो वास्वगञ्च न दोषभाक् १७२
गृहश्रेणी विनिश्चित्य समं शङ्कुं निदापयेत्
ग्राममध्यस्थ शङ्कुश्च वास्तुसीमाष्टदिक्षु च १७३
शैवान् संस्थापयेच्छक्र नध्यार्धादण्डमानकान्
ब्रह्माङ्गं तु चतुर्भागं कृत्वा वायव्यभागतः १७४
पञ्चमूर्तिक्रमेणैव विष्णुं संस्थाप्य पूजयेत्
हरिदृष्टस्तु सर्वेषां हरपृष्ठश्शुभस्मृतः १७५

शाङ्करे तु सभास्थानं कुर्यात् कूपं जलाशयम्
आग्नेयां चैव गोवासं चतुर्वर्तिसमायुतम् १७६
क्रयविक्रयकर्मार्थं नैर्ऋत्यां वारुणं तथा
देवानामालयं चैव कारादुत्तममागतः १७७
भास्करे तु यमेन्द्रे तु महामोटचास्तु पावके
षणमुखस्यैव याम्ये तु शास्तुनाह्लादिगोचरे १७८
विष्णुस्तु वारुणे भागे दुर्गायां वायुदेशतः
मातृणां तु तथा सौम्ये शाङ्करे शङ्करस्य तु १७९
ऐन्द्रेशानान्तरे मुख्यं सौम्येशानान्तरेथवा
तटाकतीरे ज्येष्ठाया कारयेदालयं तु वा १८०
वास्तूक्तदेवतानां तु बालस्थानपुरस्सरम्
विमानं विधिनादाय स्थापयेद्विधिना ततः १८१
प्रतिष्ठास्तु च या देवा पूर्वमन्त्रव्यवस्थिताः
उक्तदेशन्यदेशे वा नदेवास्त्वङ्गभाजितः १८२
शिवाराधननैर्ऋत्यां भुक्तिमुक्तिप्रदं भवेत्
अन्येषां पूजयेन्नित्यं ग्रामवृद्धिकरं परम् १८३
देवस्थानं विना यत्र एककालं निवासयेत्
नित्यपूजाविहीने तु श्रद्धां कुर्वन्तदुत्थितम् १८४
तस्मात्सर्वप्रयत्नेन नित्यपूजां समाचरेत्
बालालयश्च देवानां कृत्वा संस्थाप्य पूर्ववत् १८५
बालस्थानं विना यत्र मूलस्थानं न कारयेत्
पदे पैशाचिके द्वाथ महापैशाचिकान् बहिः १८६
कारयेत् परिकान् तत्र प्राकारं सुदृढं यथा
चतुर्द्वारसमायुक्त स्वयान्मे जलमार्गयुक् १८७
तटाकान् कल्पयेद्धीमान् चतुर्दिक्ष्वंष्टदिक्षु च
भूसुराणां प्रवेशार्थं स्थिरराश्योदये शुभे १८८

जीवशुक्लादये लग्ने शुभदग्रनिरीक्षणे
ततः प्राक् पञ्चसप्ताहे नवाहे चाङ्कुरार्पणम् १८९
दैविके मानुषां गेय यश द्वादश षोडश
गृहाणि कृत्वा विप्राणां गृहोपकरणानि च १९०
भूषणाच्छादनादीनि यवत्साङ्गां तथैव च
ग्राममानुष्य पञ्चाशत् षोदशं सप्तमांशकम् १९१
कृत्वा तेष्वेव मानं वै परितः पैशाचिकस्य वै
पैशाचेन समारोप्य तस्मिन्कर्मोपजीवनाम् १९२
आवासं च यथास्थानं परितः कल्पयेत्ततः
वाद्यकानां कुलालानां आवासं त्वीशदेशतः १९३
तद्भवो दक्षिणे भागे स्थपतिर्नाग्नि वासभृत्
वैश्यानान्तु वाया नामा आवासो दक्षिणे तथा १९४
तैलविक्रयवृत्तानां शूद्राणां वारुणे पुनः
पुष्पोपजीविनाञ्चैव मत्स्यमांसोपजीविनाम् १९५
सच्छूद्रादन्यशूद्राणां रसमृत्युदिदित्सया
तद्बाह्ये कर्मकाराणां कारूणां मध्यमोत्तरम् १९६
तद्बाह्ये कर्मकारामावसच्छाद्यदृच्छया
रजकानां तु तद्बाह्ये चण्डालानान्ततो बहिः १९७
ग्रामस्य चोत्तरे दूरे नद्यास्तीरेऽथवा पुनः
श्मशानं कल्पयेत्तत्र विस्तारायामसंयुतम् १९८
तद्बाह्ये त्रिंशतिर्दण्डे वसेच्चण्डालकर्मकः १९९
एवं प्रोक्तं वास्तुविन्यासमार्गं भूमेर्मानं शालयं देवतानाम्
ग्रामादीनाञ्चोक्तजात्यन्तराणां बाह्ये सालं कारणाख्ये च तन्त्रे २००

इति कारणे प्रतिष्ठातन्त्रे वास्तुविन्यासनामतृतीयपटलः

अथ आद्येष्टकाविधिपटलश्चतुर्थः

आद्येष्टिकाविधिं वक्ष्ये परं कर्षणपूर्वकम्
पुष्यमासादाषाणमासं प्रशस्तं चोत्तरायणम् १
आषाढादि च षाणमासमशस्तं दक्षिणायनम्
देवानां तदहं प्रोक्तं अयनं चोत्तरं त्विह २
रात्रियुक्तं तु देवानां दक्षिणायनमत्र वै
उत्तरायणकाले तु शुक्लपक्षे विशेषतः ३
पौष्णादित्य मखात्वाष्ट्रखातिसावित्रमैत्रकम्
प्रजापत्य शिवो विष्णुस्तिष्याश्च पुष्य उत्तरः ४
षष्ठी च सप्तमी वापि प्रतिपत् पौर्णमास्यपि
द्वितीया पञ्चमी चैव तृतीया च त्रयोदशी ५
सितसौम्यगुरुं चेन्दुं वाराः श्रेष्ठता स्मृतः
होरादर्शनांश्चैव एषां द्रेककरणकश्शुभाः ६
उदयं शस्तमेतेषां तत्र शन्युदयं विना
नक्षत्रं क्रूरकैर्जुष्टं रोगपीडां करोतिभिः ७
मेषं कर्कटकं तौल्यं मकरं चैव वर्जयेत्
अन्याश्च शुभदा प्रोक्तास्तेषु चापं विवर्जयेत् ८
एवं परीक्ष्य कर्तव्यं यदिच्छेच्छ्रेयमात्मनः
यद्देशसत्मकर्तव्यं यद्देशं कर्षणं कुरु ९
विप्रक्षत्रियविदशूद्रस्त्वनलोमष्षडैव हि
सत्म निर्वाणकर्तव्यं सर्वप्राणिहिताय वै १०
श्वेता च लोहिता पीता कृष्णा चेतमहीक्रमात्
चतुर्णां भूसुरादीनां सङ्ग्राह्य वसुधा द्विजः ११
क्षेत्रस्थितिवशादुर्वि कथिता त्वनुलोमिनाम्
मधुरा च कषाया च कटुकाम्ला च वर्णिनाम् १२
कृमिजुष्टान्तदोषध्यां वल्मीकाध्यां च वर्जयेत्
हस्तमात्रावटंखात्वा पूरयेत्तन्मृदा पुनः १३

श्रेष्ठा चत्व वटाधिक्या मध्यमा समतामहि
न्यूने तु कन्यसा प्रोक्ता यादृशी तादृशी फला १४
तरुभिर्यज्ञकैः कार्यं फालं युक्तं हलं युगम्
कौपिलौ श्वेतरक्तौ वा नाङ्गहीनौ वृषौ तथा १५
हेमशृङ्गखुरैर्युक्तौ तरुणौ बलसंयुतौ
बद्ध्वा हलं युगेनैव गोचर्म कृतरज्जुना १६
देशिकस्तु शुचिर्भूत्वा सकलीकृतविग्रहः
नवाम्बरधरोष्णीषसितवस्त्रोत्तरीयकः १६
हेमाङ्गुलीययाज्ञाद्यैर्भूषितस्यादिशैवकः
पुण्याहं वाचयित्वा तु कर्षयेच्छिवमन्त्रतः १८
विशेषेण शिवं ध्यात्वा प्रागुदक्प्रणवं महीम्
देशिकं पूजयित्वा तु दद्यात्तु सहलौ वृषौ १६
वापयेन्नेत्रमन्त्रेण तिलसर्षपमुद्गकाम्
त्रिरात्रेऽङ्कुरिते भूमिस्सोत्तमेति प्रशस्यते २०
भूताहोङ्कुरमध्या च सप्ताहेङ्कुरतेऽधमाः
मध्यपक्षे तु सस्यांश्च गोगणानां निवेदयेत् २१
निश्चित्योर्विस्तुहम्यार्थं तस्यैन्द्रे चोत्तरेऽथवा
शङ्करे बालहर्म्यं तु कृत्वा वै बाललिङ्गकम् २२
संस्थाप्यमर्चयेत्तत्र पश्चान्मूलं तु कारयेत्
मूलस्थानस्य नैर्ऋत्यां दण्डमात्रेण भूतलम् २३
जलेन समतां नीत्वा कुट्टिमोच्चं गुणाङ्गुलम्
आसनं खादिरं वापि शमी वैकङ्कतं तु वा २४
ब्राह्मणादि क्रमेणैव शक्त्यर्भदारुमाहरेत्
द्वादशाङ्गुलमायामं नाहं विद्यात् षडङ्गुलम् २५
सुसमं ----------
----शिकं चैव संपूज्य शिल्पिनं पूजयेत्ततः २६

गोपुरं च विना यत्र स्थापितं मूलमम्बिकम्
तत्केवलमिदं प्रोक्तं तस्य स्थानं विधीयते २७
शैवे च वैष्णवे वापि दौर्गे स्कन्दे च धामनि
मातृणामालये वापि भास्करस्यालयेऽपि वा २८
मधो स्वज्ञालये वापि यमानेश्च यथापि वा
प्रासादे मण्टपे चैव प्राकारवृतहर्म्यके २९
वैष्णवे यान्ति शैवं तु स्थापनं यदि संभवे
सकलं निष्कलं वापि तथा सकलनिष्कलम् ३०
स्थापनं शैवतन्त्रेण पूर्वोक्तविधिना ततः
कृत्वा तु विधिवत् सम्यक् नित्यपूजां समाचरेत् ३१
नित्योत्सवं न कुर्वीत कुर्याद्धातुकमर्चयेत्
नैमित्तिकेक् च स्नपनं बुभूषविषशान्ततः ३२
पवित्रारोहणं चैव सर्वकार्याद्विधानता
उत्सवं तु न कुर्वीत संकरात्स्थानसंकरात् ३३
अन्येषभेतवो नेका वद्दयन्ते तु भविष्यति
शैवं विष्णुप्रतिष्ठायेत् स्थानकं वासनं तु वा ३४
शयनं वाथ संस्थाप्य तैन्त्रशैवविधानतः
पाञ्चरात्रेण विधिनान्येन संस्थाप्य वाजयेत् ३५
नित्यकर्माणि सर्वाणि कुर्यान्नित्योत्सवं विना
बलिदानं न कुर्वीत बलिपीठाद्यसंभवान् ३६
सर्वयानोत्सवं कुर्यात्केवलस्य प्रजापते
यदि मोहेन कृत्वा तु राजा राष्ट्रं विनश्यति ३७
एवं पूर्वोक्तदेवानामालये चान्यधामसु
प्रोक्ता यस्य विमानस्य यद्दे ---- ध्रुवम् ३८
तस्यै वोत्सम उक्तस्तदाश्रितस्य न चोदितः
एवं शैवेपि शंभोत्तु नोत्सवं तु विधीयते ३९

वैष्णवे धाम्निविष्णोस्तु नैवमुत्सवमाचरेत्
अन्यानि नित्यकर्माणि नित्यं कुर्याद्विधामतः ४०
एवमुक्तं यथा युक्तहरकेशवयोस्ततः
केवलस्थापनन्यायां संक्षेपं न तु विस्तरात् ४१
आद्यं वै शङ्कमानेन द्विगुणेन द्वितीयकम्
त्रिगुणे तु तृतीयं तु वर्तयेन्मण्डलत्रयम् ४२
देशिकस्य नियोगेन शङ्कुसङ्गृह्य तत्सकः
भानुबिम्बोदये तस्य मण्डले सादिसंभवे ४३
मण्डलस्य च मध्ये तु शङ्कुं संस्थाप्य निश्चलम्
पूर्वापराह्णयोश्छायां बिन्दुवृत्तेषु शाङ्कयेत् ४४
शङ्कुं विसृज्य बिन्दून्तछायासूत्रत्रयं लिखेत्
अवच्छाया विना मासे प्राचीसूत्रं विनिश्चितम् ४५
अवच्छायान्विते मासे ह्रासाये दधिकार्धकम्
तन्मानं वर्धये न्यूनं शुद्धाप्राचीं तु निर्णयेत् ४६
प्राचीसूत्रप्रमाणेन मत्स्य षट्कं तु कारयेत्
एवं याम्योत्तरं वद्ध्वा साधयेच्चतुरश्रकम् ४७
कृत्वा दण्डप्रमाणेन तदर्धे दण्डवा पुनः
तदधिष्ठानमानेन प्रासादसमविस्मृतम् ४८
तदग्रे वास्तुदेवांश्च पदस्थान् सम्यगर्चयेत्
एकाशीतिपदं कृत्वा प्रोक्षयेत्पञ्चगव्यकैः ४९
पत्मजं नवकोष्ठस्थं तन्मध्ये संयजेद्बुधः
ब्राह्मणं च चतुर्दिक्षु षट्षट्पदगतस्त्विमे ५०
स्मरीयपूर्वभागे तु विवस्वं दक्षिणे मता
मित्रस्तु पाशहृद्देशे उत्तरे भूद्धरस्तथा ५१
ईशानस्याब्जमध्ये तु आस्यै चैव पदद्वयम्
आपवत्सपदद्वौ तु वह्नेः पत्मजमध्यमे ५२

सवितेन्द्रपदौ द्वौ च सावित्रस्य पदद्वयः
निर्ऋतो ब्रह्मणे मध्ये विरिञ्चानलमध्यमे ५३
रुद्रस्येह पदौ द्वौ तु पदौ रुद्रजयस्य च
यद्वद्वयवस्थिताः पूर्वं तद्वद्वयवस्थिता भवेत् ५४
इन्द्रश्चैव तु पर्जन्यो जयन्द्रश्च महेन्द्रकः
रोगो नागस्तथा मुख्यो भल्लाटस्सोम एव च ५५
जगश्चैवादितिश्चैव दितिश्चैव तु चोत्तरे
एकैकपदभोक्तारो द्वात्रिंशत् बाह्यदेवता ५६
चारकी च विदारी च पूतना पापराक्षसी
ईशानदिक्षु कोणेषु शूलस्था पदवर्जिता ५७
अधोमुखो भुवं प्राप्य शते वास्तुनरस्मृतः
उग्रत्वात् भवकारित्वात् पूजितस्य फलस्पुभिः ५८
शिरोस्यैशानकोष्ठस्था निर्ऋतौ चरणौ स्थितौ
मध्ये ब्रह्मपदे नाभिरङ्गे सर्वपदानुगम् ५९
चतुर्भुजो जटामौलीं कमण्डलूक्षधारकः
वामहस्तं तु जानूर्ध्वे सव्यहस्तजले स्थितम् ६०
हेमाभमब्जजं यष्ट्वा गन्धाद्यैरुपचारकैः
दद्ध्वाज्यगुलसंमिश्रं शुद्धान्नेन बलिं क्षिपेत् ६१
स्मरीय श्वेतवर्णं तु विवस्वानृत्तवर्णकम्
शातकुम्भनिभो मित्रः कृष्णवर्णस्तु भूधरः ६२
श्वेतवर्णं तथापस्तु जपाभस्वापवन् कसः
सविता नीलवर्णस्तु सावित्रे धूम्रवर्णकः ६३
आदित्यो रक्तवर्णस्तु सत्यकश्चित्रवर्णकः
भृशो बन्धुकपुष्पाभ कुन्दाभस्वन्तरिक्षकः ६४
अग्निस्तद्वर्णकः प्रोक्तः पुरुषा रक्ताब्जसन्निभः
वितथश्चेन्द्रजा चाभो विद्युद्वर्णो गृहक्षतः ६५

यमः कृष्णाञ्जनाभस्तु गन्धर्वः पत्मरागवत्
भृङ्गराजस्तु भृङ्गाभा जीमूताभो मृगस्तथा ६६
निर्ऋतिः पावकाभिश्च द्वौ वारीरप्सितस्तथा
शिखार्णान्तश्च सुग्रीव इहाभः पुष्पदन्तकः ६७
श्वेताभो वरुणश्चैव कृष्णाभो रक्तकस्तथा
उत्पलाभस्तथा शेषः पावयद्मेन्द्रनीलवत् ६८
अनिलो धूम्रवर्णाभः रोगो हारिद्रसन्निभः
शङ्खवर्णस्तथा नागो मुख्यो मौक्तिकसन्निभः ६९
वेताब्जाभस्तु भल्लाटः कनकाभस्तु सोमकः
ऋगो रक्तोत्पलाभश्च मुदाभो दितस्तथा ७०
उदितः कपिलाभश्च चरकीशङ्खसन्निभाः
पावका भावितारस्यात् पूतना हेमसन्निभः ७१
नीलजीमूतसदृशा वर्णा वै पापराक्षसी
मरीच्यादि चतुर्णां तु पायसं बलिरुच्यते ७२
विदिक्दवापादि देवानामष्टानां कृसरं बलिः
ईशानाद्यष्टदेवानामुद्गान्नं बलिरुच्यते ७३
हुताशनादि देवानां गुलान्नं बलिरुच्यते
निर्ऋत्यादि पश्चिमस्थान घृतान्नं दापयेद्बुधः ७४
अनिलाद्युत्तरस्थानं दध्यान्नं दापयेद्बलिम्
चतुस्त्राणां च रथ्यादि माषान्नं बलिमाचरेत् ७५
पूर्वे वो चोत्तरे वापि वास्तुहोमं तु कारयेत्
सर्वेषां वास्तुदेवानां स्वनामाद्येन होमयेत् ७६
एकैकं पञ्चविंशद्वा सङ्ख्याष्षोडश वादश
तिलतण्डुलसंयुक्तं होमयेद्देशिकोत्तमः ७७
द्रव्यान्ते व्याहृतिं हुत्वा स्विष्टान्नं हि समाचरेत्
वास्तुहोमं विना यत्र कृतं वास्तु विनश्यति ७८

होमान्ते यजमानेन देशिकग्गलव्यमुद्धरेत्
गुरुं कर्तारमन्वीक्ष्य तदेश्छाल्लाश्च तूद्धुणैः ७९
यदङ्गं स्पृश्यते कर्ता वास्तुदेशे तद्दङ्गके
शल्यं विनिर्दिशेत्प्राज्ञश्शिरस्संस्पर्शने यदि ८०
तत्रार्धस्विष्टताले तु हेमशाल्यं विनिश्चितम्
नासिकायास्तु संस्पर्शे चन्दनं सप्ततालके ८१
गुन्मस्पर्शेऽस्थिशल्यं स्यात् स्पर्शतालास्ति तन्विह
उदरस्संस्पर्शने चैव काजतं पञ्चतालतः ८२
नाभिस्पृष्टे चतुस्तालान् कांसशल्यं विनिर्दिशेत्
गुह्यसंस्पर्शने ताम्रं त्रितालायस्थितं विदुः ८३
स्पर्शनं ऊरुजानू च त्वया संहस्तमात्रतः
यदा गुल्फौ च संस्पर्शे तृपुशल्यं विनिर्दिशेत् ८४
विदित्वैवं व्यपोह्याथ प्रोक्षयेत् पञ्चगव्यकैः
सिकतोपरि मृद्भिस्तु समलं सदृढं कुरु ८५
अधोमुसलपादैश्च हस्तिपादप्रपादनैः
मुष्टिमृद्भिश्च पाषाणैश्शर्करैरिह पादकैः ८६
पादयेत्तत्तले हर्म्य सूत्राद्वै भित्तिसूत्रकान्
हर्म्यसूत्रान् बहिःकल्प्यजन्मसूत्रान्यसेत्क्रमात् ८७
तस्योत्तरे प्रपां कृत्वा नवहस्तप्रमाणतः
वितानोनेनमाच्छाद्य तरङ्गेणावृतं बहिः ८८
दर्भमाला समावृत्य दिग्ध्वजाश्च प्रलम्बयेत्
तन्मध्ये वेदिकां कुर्यात्त्रिहस्तं विस्मृतां शुभाम् ८९
मुष्टिमात्रोन्नतां मृद्धि निम्नोन्नतविवर्जिताम्
तस्याश्चैष चतुर्दिक्षु कुण्डानि करमात्रतः ९०
चतुरश्रं धनुर्वृत्तमब्जमिन्द्रादितः क्रमात्
लक्षणोक्तानि कुण्डानि कृत्वा गोमयवारिणा ९१

लेपयेत्पञ्चगव्यैश्च प्रोक्षयेद्धृदयेन तु
शिलाभिश्चेष्टकाभिर्वा स्थापयेत्प्रथमेष्टिका ९२
उपलं शैलजे चैव इष्टका मृण्मये तथा
संमिश्रेप्युपलेश्चैव तरुजो पादपं तथा ९३
आद्येष्टका पुंशिलायास्त्रिधाद्वै द्वारबन्धनम्
नपुंसके बले पेतनमूर्धेष्टां क्षिपेत्ततः ९४
विकाराङ्गुलमायामा पत्यङ्गुलसुविस्मृताः
तप्रा युगाङ्गुलप्रोक्तां तलस्यैकस्य कीर्तिताम् ९५
पक्षाङ्गुलवृद्ध्या तु अष्टत्रिंशाङ्गुलान्तकः
तदर्धविस्तृतं तासां तीव्रं तस्माद्धमुच्यते ९६
तथा वै रविभूमीनां ततः प्रथशिला स्मृताः
त्रयोदशाङ्गुला मायामन्याङ्गुलविति स्मृताः
निवृत्यन्त ---- स्यार्धमपनीयेष्टकां क्रमात् ९७
तालं प्रत्यङ्गुलं वृद्धयं चतुर्विंशत्यर्धकं क्रमात्
ऋजुरेवापुमां चैव श्रोतारेखानपुंसकाः ९८
जाया चतुर्यश्रेखा च ज्ञानकर्म समारभेत्
बिन्दुरूपायुतां कृष्णां कुञ्जराक्षयुतामपि ९९
धूतयातसमायुक्तं वर्जयेदिष्टकां बुधः
किञ्चिन्मूलं भवेदग्रं तन्मूलं किञ्चिदुन्नतम् १००
वदनं ह्यूर्ध्वभागं स्यात् --- शन्तु पृष्ठकम्
कन्यासाश्च चतुस्रस्तु अलंकृत्य शिलास्ततः १०१
ताभिश्च स्वशिताश्चाग्रास्त्वन्मूलस्त्वितरा स्मृताः
आद्येष्टका दिनात्पूर्वे रात्रौ चैवाधिवासयेत् १०२
आचार्यश्शिवशास्त्रज्ञश्शिवदीक्षाभियुक्तकः
सर्वलक्षणसंपन्नस्त्वादिशैवदृढव्रतः १०३
सुस्नातस्तु शुचिर्भूत्वा सकलीकरणान्वितः

नवाम्बरधरोष्णीषस्सोत्तरीयस्सुमालकः १०४
पञ्चाङ्गभूषणैर्युक्तस्सशिष्यपरिचारकः
इष्टकाः पञ्चगव्यैश्च क्षालयेच्चर्मणागुरुः १०५
हेमकौतुकसूत्रेण कार्पासैर्वा स बन्धयेत्
वैदिकोपरि कर्तव्यमष्टद्रोणैश्च शालिभिः १०६
तदर्धं तण्डुलोपेतां तण्डुलार्धतिलन्वितम्
लिखित्वाष्टदलोपेतं कर्णिकाकेसरान्वितम् १०७
स्थण्डिलं पञ्चगव्येन संप्रोक्ष्य हृदयेन तु
स्वस्वदिक्ज्ञापनार्थं तु लेखयेदिष्टकान्तरे १०८
पूर्वभागे त्वकारं तु यमे त्वाकारमेव तु
उकारं पश्चिमे देशे ईकारे सुम्यके तथा १०९
प्रत्येकं वस्त्रयामेन हृदा वेद्यष्टपुष्पयुक्
स्थण्डिले मध्यमस्थाप्य यथा पूर्वोत्तराग्रकाः ११०
ऋग्यजुस्सामथर्वाणमधिदेवाहपूजयेत्
तन्तुना चित्रकान्कुम्भान् गन्धाम्बुपरिपूजितान् १११
वितानाद्धतवस्त्रस्यात् हेमयुक्तान्सकूर्चकान्
पुष्पाम्रपल्लवोपेतान् इन्द्राद्यष्टदिशासु वै ११२
लोकपालाधपानष्टसंस्थाप्यर्चयेत्सुधीः
ततो होमं प्रकुर्वीत अग्निकार्योक्तमार्गतः ११३
पालाशोदुम्बराश्वत्थ न्यग्रोधस्समिधाः क्रमात्
सद्येन तु समुद्धृत्वा मूलेनाज्यं हुनेत्ततः ११४
अघोरेण चरुं हुत्वा तिलसंमिश्रितं हुतम्
नेत्रेण होमयेद्धीमान्प्रत्येकं शतसंख्यका ११५
प्रभाते विधिना स्नात्वा देशिको मूर्तिपैस्सह
जयादिरभ्याधानां च जुहुयात्तु विशेषतः ११६
ततः पूर्णाहुतिं दत्वा स्विष्टमग्नेतिमन्त्रतः

स्थापकं स्थापितिश्चैव संप्राप्ते तु शुभोदये ११७
वस्त्रहेमाङ्गुलीयैश्च पूजयेत्तौ विशेषतः
मन्दिरे मण्टपे चैव प्राकारे गोपुरे तथा ११८
परिवारालये चैव विधिनैतेन विन्यसेत्
मुहूर्ते समनुप्राप्ते द्वारं निश्चित्य बुद्धिमान् ११९
द्वारस्यदक्षिणे चांघ्रिमूले भित्त्यन्तराळके
शिलाश्चैवेष्टका वापि स्थापयेत्स्थापकोत्तमः १२०
ईशानकादिमन्त्रैश्च प्रक्षिप्येंद्रादितः क्रमात्
अग्रमग्रन्तु चैशान्नये पृष्ठपृष्ठञ्च नैर्ऋते १२१
पृष्ठाग्रे त्वनलौ वायौ ज्ञात्वा कर्मसमारभेत्
तन्मद्धये विन्यसेन्नृत्तं पञ्चमृद्भिस्तु लेपयेत् १२२
श्वभ्रमद्धये हृदा कुंभतोयैश्चैव प्रपूरयेत्
शुभन्तु दक्षिणावर्तं वामावर्तमशोभनम् १२३
वामावर्ते सतिप्राज्ञश्शान्तिसोमं समाचरेत् १२४

इति कारणे प्रतिष्ठातन्त्रे आद्येष्टकाविधिपटलश्चतुर्त्थः

अधिष्ठानविधिपटलप्रारंभः

अधिष्ठानविधिं वक्ष्ये उपपीठकपूर्वकम्
आदौ चैव प्रकृत्यूर्ध्वे प्रथमं फलकां कुरु १
पादान्तरं तदुत्सेधं तदूर्ध्वमुपपीठकम्
तन्मद्धये तस्यबाह्ये तु तस्योच्चार्त्थन्तु नीव्रकम् २
वस्त्वाधारसमायामं समं वा पादहीनकम्
अर्द्धं वोच्चकमेवन्तु उपपीठस्य कीर्तितम् ३
अंघ्रिका द्विगुणं वापि पादोनद्विगुणन्तु वा
द्विगुणार्द्धन्तु वा बाह्ये उपपीठस्य विस्तरम् ४
उपपीठस्य चोत्सेधं भवेद्विंशति भागतः

उपानात् पञ्चभागान्तमर्द्धेनार्द्धेन वर्द्धयेत् ५
तस्योर्ध्वे चोपपीठन्तु कारयेल्लक्षणान्वितम्
श्रीकरं लळितं भद्रमुपपीठं त्रिधामतम् ६
कलांशं विभुजेदायः पद्मांशं जन्म उच्यते
द्विभागे पञ्चकञ्चैव पट्टिकांशेन कीर्तितम् ७
कौशीकांशेन कर्णन्तु व्योमांशेनोर्ध्वपट्टिका
पद्मांशेनोर्ध्वपद्मं स्यान्महापट्टी तथैव च ८
तत्कर्णस्यैव वा बाह्ये मसूरं जगती समम्
पादताराष्टभागैकहीनं कर्णप्रतारकम् ९
एवं श्रीकरमाख्यातं आयामं पूर्ववत् भजेत्
अश्विन्यंशेन जन्मन्तु कंपमेकेन कारयेत् १०
अधः पद्मं द्विभागेन कंपमेकेन कारयेत्
भूतांशं कन्धरं प्रोक्तमेकांशं वेत्रमुच्यते ११
ऊर्ध्वपद्मद्विभागेन महापट्टी तथैव च
लळितं ख्यातमेवन्तु आयामं त्वष्टधा भवेत् १२
अंशेन पादुकां कुर्यादर्द्धांशं कंपमुच्यते
युगांशं गळमित्युक्तमर्द्धांशं वेत्रमुच्यते १३
महापट्टिद्विभागेन भद्रमेवं प्रकीर्तितम्
सिंहव्याळगजैर्वापि भूतकैस्संयुतानि वै १४
उपपीठं समाख्यातमधिष्ठानमथोच्यते
प्रथमं फलकोर्ध्वे वा उपपीठे ध्वजेऽपिवा १५
उपानोर्ध्वे त्वधिष्ठानं कल्पयेदुभयेऽपिवा
प्राक् बाह्ये जन्मनिर्यूहं मूले पादद्वयं भवेत् १६
निर्यूहं त्रिविधं कृत्वा बाह्ये कांशं व्यपोह्य च
पद्मांशेन समायुक्तं कारयेज्जगतीं पुनः १७
मसूरकमधिष्ठानं वस्वाधारं धृतालकम्

चत्वार्ये तानि नामानि पर्याय वचनानि च १८
प्रथमं पादबन्धञ्च द्वितीयं प्रतिबन्धकम्
एकैकन्तु चतुर्भेदं पद्मकं पद्मपूष्कलम् १९
पद्मासनन्तु भेदानि पादबन्धस्य सुव्रत
प्रतिक्रमं प्रकीर्णञ्च प्रतिसुन्दरमेव च २०
प्रतिबन्धस्य भेदानि कारयेल्लक्षणान्वितम्
एकोनसंकरं कुर्यादेकेनैकत्र वा पुनः २१
यदधिष्ठानमानन्तु त्रयोविंशति भागभाक्
पर्वतांशं जगत्युच्चमब्ध्यंशं कुमुदोन्नतम् २२
वस्वंशं कुमुदं ज्ञेयमेकांशेनोर्ध्वपट्टिका
कन्धरन्तु गुणांशेन व्योमांशेनोर्ध्वपट्टिका २३
महापट्टिगुणांशेन एकं स्यात्पादबंधनम्
धराधरोच्चं विभजेदेकविंशति भागतः २४
अधः पद्मं द्विभागेन कंपमेकेन कारयेत्
जगत्युच्चं शरांशेन युगांशं कुमुदं भवेत् २५
अष्टांशं कुमुदं प्रोक्तं कंपमेकं न कारयेत्
गुणांशं कन्धरं प्रोक्तं व्योमांशं वेत्रमुच्यते २६
कंपमेकेन कर्तव्यं महापट्टीगुणांशकम्
पद्मकञ्चैवमाख्यातमायामं पूर्ववत् भजेत् २७
कंपमेकेन कर्तव्यं रसांशं पद्मतुण्डकम्
अंशेन कंपमित्युक्तमंशेनोर्ध्वं सरोरुहम् २८
वेदांशं कुमुदं प्रोक्तं अंशेनाथ सरोरुहम्
अंशेन कंपमित्युक्तं पक्षांशं खण्डमुच्यते २९
वेत्रमंशेन कर्तव्यमंशेनोर्ध्वसरोरुहम्
महापट्टिं द्विभागेन कारयेत्तु विचक्षणः ३०
पद्मपुष्कलमेवं स्यादायामं पूर्ववत् भजेत्

पद्मभागमथोब्जन्तु व्योमांशं वेत्रमुच्यते ३१
भूतांशं जगतीप्रोक्तं अंशेनाथ सरोरुहम्
अर्द्धांशं कंपमित्युक्तमूर्ध्वपद्मं तथैव च ३२
कुमुदोच्चं चतुर्भागमर्द्धेनाथ सरोरुहम्
अर्द्धांशेनैव कंपन्तु सार्द्धपद्मांशकं गळम् ३३
अर्द्धांशेनैव पद्मन्तु ऊर्ध्वपद्मं तथांशकम्
महापट्टी द्विभागेन एतत्पद्मासनं स्मृतम् ३४
पादबंधकमप्येवं प्रतिबंधमथ श्रुणु
तीर्त्थांशं विभजेदायं भूतांशं जगती भवेत् ३५
तथा वै कुमुदोत्सेधं कंपमेकेन कारयेत्
एकेनान्तरितं प्रोक्तं प्रतिमुख्यन्तु द्वयंशकम् ३६
प्रतिमुखं कर्करी भूतं नागवक्त्रमथापि वा
प्रतिवाजनमंशेन एतत्स्यात्प्रतिबंधनम् ३७
मसूरकोच्चं विभजेत् षड्विंशत् भागतस्ततः
जगत्युच्चं रसांशं स्यात् सारांशं वप्रमुच्यते ३८
व्योमांशं कंपमित्युक्तं गुणांशेन गळं भवेत्
कंपमेकेन कर्तव्यमेकेनोर्ध्वसरोरुहम् ३९
कपोतन्तु युगांशेन अंशेनालिंगमुच्यते
एकेनान्तरितं प्रोक्तं प्रतिमुख्यं द्वितीयकम् ४०
प्रतिवाजनमेकेन कल्पयेत् कल्पवित्तमः
एतत्प्रतिक्रमं प्रोक्तमायामं पूर्ववत् भवेत् ४१
पद्मतुंडं रसांशेन भूतांशं कुमुदो भवेत्
कंपमेकेन कर्तव्यमेकैकोर्ध्वसरोरुहम् ४२
कपोतन्तु युगांशेन कंपमेकेन कारयेत्
एकेनान्तरितं प्रोक्तं प्रतिमुख्यन्तु द्वयंशकम् ४३
प्रतिवाजनमेकन्तु एतत्प्रकीर्णकं स्मृतम्

त्रिंशदेकोनभागेन आयामं विभजेत्ततः ४४
अधः पद्मद्विभागेन एकांशेनैव कंपकम्
जगती भूतभागन्तु अद्धयर्द्धेनोर्ध्वकंपकम् ४५
अर्द्धांशं कंपमित्युक्तं अंशेनोर्ध्वसरोरुहम्
कुमुदोच्चं गुणांशेन पुंसेनार्द्धसरोरुहम् ४६
अंशेन कंपमित्युक्तं गुणांशं गळमुच्यते
अंशेनैकोर्ध्वकंपन्तु एकांशेनोर्ध्वपद्मकम् ४७
कपोतोच्चं गुणांशेन अंशेनालिंगमुच्यते
अन्तरीतं तथांशेन प्रतिमुख्यन्तु द्वयंशकम् ४८
एकेन वाजनं प्रोक्तं मकरव्याळसिंहकैः
गजैश्च वल्लिपत्रैश्च नानालीलासमन्वितम् ४९
मकरास्येवनिक्रान्ता व्याळविद्याधरान्वितम्
एवमन्तरिते कुर्यात् कपोते नासिकायुतम् ५०
प्रतिसुन्दरमेतत् स्यात् वेशनिर्गमनं श्रुणु
वेत्राणाञ्चैव सर्वेषां वेदभागैकनिर्गमम् ५१
यावज्जगति निर्यूहं तावद्वप्रस्य निर्गमम्
पद्मानाञ्चैव सर्वेषां नीव्रन्तं सममुच्यते ५२
एषां पादं बहिर्नीव्रं तावत्प्रोक्तन्तु वेशनम्
अधस्तात्तु महापट्टया नाळी निर्गमनं कुरु ५३
हस्तं वाथ त्रिपादं वा वितस्तिर्वा विशेषतः
व्रजेत् बाह्ये विनिक्रान्ता नाळींशैवमयीन्तथा ५४
गजोष्ठसदृशाकारा सकृत्रिममुखोत्तरा
भूतसिह्मोपगूढावा साधारा वाथकारयेत् ५५
द्विदण्डं वा त्रिदण्डं वा गर्भगेहे तु वेशनम्
लिङ्गतारत्रिपादं वा द्विगुणं वार्द्धमेव वा ५६
प्रणाळमूलविस्तारं त्रिभागैकाग्रविस्तरम्

व्यासत्रिभागभागोनं बहुलं तत्त्रिभागभाक् ५७
वारिसंञ्चारगंभीरं तारंश्लक्ष्णञ्च भ्रूंरम्
अनिम्नोन्नतमाभित्तेस्तदत्यग्रात् क्रमोन्नतम् ५८
सर्वातोद्य समायुक्तं ततो मंगळवाचकैः
शान्तिहोमं ततः कृत्वा आचार्यं पूजयेत्ततः ५९
शिल्पिनं पूजयेत्पश्चात् सुमुहूर्ते सुलग्नके
आचार्यस्सुप्रसन्नात्मा वारुणं सूक्तमुच्चरेत् ६०
तक्षकः स्थापयेन्नाळीं सुस्निग्धांसुदृढां क्रमात्
लिङ्गप्रासादगर्भस्य यावन्नालस्य चावधि ६१
धारान्तु केवलं कुर्यात् भित्तेस्तालस्य सीमनि
श्रेष्ठमद्धयमकानिष्ठं लिंगस्य स्थापनं त्रिधा ६२
धरातलसमाप्ते तु स्थापनं चोत्तमं भवेत्
द्वारबंधस्य पूर्वे तु स्थापनं मद्धयमं भवेत् ६३
मूर्द्धोपलस्य पूर्वे तु स्थापनं कन्यसं भवेत्
यः करोत्यन्यधा चैव आभिचाराय चैव हि ६४

इति कारणागमे प्रतिष्ठातन्त्रे
अधिष्ठानविधिपटलः पञ्चमः

गर्भन्यासविधिपटलप्रारंभः

गर्भन्यासविधिं वक्ष्ये ग्रामादीनाञ्च सद्मनः
सगर्भं वर्द्धमानन्तु अगर्भं नाशनं ध्रुवम् १
तस्मात्सर्वप्रयत्नेन गर्भं संस्थापयेत्सुधीः
देवतास्थापनात्पूर्वं स्थापनञ्चोत्तमं भवेत् २
देवतास्थापनस्यान्ते स्थापनं मद्धयमं भवेत्
ग्रामविन्न्यासमारभ्य एकाब्दादूर्ध्वकालके ३
स्थापनं कन्न्यसं प्रोक्तग्रामादीनामिति स्मृतम्

उत्तरायणकाले तु माघमासविवर्जिते ४
सुवारेषु तिथौ चैव शुक्लपक्षे शुभे दिने
स्थिरांशे स्थिरनक्षत्रे होराकरणयोस्तथा ५
स्थिरद्रेक्काणके चैव स्थिरवारे स्थिरे ग्रहे
अखंडर्क्षे स्थिरे लग्ने सुमुहूर्ते विशेषतः ६
ग्रामादीनाञ्च तद्रात्रौ दिवाकाले तु सद्मनः
हैमराजतकांस्यं वा ताम्रेण फेळकां कुरु ७
कौशिकांभोधिरंध्रार्कगायत्र्यंगुलकैस्तु वा
फेळायाश्चैव विस्तार उत्सेधं तत्समं भवेत् ८
ग्रहीतोच्चं गुणांशे तु पक्षांशं भाजनोन्नतम्
एकांशं तत्पिधानोच्चं कोष्ठभित्युच्छ्रयं तथा ९
यवत्रयघना वापि द्वियवेन घनान्विता
फेळायास्तु घनार्द्धन्तु कोष्ठभित्तेर्घनं भवेत् १०
त्र्यंशैकेनोर्ध्वभित्तेस्तु घनार्द्धं ह्रासयेद्बहिः
पिधानाभ्यन्तरे तद्वत्संयोगार्द्धन्तु कारयेत् ११
वृत्तं वा चतुरश्रं वा गर्भफेळा कृति स्मृता
पञ्चविंशतिकोष्ठानि फेळामद्धये प्रकल्पयेत् १२
स्पृष्ट्वा बहिर्मलं शोद्धय प्रक्षाळ्याम्लेन वारिणा
मंगळांकुरकार्यन्तु विधिना कारयेत् बुधः १३
ब्रह्मस्थाने ग्रहे वापि ग्रामगर्भाधिवासनम्
विमानस्योत्तरे चैंद्रे सद्मगर्भाधिवासनम् १४
दशरंध्राब्धिहस्तेन विस्तृतं मंटपं कुरु
तन्मद्धये वेदिकां कुर्यात् तत्त्रिभागैकभागतः १५
तालमात्रसमुत्सेधा तस्य दिक्षु चतुर्ष्वपि
चतुरश्रानि कुंडानि प्रत्येकं हस्तमात्रतः १६
तयोरष्टानि कुंडानि गोमयेनोपलेपयेत्

वितानध्वजसंयुक्तं दर्भमालाभिरावृतम् १७
पुष्पमालासमायुक्तं द्वारतोरणसंयुतम्
मंगळांकुरसंयुक्तं तरंगेणैव वेष्टितम् १८
मण्टपं भूषयित्वा तु पुण्याहं वाचयेत्ततः
भूसुरान् भोजयेत्तत्र तद्दिनात्प्राक् दिनद्वये १९
वेद्यांशालि दशद्रोणैः स्थण्डिलं तिलतंडुलैः
कृत्वालिख्याष्टदिक्पद्मं कर्णिकाकेसरैर्युतम् २०
दर्भैश्चैव परिस्तीर्य स्थंडिलन्तु यजेत्ततः
रंभाम्रनाळिकेराणि नारंगानि फलानि च २१
लैकुचानि फलान्यत्र मातुळंगफलानि च
प्रदक्षिणक्रमेणैव स्थंडिलोपरिविन्यसेत् २२
वेद्याः पश्चिमभागे तु गोमयालेपिते शुभे
विचित्रे शालिपिष्टे च चतुरश्रे समे ततः २३
सप्तद्वीपसमायुक्तं सप्तांभोधिसमाकृतिम्
भूधराद्दिग्गजांश्चैव भूम्यधस्तात्तु पन्नगम् २४
आलिख्यसितचूर्णैश्च भुवनाध्वक्रमान्वितः
फेळांप्रक्षाळ्य गव्यैश्च स्थाप्यचित्रे तु मंडले २५
देशिकस्समलंकृत्य वस्त्रैः पञ्चांगभूषणैः
सकळी कृतदेहस्तु गन्धपुष्पैर्विभूषितैः २६
प्राङ्मुखः प्रस्थितो भूत्वा विन्यसेदक्षराणि तु
मद्धयकोष्ठे न्यसेत्कूटं बिन्दुनादसमन्वितम् २७
तत्पूर्वाद्यष्टकोष्ठेषु यादिहान्तानि विन्यसेत्
अकारादिविकाराणि प्राक्कोष्ठादिषु विन्यसेत् २८
माणिक्कं विन्यसेत्कूटे न्यसेद्वज्रं यकारके
वैडूर्यं तु रकारे तु नीलञ्चैव लकारके २९
मौक्तिकन्तु वकारे तु शकारे पुष्यरागकम्

षकारे वै मरतकं गोमेधन्तु सकारके ३०
हकारेस्फटिकन्नयस्य मूलमन्त्रमनुस्मरन्
गजं कृत्वा सुवर्णेन अकारे विन्यसेत्ततः ३१
राजतेन कपालन्तु कृत्वा कारे तु विन्यसेत्
कूर्मं ताम्रेण कृत्वा तु इकारे चैव विन्यसेत् ३२
खट्वांगमारकूटेन कृत्वीकारे तु विन्यसेत्
भ्रामकेन पिनाकन्तु उकारे विन्यसेत्ततः ३३
त्रिशूलं रजतेनैव औकारे विन्यसेद्बुधः
कांस्येन हरिणञ्चैव ऋकारेण तु विन्यसेत् ३४
परशुं ताम्रकेणैव ॠकारे विन्यसेत्ततः
धीपाधारन्तु ताम्रेण लृकारे चैव विन्यसेत् ३५
कयसागौळिकं कृत्वा लृकारे चैव विन्यसेत्
कर्कटकन्तु ताम्रेण कृत्वैकारे तु विन्यसेत् ३६
ऐकारे तु न्यसेल्लद्दमीं कृत्वा सौवर्णकेन तु
ओकारे तु न्यसेत्पूर्णकुंभं ताम्रमयेन तु ३७
औकारे स्वस्तिकं कृत्वा राजतेन तु विन्यसेत्
अंकारे तु न्यसेच्छंखं कृत्वा सौवर्णकेन तु ३८
अःकारे तु न्यसेत्खट्वां कृत्वा वै राजतेन तु
यकारे गैरिकन्नयस्य रकारे श्यामकन्नयसेत् ३९
मनश्शिलां लकारे तु वकारे गंधकन्नयसेत्
शकारे त्वञ्जनं न्यस्य सौराष्ट्रन्तु षकारके ४०
सकारे हरितालन्तु गोरोचनां हकारके
हृदयं मन्त्रमुच्चार्या विन्यसेद्देशिकोत्तमः ४१
यकारे विन्यसेच्छालीं रकारे तु यवान्नयसेत्
कोद्रवन्तु लकारे तु वकारे माषकन्नयसेत् ४२
मुद्गञ्चैव शकारे तु कंबूबीजं षकारके

सकारे प्रियंगुर्विन्नयस्य हकारे तु कुळुत्थकम् ४३
ईशानेन तु मन्त्रेण विन्यसेत्तु क्रमेण तु
सर्वकोष्ठानि संपूर्य हैमेन शालिभिस्तु वा ४४
ग्रामादीनां विमानस्य एतत् सामान्यमुच्यते
किञ्चिदस्तिविशेषोत्र ग्रामादीनाञ्च तं श्रुणु ४५
विप्राणाञ्च हितार्त्थन्तु यज्ञसूत्रं कमंडलुम्
स्रुवञ्च प्रणवाकारं सौवर्णं मद्धयमे न्यसेत् ४६
रथं हयं गजञ्चैव शार्दूलञ्चापमेव च
क्षुरिकां हेमरूपाञ्च पत्तने राजधानिके ४७
तुलाञ्च मानसात्रञ्च महिषं गोघृतन्तथा
सौवर्णान् मध्यकोष्ठेषु विन्यसेन्नगरेऽपि च ४८
हलं फालं युगञ्चैव युग्ममत्स्यन्तु शालिकम्
सौवर्णं मद्धयकोष्ठेषु विन्यसेत्कटकादिषु ४९
ईशानेन तु मन्त्रेण विधानेन विधाय च
वस्त्रेणैव कुशैश्चेव वेष्टयगंधादिभिर्यजेत् ५०
फेळामुद्धृत्य हस्ताभ्यां विन्नयसेत्स्थरिडलोपरि
आचार्यो मूर्तिपैस्सार्द्धं होमकर्मसमारभेत् ५१
देशिको मूर्तिपाश्चैव होमं कृत्वा विचक्षणः
विधिनाग्निमुखं कृत्वा मूलेन समिधो हुनेत् ५२
पलाशो दुंबराश्वत्थ न्यग्रोधसमिधः क्रमात्
सर्पिषं हृदयेनैव शिखया तु चरुं हुनेत् ५३
लाजंकवचमन्त्रेण सिद्धार्त्थं नेत्रमन्त्रतः
यवञ्चास्त्रेण हुत्वा तु प्रत्येकं शतसंख्यया ५४
मूलब्रह्मषडंगैश्च क्षुरिकाबीजमुख्यकैः
सर्विषाहोमयेद्धीमान् प्रत्येकं पञ्चविंशतिः ५५
वास्तुदेवं स्वबीजैश्च प्रत्येकं वसुसंख्यया

आज्येन जुहुयाद्धीमान् कुण्डं प्रत्येकमाचरेत् ५६
आत्मेंद्वर्कवियद्वायुतेजो पञ्चस्वबीजकैः
पृथगष्टाहुतिं हुत्वा व्याहृतिं जुहुयात्ततः ५७
स्रुवापूर्णाहुतिं कुर्याच्छिरोमन्त्रेण देशिकः
घृताहुत्यास्तु मंत्रान्ते संपाताहुतिमार्गतः ५८
हुत्वाज्यन्तु समानीय फेळायां चोपरिस्रवेत्
--व्यन्नचासमथारभ्य गर्भसंस्थापनान्तकम् ५९
ऋृगादद्धयनं कुर्यात् क्रमेणैव दशासु च
यावन्मुहूर्तं संप्राप्य तावन्मन्त्रजपं कुरु ६०
ग्रामादीनामजस्थाने यमेवा वारुणेऽपि वा
द्विहस्तं चैकहस्तं वा तत्रावटन्तु खातयेत् ६१
ग्रामादीनां क्रमात् गर्भं स्थापयेदप्रकाशतः
गर्भस्थानस्य याम्यायां फेळांदर्भोपरिन्यसेत् ६२
पञ्चगव्येन संप्रोक्ष्य कवटस्य तु मद्धयमे
आलेपयेत्तु तन्मद्धये सामुद्रकमृदा पुनः ६३
शेषाभागोर्ध्वभूमीस्था सप्तद्वीपोर्णवा स्मृताः
दिग्गजान् भूसुरांश्चैव संकल्प्य क्रमशस्तथा ६४
कद्रौ क्षेत्रे ह्रदेनद्यां कुळीरावासके हले
वृषभस्य तु शृंगे तु गजदन्तेषु मृत्स्मृता ६५
इंद्रादीशानपर्यन्तमष्टदिक्षु क्रमान्नयसेत्
नागं कूर्मं धरान्देवीं सौवर्णेनैव निक्षिपेत् ६६
उत्पलस्य तु कन्दञ्च कन्दन्नीलोत्पलस्य तु
कुमुदस्य तु कन्दन्तु रक्तपद्मस्य कन्दकम् ६७
पूर्वादिक्रमयोगेन मृदाचैव तु विन्यसेत्
आचार्यं पूजयेत्तत्र वस्त्रहेमांगुलीयकैः ६८
कन्यसं दशनिष्कन्तु द्विगुणं मद्धयमं भवेत्

त्रिगुणं चोत्तमं प्रोक्तं देशिकस्य तु दक्षिणा ६९
गोभूमिदासधान्यानि गृहोपकरणानि च
दापयित्वा विशेषेण देशिकन्तोषयेत्ततः ७०
श्रद्धयेतृमूर्तिधारांश्च दैवज्ञंपूजयेत्ततः
संपूज्यस्थपतिं तत्र वस्त्राभरणकैरपि ७१
मुहूर्ते समनुप्राप्ते गुरवे सन्निवेदयेत्
ध्यात्वा सदाशिवं देवं मूलमंत्रं समुच्चरेत् ७२
फेळान्तु प्राङ्मुखो भूत्वा स्थापयेदादिशैवकः
पांसुना पूरयेत् गर्तं सुस्निग्धं सुदृढं कुरु ७३
तस्योर्ध्वे कल्पयेद्धीमान् सभां वै देवमन्दिरम्
प्रभाते तु विमानस्य गर्भस्थापनमारभेत् ७४
आचार्योमूर्तिपैस्सार्द्धं स्नानं कृत्वा यथाविधि
सकळीकरणं कृत्वा फेळां गंधादिभिर्यजेत् ७५
जयादिरभ्याधानञ्च राष्ट्रभृच्च क्रमाद्धुनेत्
पूर्णाहुतिञ्च शिरसा स्विष्टामग्नेति होमयेत् ७६
शंखकाहळभेर्याद्यैर्गीतवेदरवैस्तथा
स्तोत्रैश्च विविधैश्छत्रस्तुत्यैः पिंछैस्समाकुलम् ७७
जले संप्राप्य पुरतः स्वस्तिसूक्तसमन्वितम्
सुगंधपुष्पधूपैश्च दीपैरर्घ्यैस्समन्वितम् ७८
फेळामुद्धृत्य तद्धामप्रादक्षिण्य क्रमेण तु
प्रविश्यालयमार्गस्य दक्षिणे प्राङ्मुखो गुरुः ७९
गर्भप्रक्षेपणं कुर्याद्धामद्वारस्य दक्षिणे
उपानेशूद्रजातीनां जगत्युपरिमद्धयमे ८०
कुमुदोर्ध्वे नृपाणान्तु भित्यूर्ध्वे चाग्रजन्मनाम्
सर्वेषां भूगतं शस्तं गर्भन्यासन्तु सर्वधा ८१
अष्टधा विभजेत् भित्तिं वेदांशं बाह्यतस्त्यजेत्

त्रीणि चाभ्यन्तरे कृत्वा मद्धये कांशे तु निक्षिपेत् ८२
आचार्यं मूर्तिपैश्चैव पूर्ववत्संप्रपूजयेत्
आचार्यस्सुप्रसन्नात्मा पूर्ववत्स्थापयेत्क्रमात् ८३
एवं यः कुरुते भक्त्या सपुरयां गतिमाप्नुयात्

इति कारणागमे प्रतिष्ठातन्त्रे गर्भन्यासविधिपटलः षष्ठः

प्रासादलक्षणविधिपटलप्रारंभः

अथातस्संप्रवक्ष्यामि प्रासादानान्तु लक्षणम्
प्रासादं भवनं सद्मगृहं धामनिकेतनम् १
विमानं सदनं हर्म्यं वासो मन्दिरमालयम्
निलयस्त्विति विख्यातास्तस्याः पर्यायवाचकाः २
अंगुलं त्रिविधं प्रोक्तं पूर्वमानांगुलं भवेत्
मात्रांगुलं द्वितीयन्तु देहलब्धं तृतीयकम् ३
जालान्तरगतं रश्मेर्दृश्यादृश्यं तु यद्रजः
परमाणुस्तदाख्यातं रेणुरोमकलीक्षुका ४
यूकं यवं क्रमेणैव वृद्धिरष्टांगुलैस्तथा
यवोदराष्टविस्तारमंगुलञ्चेति कीर्तितम् ५
अंगुलं द्वादशन्तालं किष्कुहस्तञ्च तत्द्वयम्
प्राजापत्यकरं प्रोक्तं पञ्चभिर्विंशदंगुलम् ६
षड्विंशति धनुर्मुष्टिस्सप्तविंशद्धनुग्रहम्
शयनञ्चासनञ्चैव किष्कुमानवशात् कुरु ७
प्रासादादीन् सभां शालां मौळिकां मरटपं गृहम्
प्राजापत्य करेणैव कारयेत्तु विचक्षणः ८
राजधान्यादिकं राजभवनञ्च तटाहकम्
दुर्गाञ्चैव प्रकर्तव्यं धनुर्मुष्टिकरेण तु ९
कुर्याद्धनुग्रहेणैव नद्याध्वानं विशेषतः

मानांगुलेन हस्ताभ्यां लक्षणं परिकीर्तितम् १०
मध्यमस्य करे दक्षे मध्यांगुल्यास्तु मध्यमम्
पर्वदीर्घन्तु यत्तुल्यं मात्रांगुलमिति स्मृतम् ११
यागोपकरणं सर्वं कुर्यान्मात्रांगुलेन तु
गृहीतप्रतिमायामा तत्तालांगुलिसंख्यया १२
भजेत्तेष्वेकभागन्तु देहलब्धांगुलं स्मृतम्
कन्यसं मद्धयमं श्रेष्ठं त्रिविधं भवनं स्मृतम् १३
त्रिहस्तन्तु समारभ्य षट् तालान्तं क्रमेण तु
एकत्रिंशतिहस्ताच्च द्विद्विहस्तविवर्द्धनात् १४
सप्तभूमिं समारभ्य क्रमादर्कतलान्तकम्
उत्तमं त्विति विख्यातं कारयेल्लक्षणान्वितम् १५
विस्तारद्विगुणोत्सेधं कन्नचसस्य प्रकीर्तितम्
विस्तारं सप्तधा कृत्वा रव्यंशं मध्यमोच्छ्रयम् १६
विस्तारं पूर्ववत्कृत्वा रुद्रांशं उत्तमोच्छ्रयम्
प्रासादस्य तु विस्तारं त्रिभिरंशैर्विभाजयेत् १७
एकांशं गर्भगेहन्तु शेषं भित्तिरिति स्मृतम्
विस्तारं पञ्चधा कृत्वा गुणांशं वाथ गर्भितम् १८
विस्तारं सप्तधा कृत्वा गर्भं वेदांशकेन वा
विस्तारं दशधा कृत्वा गर्भमृत्वंशमेव वा १९
लक्षणेनालयं कुर्याल्लिंगमानवशादपि
लिंगत्रितारकं पीठं गर्भपीठं त्रितारकम् २०
तद्बाह्ये पीठतारेण भित्तिं कुर्यात्समाहृतम्
अथवा गर्भविस्तारं पीठतारचतुर्गुणम् २१
पीठतारात् द्विगुणितं गर्भार्द्धं भित्तिविस्तृतम्
समं त्रिपादमर्द्धं वा हर्म्यस्य वक्त्रमष्टपम् २२
अधोना संप्रवक्ष्यामि एकभूमेः प्रमाणकम्

षड्वर्गसहितं कुर्यात् लक्षणेन समन्वितम् २३
विस्तारयुगभागैकं वस्वाधारस्य चोच्छ्रयम्
पादवर्गसमं तस्य द्विगुणञ्चेति कीर्तितम् २४
प्रस्तरञ्चरणार्द्धन्तु तत्समं ग्रीवमुच्यते
शिखरञ्चरणायामं स्थूप्युत्सेधं तदर्द्धकम् २५
समन्तारचतुर्विंशत् भागैकं पादतारकम्
पञ्चविंशतिभागैकं वैकं षड्विंशदंशके २६
पादविष्कंभकं यत्तद्दण्डञ्चेति प्रकीर्तितम्
दण्डाष्टांशैकहीनं यदग्रपादस्य तारकम् २७
धरातलोपरिष्टात्तु पादवर्गन्तु कारयेत्
स्तंभस्थूणञ्च पादञ्च स्थाणुर्दारुतलांघ्रयः २८
जंघा च चरणेनैव पर्याय वचनानि च
व्योमाग्निवर्तिभिर्वापि भूताब्धिपतिभिस्तु वा २९
समतारेंघ्रिवर्गे तु एकभूमेस्तु कारयेत्
कृत्वा वेदिं द्विदण्डेन वस्वाधारस्य चोपरि ३०
तस्यायामन्तु नवधा अ-त्वैकांशेन पट्टिका
कन्धरन्तु युगांशेन अंशेनाधारपट्टिका ३१
पक्षांशा वेदिकाप्रोक्ता व्योमांशाचोर्ध्वपट्टिका
उत्तराधस्त्रिपादेन दण्डछ्रयपरिग्रहेत् ३२
तत्स्थाने ताटिकोत्सेधं दण्डार्द्धञ्चेति कीर्तितम्
तद्दैर्घ्यं रसधाभज्य एकेन गिरिकाद्वयम् ३३
गिरिकायान्तु विस्तारमग्रपादसमं भवेत्
एकेन वृत्तकं कुर्यात् पक्षांशेन सरोरुहम् ३४
द्विभागेनास्यकन्तस्य द्वारमद्धयर्द्धदण्डकम्
तस्योर्ध्वे दण्डमानन्ता रसभागेन भाजयेत् ३५
एकांशां गुळमित्युक्तं तत्तारञ्चग्रपातवत्

कुंभोच्चन्तु युगांशेन द्विदण्डं तस्य विस्तरम् ३६
वृत्तमेकेन कर्तव्यं उत्तारमग्रपातवत्
तस्योर्ध्वेचैव पादेन द्विदण्डं नवधाभवेत् ३७
पद्मं कुर्यात्द्विभागेन व्योमांशं फलकं भवेत्
फलकस्य तु विस्तारं दण्डत्रयमिति स्मृतम् ३८
वीरकाण्डं गुणांशेन उत्तारं चाग्रवद्भवेत्
पोतिकायां गुणांशेन तत्तारं पञ्चदण्डकम् ३९
उत्तमं तारमेवस्याद्यु-दण्डन्तु मद्धयमम्
त्रिदण्डमधमं प्रोक्तं पोतिकायाः प्रकीर्तितम् ४०
उत्सेधं पोतिकायान्तु एकदण्डमिति स्मृतम्
पोतिकाबन्धनिर्यूहं दण्डं वा तत्त्रिपादकम् ४१
युगाश्रं वाथ वृत्तं वा वस्वश्रं वा कलाश्रकम्
चरणाकृतिरेवं स्यात् भित्तेः पादस्य निर्गमम् ४२
तस्य चैव तु भागैस्तु चतुरश्रस्य निर्गमम्
दण्डत्रिभागभागैकं वृत्तस्याष्टकलाग्रहा ४३
वृत्ताष्टाश्रकलाश्राणां वेद्यूर्ध्वे चांघ्रिमूलके
कर्णविस्तारमानेन चतुरश्रन्तु कारयेत् ४४
पादगर्भं समाख्यातं ततः प्रस्तरवर्गकम्
यल्लब्धोत्सेधमानन्तु भजेद्विंशतिभागकः ४५
उत्तरोच्चं गुणांशेन तदुच्चमष्टधा भजेत्
एकांशेनैव निर्यूहं पोतिकायास्तु बाह्यके ४६
एकेन वाजनोच्चन्तु तत्समं नीव्रमुच्यते
वसन्तकोच्चं त्र्यंशेन तस्योर्ध्वं नीव्रमुच्यते ४७
तस्योर्ध्वपट्टिकांशेन युगभागैकनीव्रकम्
अब्ध्यंशन्तु कपोतोच्चं दंडार्द्धं लंबमानकम् ४८
तन्नीव्रन्तु त्रिदंडं स्यात् मार्जनन्तस्य नीव्रकम्

कपोतेनासिकायुक्तं कर्णे वल्लिसमायुतम् ४९
नासितारं द्विदंडं वा सार्द्धद्विदंडमेव वा
उत्सेधं तत्समं ज्ञेयं तद्भूतांशगुणांशकम् ५०
तन्मद्ध्यमेव गाढन्तु तत् गुहादंडमानतः
वाजिनोर्ध्वसमं प्रोक्तं नासिकायाश्शिरस्तथा ५१
एकांशेनोर्ध्वपट्टिन्तु पादसूत्रसमं कुरु
एकेनान्तरितं कुर्यात् तत्तारमग्रपादवत् ५२
अग्रपादार्द्धमानेन तन्नीव्रं परिकीर्तितम्
प्रतिमुखोच्च द्विभागेन तत्तुल्यं कर्णनिर्गमम् ५३
प्रतिवाजनमेकांशं स्थाणुसूत्रसमन्तु तत्
सिंहव्याळगजैः पुष्पैः कुर्यादन्तरितं तथा ५४
एवं प्रस्तरवर्गन्तु ग्रीववर्गमतः परम्
तस्योर्ध्वे वेदिकायाममद्ध्यर्द्धं दंडमुच्यते ५५
वेशनं वेदिकायान्तु द्विदंडञ्चेति कीर्तितम्
वेदिकोत्सेधमानन्तु सप्तभागेन भाजयेत् ५६
कर्णोत्सेधगुणांशेन एकांशेनैव पट्टिका
तस्योर्ध्वनिर्गमन्तस्याः पद्मांशं वेदिकोच्छ्रयम् ५७
तन्नीव्रन्तु तदर्द्धं स्यादेकांशेनोर्ध्वपट्टिका
अधः पट्टिसमञ्चैव तत्पट्टीं कुरु बुद्धिमान् ५८
वेदिविस्तारबाणांशं वेदांशं कर्णविस्तरम्
चतुर्दिक्षु विशेषेण नासिकांघ्रिं प्रकल्पयेत् ५९
वेदितारसांशैकं मद्ध्यांशैकमथापि वा
ग्रीवामूलात्मनिर्यूहं नासिकास्थूणकस्य तत् ६०
तन्निर्यूहसमं वापि युगदण्डमथापि वा
अर्द्धेन वेददंडं वा उभयोः पादमद्ध्यमम् ६१
त्रिदंडं वा चतुर्दंडं गुहावेशं प्रकीर्तितम्

तत्पादस्य समायामं हंसमालावसानकम् ६२
दंडत्रिभागपद्मांशं तत्स्तंभस्य तु तारकम्
शेषं तु पूर्ववत्कुर्यादुत्तरं वाजनं तथा ६३
ग्रीवाग्रे वार्द्धदंडेन उत्तरन्तु प्रकल्पयेत्
तत्समन्तु गळान्नीव्रं तत्र भागैकवाजनम् ६४
तत्समन्तस्य नीव्रन्तु हंसमालार्द्धदंडकम्
तस्यार्द्धं तस्य नीव्रन्तु पट्टिवाजनवद्भवेत् ६५
चतुर्भागन्तु भागैकं नीव्रं तस्य प्रकीर्तितम्
ग्रीववर्गसमाख्यातमूर्ध्वे शिखरवर्गकम् ६६
शिखरस्य तु विस्तारं वेद्यास्तारसमं भवेत्
वेद्यास्तारं त्रिभागैकं महानास्या तु विस्तरम् ६७
विस्तारस्य त्रिभागन्तु उत्सेधं तस्य कीर्तितम्
तस्याः परिधिविस्तारं ध्रुवपादसमं भवेत् ६८
शेषं स्यादवभागन्तु गुहावेशं द्विदंडकम्
विस्तारार्द्धं शिरोमानं किन्नरीवक्त्रवत्कुरु ६९
नानावल्लीसमायुक्तं सिंहव्याळमृगैर्युतम्
भूतरूपैस्समायुक्तं परिधिः कारयेत्ततः ७०
शिखरं कारयेद्धीमान् घण्टायामा कृतिस्तथा
वेद्यास्तारस्य पञ्चांशं गुणांशं बलिविस्तरम् ७१
बलितारस्य बाणांशं गुणांशं पद्मविस्तरम्
पद्मतारगुणांशैकं कुंभतारमिति स्मृतम् ७२
कुंभतारशरांशैकं कंधरस्य तु तारकम्
कुंभतारं त्रिभागैकं पाल्यतारस्य विस्तरम् ७३
पालितारत्रिभागैकं कर्णतारमिति स्मृतम्
मुकुळस्य तु विस्तारं कर्णतारसमं भवेत् ७४
शिखरोदिततुंगेषु रसांशं वज्रतुंगकम्

स्थूपिकोत्सेधमानन्तु द्वात्रिंशत् भागतो भजेत् ७५
पद्मोत्सेधन्नवांशन्तु द्विभागं गळमुच्यते
व्योमांशेनोर्ध्वपद्मन्तु अर्द्धांशेन घटं भवेत् ७६
अधः पद्मन्तु भागेन अर्द्धांशेनोर्ध्वकंपकम्
गळान्ते च द्विभागन्तु अर्द्धांशेनैव पट्टिका ७७
अर्द्धांशेनोर्ध्वपद्मन्तु फलकैकेन कारयेत्
अर्द्धभागमधः पद्मं मुकुळोच्चं शरांशकम् ७८
स्थूपिरेवं समाख्यातं द्वारलक्षणमुच्यते
व्रतेरुत्तरसीमान्तं द्वारोत्सेधमिति स्मृतम् ७९
विस्तारन्तु तदर्द्धं स्यात् सर्वेषु भवनेषु च
द्वारलक्षणमाख्यातमलंकारमथ श्रुणु ८०
कपोतनाळिका चाष्ट मंटपे तु तथैव च
पार्श्वयोश्चैव पृष्ठे तु तोरणाद्यंघ्रिवर्गके ८१
त्रिदंडं वा चतुर्दंडं सार्द्धत्रिदंडमेव वा
तोरणस्य तु विस्तारं पादयोरन्तरं स्मृतम् ८२
पादायामाष्टभागस्य पञ्चांशं पादमैर्घ्यकम्
त्रिभागेन ऋषांशन्तु वल्लीचित्रन्तु चित्रितम् ८३
पादन्तु पूर्ववत्कुर्यादुत्तरं वाजनं तथा
अन्तराळसमायुक्तं कारयेत्सममण्टपम् ८४
हर्म्यस्य पङ्क्तिमानेन अन्तराळस्य विस्तरम्
एकहस्तं द्विहस्तं वा अन्तराळस्य तारकम् ८५
द्विदण्डं वाथ दण्डं वा चान्तराळस्य वेशनम्
त्रिपादमण्टपस्यैव अर्द्धमण्टपकस्य तु ८६
दण्डं वाप्यर्द्धदंडं वा द्विदंडं वा द्विपार्श्वयोः
सार्द्धदंडद्वयं वाथ त्रिदंडं वा विशेषतः ८७
वेशनं पादबाह्यन्तु कारयेत्तु विचक्षणः

प्रस्तरोपरि कोणेषु भूतं वा वृषभं कुरु ८८
भूतञ्चेदासनं कुर्यात् कृतांजलिपुटान्वितम्
वृषभं शयनं कुर्यात् सर्वलक्षणसंयुतम् ८९
कुमारं पूर्वदिक् भागे दक्षिणामूर्तिकं यमे
वारुणे तु नृसिह्मं वा केशवं वापि कारयेत् ९०
ब्रह्माणमुत्तरे देशे स्कन्धरे तु विशेषतः
पश्चिमद्वारहर्म्ये तु स्कन्दं पश्चिमके कुरु ९१
केशवं पूर्वभागे तु कल्पयेत् कल्पवित्तमः
एतत् लक्षणसंयुक्तं श्रीकान्तभवनं स्मृतम् ९२
देवालंकारमेवोक्तं विस्तारं पञ्चधा भवेत्
त्रिभागं तस्य मद्धये तु अद्धयर्द्धं दंडनिर्गमम् ९३
वसुनासिकयायुक्तं कपोतन्तु प्रकल्पयेत्
मंटपे नासिकां कुर्यात् पादं प्रत्यंघ्रिकोपरि ९४
शिखरे नासिकां कुर्याच्चतसृषु विदिक्षु च
एभिस्तु लक्षणैर्युक्तं कैलासं कान्तकं स्मृतम् ९५
देवालंकारसंयुक्तं कर्णकूटञ्चतस्त्रकम्
कोणं प्रतिविशेषेण कारयेद्वृषभद्वयम् ९६
प्रत्यूर्ध्वं ग्रीववर्गान्तं मानन्तुरसधा भजेत्
एकेनैव तु भागेन वेदिकां कारयेत्ततः ९७
अद्धयर्द्धांशगळोत्सेधं शिखरं सार्द्धद्वयंशकम्
शेषं स्थूपिरिति ख्यातं षट्भागेन विभाजयेत् ९८
वेद्यास्तारं चतुर्दंडं तत्तारं पञ्चधा भवेत्
ग्रीवस्यैव तु विस्तारं वेदांशमिति कीर्तितम् ९९
वेद्यां चैव च संप्रोक्तं शिखरस्य तु विस्तरम्
कर्णकूटमिति प्रोक्तमेतत्स्यात्स्थूपिशालकम् १००
मन्दिरस्य तु विस्तारं षट्भागेन तु भाजयेत्

पद्मांशं मद्धयमे चैव कोणेष्वेकांशमेव तु १०१
अद्धयर्द्धदंडमानेन बाह्ये चैव तु निर्गमम्
कारयेत्कर्णकूटानि प्रस्तरोपरि पूर्ववत् १०२
चतुर्विंशन्नासिकाभिः कपोतं कारयेत्ततः
शिखरोपेतकाष्ठानि चतुर्दिक्षु प्रकल्पयेत् १०३
यदुच्चन्तु महानास्यः कोष्ठस्योत्सेधमुच्यते
महानास्याच्च निर्यूहं शमनिर्यूहमुच्यते १०४
शालायाश्चैव विस्तारं कूटस्य द्विगुणं भवेत्
शालायामं त्रिधा कृत्वा द्विभागं शिखरं भवेत् १०५
शेषं स्थूपिरिति ख्यातं कुद्मिनासिविचित्रितम्
पार्श्वयोः पृष्ठदेशे तु तोरणानि प्रकल्पयेत् १०६
सर्वतो मुखमेवं स्यात्सर्वदेवार्हकं भवेत्
देवालंकारसंयुक्तं कोष्ठकूटस्य मद्धयमम् १०७
कपोते चाष्टभिश्चैव नासिकापंजरैर्युतम्
महानासिश्च कर्तव्यमूर्ध्वशालाञ्च वर्जयेत् १०८
अनुनासि चतुर्भिश्च नन्द्यावर्तमिति स्मृतम्
देवालंकारसंयुक्तं पंजरैरष्टभिर्युतम् १०९
भौमाद्युत्तरकान्तन्तु अष्टभागैर्विभाजयेत्
मसूकरमथांशेन पद्मांशंपाददैर्घ्यकम् ११०
त्रिपादं प्रस्तरं प्रोक्तं अर्द्धांशं वेदिकोच्छ्रयम्
कन्धरन्तु त्रिभागेन शालाकारं द्विभागिकम् १११
एकांशं स्थूपिकोत्सेधं स्थूपित्रयसमायुतम्
कुद्मिनासिसमायुक्तं प्रासादं सप्तधा भजेत् ११२
पंजरस्य तु विस्तारं एकभागं प्रकीर्तितम्
पूर्ववत्तु मसूरादीन् वृत्तपादं प्रकल्पयेत् ११३
एतत्पञ्चालमित्युक्तं देवालंकारसंयुतम्

अधिष्ठानस्य मद्धयन्तु अन्नयाधिष्ठानकं कुरु ११४
चरणस्य तु वर्गे तु नानापदयुतं कुरु
विष्णुकान्तमिति प्रोक्तं सर्वदेवेषु योग्यकम् ११५
नागरद्राविडञ्चैव वेसरञ्च त्रिधा भवेत्
भौमादिस्थूपिपर्यन्तं युगाश्रं नागरं भवेत् ११६
वेदिप्रभृति चाष्टाश्रं द्राविडञ्चेति कीर्तितम्
कर्णप्रभृतिवृत्तं यद्वेसरं परिकल्पयेत् ११७

इति कारणे प्रतिष्ठातन्त्रे प्रासादलक्षणविधिपटलस्सप्तमः

प्राकारलक्षणविधिपटलप्रारंभः

अथातः संप्रवक्ष्यामि प्राकाराणान्तु लक्षणम्
अन्तर्मंटपमाद्यं स्यादन्तर्द्वारं द्वितीयकम् १
मध्यहारं तृतीयन्तु पश्चान्मर्यादिभित्तिकम्
महामर्यादिभित्तिस्तु पञ्चमः परिकीर्तितः २
प्रासादस्य तु विस्तारं यत्तद्दंडमिहोच्यते
अर्द्धदण्डप्रमाणेन अन्तर्मण्टपकं कुरु ३
अन्तर्हारन्तु दंडेन मद्धयहारं द्विदण्डतः
मर्यादिभित्तिकं कुर्याच्चतुर्दण्डेन बुद्धिमान् ४
महामर्यादिभित्तिञ्च सप्तदण्डेन कल्पयेत्
दण्डमानमिति प्रोक्तं हस्तमानं ततश्शृणु ५
चतुर्हस्तप्रविस्तारमन्तर्मंटपमादिशेत्
अन्तर्हाराष्टहस्तेन भवेत् द्वादशहस्तके ६
मद्धयहारन्तु कर्तव्यं ततष्षोडशभिः करैः
मर्यादिभित्तिकं कुर्यात् विंशद्धस्तविशालकम् ७
महामर्यादिभित्तिस्स्यात्प्राकारं पञ्चधा विदुः
समन्तादेवमावृत्य तद्बहिर्वदनात्पदम् ८

प्रासादाग्रे विशेषेण वक्त्रायामं प्रकल्पयेत्
पादं वार्द्धत्रिपादं वा अधिकं द्विगुणन्तु वा ९
द्विगुणादधिकार्द्धन्तु त्रिगुणं वा चतुर्गुणम्
मुखायाममिति ख्यातमुपानात्तस्य निर्गमम् १०
उत्तमं त्वितिविख्यातं कुमुदं मद्धयमं स्मृतम्
पात् बाह्ये निर्गमश्चैव कन्नयसं परिकीर्तितम् ११
उपानकुमुदस्तंभबाह्यदंडत्रयं स्मृतम्
तत्तल्लोकस्य कार्याणि तत्तद्दंडेन कल्पयेत् १२
मानसूत्रस्य बाह्ये तु भित्तिरभ्यन्तरेऽपि वा
मानसूत्रन्तु यद्भित्तिर्मद्धयमं वापि कारयेत् १३
महामर्यादिभित्तेस्तु तारं षट्त्रिंशदंगुलम्
अग्न्यंगुलद्वयेशैव गायत्रीयांगुलान्तकम् १४
प्राकारभित्तिविस्तारं चतुर्णां परिकीर्तितम्
पद्मपादसमोत्तुंगं प्रस्तारन्तु समन्तु वा १५
चतुष्करं त्रिहस्तोच्चं द्विहस्तोत्तुंगमेव च
द्विहस्तश्च द्विहस्तार्द्धं त्रिहस्तश्च त्रिहस्तकम् १६
प्रोक्तं महावृतं हर्म्यं विस्तारन्तु चतुर्विधम्
पञ्चप्राकारयुक्तं वा त्रिप्राकारयुतन्तु वा १७
एकप्राकारसंयुक्तं कल्पयेत्कल्पवित्तमः
मर्यादिभित्तिकर्णोक्त्या अन्तर्मंटपकं तथा १८
शेषप्राकारकैर्युक्तं त्रिःप्राकारमिति स्मृतम्
अथ चैवं प्रकारेण त्रिप्राकारमिहोच्यते १९
अन्तर्मंडलकं चैव मर्यादिर्मद्धयहारकम्
त्यक्त्वैवान्यच्च शेषन्तु त्रिप्राकारमिति स्मृतम् २०
एकप्राकारकश्चेत्तु अन्तर्द्वारयुतं कुरु
भित्यूर्ध्वे सुदृढं कुर्याच्छत्राकारं शिरस्तथा २१

अथवा बद्धहर्म्ये तु कूटशालायुतन्तु वा
प्राकारे तु द्वितीये वा मौळिका कृतिरेव वा २२
सभाकृतिर्वा कर्तव्या त्रितलं वा द्विभूमिकम्
कारयेत्तु विशेषेण प्राकारं प्रतिगो पुरम् २३
शरादिनवहस्तं वा एकादशकरन्तु वा
त्रयोदशकरं वापि गोपुराणान्तु विस्तरम् २४
पादादिकमथाद्धचर्द्धं पादोन द्विगुणायतम्
प्राकारशिखरान्तं वा स्थूप्यन्तं वा समुच्छ्रयम् २५
हर्म्यगोपुरकंयापि शालाकृतिरथापि वा
मौळिकाकृतिकंवापी कुर्यादेव तु गोपुरम् २६
गोपुरद्वारतुंगं स्यादुपानादुत्तरान्तकम्
द्वारस्यैव चतुर्दिक्षु प्राकारेषु प्रकल्पयेत् २७
प्राकारे तु द्वितीये वा तृतीये पावके दिशि
पवनालयं तु कर्तव्यं चतुश्शालासमन्वितम् २८
द्वितीय्य प्राकारैशान्ये कूपस्थानं प्रकीर्तितम्
शक्रशांकरयोर्मद्धचे वार्यस्थानं प्रकीर्तितम् २९
आग्नेयशक्रयोर्मद्धचे धनस्थानमुदाहृतम्
याम्यपावकयोर्मद्धचे पुष्पमंटपमुच्यते ३०
कुर्यात्स्नानांबुजालन्तु याम्यनैर्ऋतिमद्धचमे
वारुणे नैर्ऋतेर्मद्धचे धर्मश्रवणमंटपम् ३१
वारुणानिलयोर्मद्धचे कुर्यादायुधमंटपम्
वायव्य सोमयोर्मद्धचे शयनस्थानमुच्यते ३२
ईशानसोमयोर्मद्धचे यागमंटपमुच्यते
सौम्ये तु मध्यहारायां कुर्यादास्थानमंटपम् ३३
अधुनादेशिकादीनामावासन्तु विधीयते
बाह्यप्राकारबाह्ये च द्विदण्डं वार्द्धमेव वा ३४

व्यपोह्यसौम्यके देशे देशिका वा समुच्यते
कर्तव्यं मौळिकाकारं चतुश्शालाग्रकन्तु वा ३५
पश्चिमे परिचाराणामावासं परिकीर्तितम्
भिषजान्तु गृहं याम्ये दैवज्ञानां तथैव हि ३६
अंबष्ठानां तु तत्रैव वाद्यकानामथैंद्रके
शैवानाञ्चैव सर्वेषां प्राच्यामावासमुच्यते ३७
महाप्रतीनां वह्नौ तु याम्ये पाशुपतालयम्
निर्ऋतौ काळमुखानान्तु बौद्धानां वारुणे तथा ३८
वायव्ये चार्हतानान्तु सौम्ये भूसुरसत्रकम्
ज्ञानाभ्यासाय शालान्तु ऐशान्ये संप्रकल्पयेत् ३९
इंद्र आग्नेययोर्मद्ध्ये कार्यं खातजलाशयम्
याम्यपावकयोर्मद्ध्ये जलदानप्रपां कुरु ४०
याम्यनैर्ऋतयोर्मद्ध्ये गोशालां संप्रकल्पयेत्
निर्ऋतिवारुणयोर्मद्ध्ये कर्तव्यं सूतिकागृहम् ४१
वारुणानिलयोर्मद्ध्ये रोगार्तानां निवेशनम्
कुर्यादद्धरशिद्धार्त्थं कुबेरानिलमद्ध्यमे ४२
उत्तरेशानयोर्मद्ध्ये धान्यस्थानमुदाहृतम्
ईशानशक्रयोर्मद्ध्ये वेदाद्ध्ययनमंटपम् ४३
तत्बाह्ये कल्पयेद्विद्वान् स्त्रीणां रागोपजीविनाम्
क्रयविक्रयकानाञ्च पुष्पतैलोपजीविनाम् ४४
कुलालतन्तुवायानां मत्स्यमांसोपजीविनाम्
नापितश्मश्रुकाराणां गोपालानान्तु कारुभिः ४५
रद्धकाणामथावासमापणस्थानमेव च
बाह्ये त्वैशान्यदेशे तु श्मशानस्थानमुच्यते ४६
बाह्योत्तरे तु कर्तव्यं तद्धकादिनिवासनम्
आवासं तत्बहिः कुर्यात् रजकानां तथैव च ४७

चण्डाळानां कुटीराणि तद्बाह्ये तु प्रकल्पयेत्
एवं स्वतः प्रधानस्य कल्पयेद्देशिकोत्तमः ४८
वास्त्वंगं कल्पयेद्धीमान् ग्रामे पैशाचिके पदे
ग्रामतारशरांशैकं ग्रामबाह्ये विनिक्षिपेत् ४९
तत्पैशाचमिति ज्ञेयं ग्रामं पैशाचसंयुतम्
शतं चतुश्चत्वारिंशदधिकं कारयेत् पदम् ५०
कर्णसूत्रं ततः कृत्वा ऐशद्वयांशकेऽपि च
इंद्र ईशानयोर्मद्धये सोमशांकरमद्धयमे ५१
यथेष्टं कारयेद्धीमान् प्रासादतोरणस्य तु
तत्स्थाने स्थापयेल्लिंगं वास्त्वंगं विधिना तथा ५२
अन्यथा पुरदुर्गादौ शिवस्थानमिहोच्यते
अष्टासु दिक्षु मद्धये च शिवस्थानं प्रकल्पयेत् ५३
पूर्वपश्चिमदिक् द्वारं पुरप्रवरपूर्वकम्
ग्रामे च सर्वदिक्त्वे च पैशाचात् बहिरिष्यते ५४
महेशं कारयेंभोधिं सद्योवास्तु समीष्यते
तत्सभ्रमाद्विमर्यादि कुदृष्टिरहितश्शिवः ५५
वास्त्वंगस्थापनाच्चापि स्वप्रधाने शिवस्थितः
तत्फलं कोटिगुणितं साधयेत् विधिना ततः ५६
ग्रामन्यासोक्तमार्गेण सर्वेषान्तु निवासनं ५७

इति कारणागमे प्रतिष्ठातन्त्रे
प्राकारलक्षणविधिपटलोष्टमः

लिंगलक्षणविधिपटलप्रारंभः

अतः परं प्रवक्ष्यामि लिंगलक्षणमुत्तमम्
स्थावरं जंगमञ्चैव द्विविधं लिंगमुच्यते १
शैलजं रत्नलोहैश्च मृन्मयेनैव कारयेत्

शिलामयन्तु यद्रूपं ब्रजविष्णुहरैर्युतम् २
त्रिसूत्रं मुकुळैर्युक्तं स्थावरं लिंगमुच्यते
शेषाण्यन्यानि सर्वाणि जंगमं लिंगमुच्यते ३
स्थावरं जंगमाच्छ्रेष्ठं स्थावरं त्वधुनोच्यते
सुमुहूर्ते सुनक्षत्रे शिलाग्रहणमारभेत् ४
मधुमाधवशुक्लेषु नभस्यकतपस्ययोः
तपस्यन्तेषु मासेषु शुक्लपक्षे शुभे दिने ५
ब्रन्येषु सर्वमासेषु शिलारंभं न कारयेत्
कृतञ्चेत् कर्तृनाशस्स्यात् स्थाननाशं धनक्षयम् ६
प्राजापत्येमखेत्वाष्ट्रे वैष्णवे मृगशीर्षके
सावित्रे चैव रेवत्यां ब्रनिले चोत्तरेषु च ७
मैत्रभेषु शुभेष्वेव शिलाग्रहणमारभेत्
ब्रादिशैवकुले जातः पञ्चगोचरसंस्थितः ८
मन्त्रागमज्ञश्शास्त्रज्ञस्सर्वलक्षणसंयुतः
दिव्यन्तरिक्षभौमानि निमित्तान्युपलक्षयेत् ९
देवाग्निगुरुभक्तश्च देशिकस्समुदाहृतः
सुलेखासु गुणो धीमांश्छास्त्रज्ञः कर्मयोग्यकः १०
वास्तुविद्याकृताभ्यासः शल्योद्धारविशारदः
मानानि रसमानज्ञः शिलादोषपरीक्षकः ११
सर्वलक्षणसंयुक्तः स्थपतिस्स उदाहृतः
शिवं संपूज्य विधिवत् ज्ञापयेद्देशिकोत्तमः १२
सितवस्त्रपरीधानौ गंधमाल्यैरलंकृतौ
प्राच्यां वै चोत्तरायां वा गच्छेतां गुरुशिल्पिनौ १३
सर्वातोद्यसमायुक्तं नृत्तगेयसमाकुलम्
नानाभक्तजनैस्सार्द्धं ततो मंगलवाचकैः १४
शुभाशुभनिमित्तानि तस्मिन्काले परीक्षयेत्

वृषभं पूर्णकुंभञ्च शंखं मांसं गजं ध्वजम् १५
कन्याञ्च पद्मपुष्पञ्च दीपगोभेरिकादिभिः
सितपुष्पं द्वितीशञ्च वेश्याञ्च छत्रपल्लवौ १६
ब्राह्मणं शुभवाक्यञ्च दीप्ताग्निं तुरभं फलम्
शुभान्येतानि सर्वाणि गन्तव्यपथिदर्शने १७
काकस्य रोदनञ्चैव शिवारावद्युतं तथा
शुभप्रदानि वामे तु सर्वसिद्धिकराणि च १८
कुररश्चशशश्चैव डुंडुभश्चवराहकः
श्येनश्च कौशिकश्चैव दक्षिणा द्वामगाश्शुभाः १९
जरांगीरक्तनेत्री च जंबुकोनकुलः खरः
शुभान्येतानि सर्वाणि वामाद्दक्षिणगानि वै २०
ऋमंगली प्रेतरूपः पतितः द्युत्प्रपीडितः
विकर्णकेशो मुण्डश्च शाक्योदिग्वस्त्रकस्तथा २१
एतानि चाशुभान्येव सर्वदोषकराणि च
भौमान्येतानि चोक्तानि चान्तरिक्षमथोच्यते २२
निपातं च फलं पुष्पं शब्दो वा यदि जायते
ऋन्तरिक्षाणि चैतानि दिव्यानि तु वदाम्यहम् २३
विद्युत्स्तनितघोषैश्च सादित्यं वृष्टिपातनम्
शुभान्येतानि विज्ञेयान्यशुभानि निबोधमे २४
उल्कापातदिशोदाहं महावातप्रवर्तनम्
परिवेषमसृक्पातस्तारापातेंद्रचापकौ २५
सुनिमित्तं भवेद्गच्छेदुर्निमित्तमधोस्थितः
हिमवान् हेमकूटश्च निषधो नील एव च २६
ऋक्षश्च माल्यवांश्चैव श्रीशैलश्च तथैव च
गंधमादनशैलश्च मेरुस्तु नवमः स्मृतः २७
एते पर्वतराजानो महाशैलाः प्रकीर्तिताः

महेंद्रोमलयश्चैव सह्योविंध्यस्तथैव च २८
अंबुदोभ्युदयश्चैव पारियात्रस्तथैव च
श्रीपर्वतश्च विख्यातो देवपर्वत एव च २९
एतेषां चैव सामीप्यं वनेषूपवनेषु च
भूमिश्चतुर्विधाज्ञेया शुभदा चाशुभंकरी ३०
यत्र गुल्मयुता स्निग्धा फलपुष्पसमन्विता
तत्र गृह्णीत यत्नेन शिलायां वारुणी स्मृता ३१
तयायत् त्रियते लिंगं तत्सर्वार्त्थप्रसाधनम्
यस्मात्तु सौम्यकेतोयं व्रीहिक्षेत्रन्तु दक्षिणे ३२
फलिनः क्षीरवृक्षा वा पूर्वे वा पश्चिमेऽपि वा
तत्रस्थायाशिलारम्या माहेंद्री साशिला स्मृता ३३
धनधान्यविवृद्ध्यर्त्थं लिंगं स्यात्तु प्रजापतेः
पलाशखदिरानिंबा काश्मर्याशक्रसंयुता ३४
तित्तिरा च कपोता च गृध्राश्चैव शवायनाः
मयूरभ्रमराकीर्णा स्वल्पतोयसमन्विताः ३५
अनिलासाविजानीयात् शिला तत्रानिलास्मृता
सदाशुभा बुधैर्ग्राह्या आभिचारायकल्पिता ३६
पीलुश्लेष्मातकाकीर्णा खादिरस्नुहि संकुला
विभीतकाकबहुला कलिनाशर्करान्विता ३७
तृणोदकविहीना तु तरक्षुकुलसेविता
जंबुका यत्र दृश्यन्ते तथैव मृगतृष्णया ३८
तत्र स्थायाशिलासा तु आग्नेयीति प्रकीर्तिता
तयालिंगं नकुर्वीत पंडितश्शुभकर्मणि ३९
विपरीते तु कर्तव्या शत्रुनाशाय नान्यधा
एवं परीक्ष्यभूमिन्तु शिलां गृह्णीत देशिकः ४०
सरित्सलिलनिर्धूतां पवित्रान्तर्जलेस्थिताम्

द्रुमच्छायोपगूढाञ्च तीर्त्थाश्रमनिषेविताम् ४१
आयामपरिणाहाढ्यां सर्वदोषविवर्जिताम्
ग्राह्यञ्च दृश्यं ह्युपलं शेषादृश्यन्तु वर्जयेत् ४२
यदनेन च तद्दृश्यं गृहीते धननाशनम्
पुत्रनाशञ्च सौभाग्यपुष्टीकरमदृश्यकम् ४३
यस्मिन् देशे शिलांशे ते प्राङ्मुखस्थपतिस्थितः
प्रदक्षिणं ततः कृत्वा शिर आदीनि लक्षयेत् ४४
पूर्वपश्चिममायामं तथा वै दक्षिणोत्तरम्
पूर्वमग्रमिति प्रोक्तं पश्चिमं मूलमुच्यते ४५
दक्षिणं मूलमित्युक्तमुत्तरं चाग्रमुच्यते
शिरोभागमुखं ज्ञेयमधोभागो विशेषतः ४६
दृश्यभागन्तु पृष्ठं स्यात्पार्श्वे पार्श्व इति स्मृताः
निर्ऋत्यांशकमायामं नीलानिलगतन्तथा ४७
ऐशाग्नेयौ शिरः प्रोक्तौ पृष्ठगावितरौ स्मृतौ
लाञ्छयित्वा कथं तत्र ततस्तत्क्षणमाचरेत् ४८
आचार्यश्शिल्पिभिस्सार्द्धं शिलामुद्धारयेत्क्रमात्
कुन्देन्दुहेमधवळा शंखशुक्तिजातनिभा ४९
दधिसमासितवस्त्राभा विप्रशिला शेषशुक्लसमा
बालार्कपंकजाभारोहितबंधूकपुष्पसंकाशा ५०
भुजगेंद्रकोपसदृशाक्षत्रशिलाशेषरक्तसमा
कनकहरिद्रभासा हरितारनिभा सुकर्णिकारा ५१
चणकादिपीतवर्णा शुभशैलावैश्यजातसमा
नीलयुगराजवक्त्रांबरनीलनीरदराशिनिभा ५२
बहिर्गळांगाराभां यश्चेच्छिलां शूद्रजातीनाम्
मरतकशैलनिभा दूर्वाश्यामाभिवेणुकाभासा ५३
हरितश्चेतयुतायासा शिला च सर्वजातीनाम्

अनुलोमक्रमात् ग्राह्यं प्रतिलोमक्रमान्नहि ५४
स्त्रीपुन्नपुंसकाशैला बालावृद्धा च मद्धयमा
अष्टाश्रा चतुरश्रा वा स्त्रीशिला चेति निश्चिता ५५
वृत्तं नपुंसकं शैलं द्वादशं दशकोणकम्
आयताश्रञ्च पुल्लिंगं वृत्तायतन्तथैव च ५६
घरटा शब्दस्तु पुल्लिंगं स्वरहीनं नपुंसकम्
ताळशबदशिलाया तु साशिला युवती स्मृता ५७
दीर्घशब्दातुयावृत्ता ह्रस्वाबालेति कीर्तिता
एवं स्वरन्तु संलद्य प्रहरेच्छिल्पिवित्तमाः ५८
बालवृद्धशिलायास्तु वर्जयेत्तु प्रयत्नतः
सकळं निष्कळं बेरं पुंसां पुंशिलया विदुः ५९
योजास्त्रीशिलया सम्यक् नारीबेरञ्च पींडिका
नपुंसकोपलेनैव ब्रह्मकूर्मशिले स्मृते ६०
प्रासादशिलकुडयादौ नपुंसकशिलां नयेत्
पुल्लिंगैः कल्पितापिण्डी राजराष्ट्रभयंकरी ६१
युवत्याकलितं लिंगं सर्वप्राणिभयं करम्
नपुंसकेन लिंगं वा कृतञ्चेत् पिण्डिकाथवा ६२
दुर्भिद्मन्तु भवेत् भूमौ यजमानो विनश्यति
रेखाबिन्दुकळंकानि विमलं परिवर्जयेत् ६३
पृष्ठपादवदाकारा सूत्रपादवदायता
सूर्यरश्मिवदाकारा रेखा वै त्रिविधा स्मृता ६४
स्तनचूचुकसंकाशो जंबूफलसमप्रभः
बिन्दुरेवं समाख्यातः द्विविधेन प्रजापतेः ६५
बर्हिपिंछसमाकारं कृष्णामृगसमप्रभम्
कृष्णलोहवदाकारं कळंकं त्रिविधं भवेत् ६६
त्रासस्फटिकसंकाशं शुक्त्यभ्यन्तरसन्निभम्

त्रासोपि द्विविधो ज्ञेयो विमलं त्रिविधं भवेत् ६७
शातकुंभनिभश्चैव दरीकृतसमप्रभम्
कांस्याभं विमलं ज्ञेयं सर्वदोषकरं भवेत् ६८
वेरवंकुरवदाकारा लूतापातसमप्रभा
खर्जूरपत्रसदृशा दूर्वास्तंभकसन्निभा ६९
इक्षोरग्रसमाकारा गिरिका पञ्चधा स्मृता
कृष्णशैलसितारेखा साप्रशस्तेति कीर्तिता ७०
कृष्णकृत्स्नविनाशं स्यात् सितकृष्णासुगर्हिता
गिरिकाकृष्णशैले तु सितवर्णेन देशिकः ७१
खर्जूरपत्रसदृशा दूर्वास्तंभा कृतिश्शुभा
अन्याकृतिर्न गृह्णीयाद्धान्यगो नाशनाय च ७२
कळंकं रोगदं ज्ञेयं त्रासं राष्ट्रविनाशनम्
बिन्दुः पुत्रविनाशस्स्याद्विमलं दुःखदं भवेत् ७३
श्वेतशैलन्तु मोक्षार्थी रक्तशैलं जयप्रदम्
पीतवर्णं संपत्करं कृष्णं स्यात्सर्वकामदम् ७४
श्यामश्चैवाभिचारार्थं विधिलक्षणपूर्वकम्
बाह्यलक्षणमुद्दिष्टं श्रुणुष्वाभ्यन्तरं ततः ७५
चतुरश्रां शिलां सम्यक् फेदयेत्तु विचक्षणः
तक्षकश्छेदने चैव मंडलं यत्र दृश्यते ७६
सगर्भान्तान्यबीजानि रत्नेन तु परीक्षयेत्
मंजिष्ठवर्णे मंडूकं कर्कटो हरितालके ७७
पीते गोधासिते सर्पः खद्योतो मधुवर्णके
कपिले मूषिकं विद्यात्कृकलासमथारुणे ७८
गुळवर्णे तु पाषाणे कपोतौ ग्रहदौळिका
भस्माभेसिकतां विद्यात् स्फटिकाभे जलं स्मृतम् ७९
रक्तमण्डलके चित्रं चित्रवर्णे तु वृश्चिकम्

शफरं कृष्णचित्रे च किंशुकाभेंद्रकोपकम् ८०
एवं गर्भास्तु विज्ञेया बाह्यलक्षणलक्षिता
लक्षणन्नास्ति चेत् बाह्ये तेषां लोपानि लेपयेत् ८१
ब्रह्माणं वज्रपाणिञ्च शूलपाणिञ्च वैष्णवम्
अजाक्षीरेण संयोज्य उपलं लेपयेत्ततः ८२
लेपिते यदि क्लिन्नं स्यादेकरात्रोषितं तथा
सगर्भं तं विजानीयादभिगोधा च वृश्चिकम् ८३
कासीसंपीतलोध्रञ्च गोक्षीरेण तु पेषयेत्
लेपितेन शिलान्तेन रुधिराभं यदा भवेत् ८४
दिवसैस्तु दिशैश्चैव एकरात्रोषितोऽपि वा
दर्दूरस्तत्र विज्ञेयः कूर्मो वाथ न संशयः ८५
पृथ्वीं त्रिशूलिनं ब्रांह्यं महिषीक्षीरवेष्टितम्
लेपिते तु शिलान्तेन रुधिराभा यथा भवेत् ८६
कृष्णमीनो भवेत्तत्र कृकलासमथापि वा
मुस्तकं करवीरञ्च कुष्ठं मासिफलत्रयम् ८७
एतानि पेषयित्वा तु स्त्रीस्तन्नयेन तु पेषयेत्
अश्मानं लेपयेत्तेन यदि स्याच्चिलिशिलेनकैः ८८
काळकूटविषन्तत्र न तु हस्तेन संस्पृशेत्
गर्भाणां लक्षणं ह्येवं शिलाग्रहणमारभेत् ८९
शोधयित्वा भुवं पश्चात्तत्समीपप्रदेशकम्
पञ्चगव्येन संप्रोक्ष्य पवमानमुदीरयेत् ९०
गंधं पुष्पं तथा धूपं दीपं नैवेद्यमेव च
सद्यादिब्रह्मभिर्दत्वा शिलां वस्त्रेण वेष्टयेत् ९१
तस्यैव पूर्वभागे तु होमकर्मसमारभेत्
समिदाज्येन चरुणा प्रत्येकन्तु शताहुतिः ९२
हृदयेन समिद्धोमं सर्पिरीशानमन्त्रतः

अघोरेण चरुं हुत्वा प्रत्येकं व्याहृतिर्हुनेत् ९३
ततस्त्विष्टकृतं हुत्वा परिषेचान्तमाचरेत्
शिलां प्रदक्षिणं कृत्वा दिग्देवानां बलिन्ददेत् ९४
एकरात्रं वसेत्तत्र स्वप्नेमाणवकं जपेत्
ओन्नमश्शंभवे त्रिणेत्राय पिंगलाय महात्मने ९५
वामाय विश्वरूपाय स्वप्नाधिपतये नमः
आचक्ष्महे महादेव प्रसन्नोसितवान्तिकम् ९६
स्वप्नजातानि सर्वाणि हृदिस्थानि भवान्तु मे
ओं हिलिहिलि शूलपाणये स्वाहा ९७
दृष्टं स्वप्नं द्विजश्रेष्ठो ब्रांहणेभ्यो निवेदयेत्
दुस्वप्नञ्चेज्जपेद्धीमान् पाशुपतं सहस्त्रकम् ९८
वस्त्रांगुलीयकैश्चैव तोषयेत् गुरुशिल्पिनौ
शिलां सम्यक् गृहीत्वा तु लिंगं कुर्यात्तु बुद्धिमान् ९९
गर्भं विंशतिभागैश्च भजेद्दशाधमं भवेत्
रुद्रांशं मद्धयमं ज्ञेयं रव्यंशं चोत्तमं भवेत् १००
ज्येष्ठं कन्नयसयोर्मद्धये एतत् गर्भमिति स्मृतम्
विभजेदष्टधा गर्भं समं सूत्रविचक्षणः १०१
एवं कृते भवेद्यत्र न च लिंगानि सुव्रत
गर्भमानमिति प्रोक्तं हस्तमानमथ शृणु १०२
एकादि नवहस्तान्तं षडंगुलविवर्द्धनात्
आयामास्तु त्रयस्त्रिंशत् संख्यायाः परिकीर्तिताः १०३
एकहस्तप्रमाणन्तु हीनलिंगन्न कारयेत्
पञ्चहस्तं समारभ्य हर्म्यमानं विशेषतः १०४
हस्तमानेन लिंगन्तु कारयेद्देशिकोत्तमः
एवं लिंगोच्छ्रयं प्रोक्तं वक्ष्ये लिंगस्य विस्तरम् १०५
लिंगस्योत्सेधमानार्त्थं अष्टधा विभजेत्ततः

विष्कंभः पञ्चभागस्स्यादधस्ताच्चतुरश्रकम् १०६
अधस्ताच्चतुरश्रन्तु ब्रह्मभागं तदुच्यते
अष्टाश्रं मद्धयमं ज्ञेयं विष्णुभागं तदुच्यते १०७
ऊर्ध्वे सुवृत्तभागन्तु रुद्रांशमिति कीर्तितम्
नपुंसकन्तु ब्रंहांशो विष्णवंशस्त्रयविद्यते १०८
तत्पुमानूर्ध्वभागस्स्यादेवं संकल्पितं त्रिधा
अर्द्धं कर्णस्य कर्णाभ्यामष्टमष्टाश्रमांकितम् १०९
अथवान्यप्रकारेण वद्ये वस्वश्रकस्य तु
व्यासप्तांशदश त्र्यंशमद्धयपट्टमथापि वा ११०
अष्टाश्रन्तु भवेत्सिद्धं षोडशाश्रमतः परम्
द्विचतुर्भागमद्धये तु बिन्दुरेखादि कल्पितम् १११
अष्टाश्रस्यैकभागोर्ध्वं कोणात्तुलाञ्छयेत्ततः
षोडशाश्रं भवेत्सिद्धमश्रच्छेदेन वर्तुळम् ११२
यत्तु लिंगस्य चायामं नाहं तत्सममुच्यते
ज्येष्ठोत्तमन्तु लिंगस्य रुद्रभागस्य नाहकम् ११३
नाहार्द्धमष्टधा कृत्वा विष्कंभं भूतभागिकम्
ज्येष्ठोत्तमस्य लिंगस्य विस्तारं हि विधीयते ११४
यत्तारं पञ्चभागैकं विभजेद्वसुभागिकम्
विस्तारमष्टलिंगानां एकैकन्तु विहीनकम् ११५
त्रिगुणीकृत्य विष्कंभं भजेत्तारन्तु पञ्चधा
भागन्तेन समायोज्य सर्वेषां नाहमुच्यते ११६
समखण्डं वर्द्धमानं शैवाधिक्यं त्रिराशिकम्
लिंगं चतुर्विधं प्रोक्तं द्विजातीनामनुक्रमात् ११७
वर्द्धमानं शिवाधिक्ये सर्वजात्यर्हके स्मृता
चतुः पञ्चषडंगन्तु पञ्चषट्सप्तभागिकम् ११८
वर्द्धमानमिति प्रोक्तं विप्रादीनामनुक्रमात्

सप्तसप्ताष्टभागन्तु पञ्चपञ्चषडंगकम् ११९
वेदवेदशरांशन्तु गुणानलयुगांशकम्
एवं शिवाधिकं प्रोक्तं द्विजातीनां क्रमात्गृहे १२०
किञ्चिदस्मिन् विशेषोस्ति समखंडस्य तं श्रुणु
लिंगस्योत्सेधमानन्तु चतुर्भागेन भाजयेत् १२१
आयामार्द्धं भजेदष्टविष्कंभन्तु शरांशकम्
पद्मतारं भवेद्विष्णुस्तस्मात्तद्विगुणो हरः १२२
अग्रे मूले च मद्धये च प्रमाणं सर्वतस्समम्
आयामन्नवधाकृत्वा वृत्तं षट्भागमुच्यते १२३
सप्तभागमथाष्टाश्रं तुर्यश्रं वसुभागिकम्
त्रैराशिकमिति ज्ञेयं धनधान्य सुखावहम् १२४
धारालिंगमथो वद्ध्ये श्रूयतान्तु प्रजापतेः
पादादूर्ध्वकपर्यन्तं धारालिंगं प्रशस्तकम् १२५
अधोवेदाश्रकं कुर्यात्तदूर्ध्वे त्वष्टधारया
एतत् द्विजमहाप्राज्ञ सर्वकामप्रसाधनम् १२६
ऊर्ध्वे षोडशधाराच्च भोगार्थी लभते सुखम्
एवं क्रमेण संयुक्तं धारालिंगमिति स्मृतम् १२७
शिरसो वर्तनं कुर्यात् तच्चतुर्विधमुच्यते
छत्राकारन्तु विप्राणां नृपाणां कुक्कुटाण्डकम् १२८
वैश्यानाञ्चैव खण्डेन्दु शूद्राणां तृपुषाकृतिः
कृत्वा लिंगं शिरस्तारं षट्भागेन समं बुधः १२९
सार्द्धेनैव द्विभागेन चित्रितं तृपुषाकृतिं
विस्तारन्तु त्रिधाकृत्वा त्रिभागेन तु वर्तितुम् १३०
अर्द्धचंद्र इति प्रोक्तं सर्वकामफलप्रदम्
कुक्कुटाण्डं भवेत्तत्र विस्तारार्द्धेन वर्तनम् १३१
अष्टधाविभजेत्तारमद्धयर्द्धेन तु वर्तितम्

चंद्रशीर्षकमित्युक्तं सर्ववर्णेषु योग्यकम् १३२
मानहीने महाव्याधिरधिके शत्रुवर्द्धनम्
नाहहीने तु दारिद्र्यं शिरोहीने धनक्षयम् १३३
मूलहीने विनाशं स्यात्सूत्रहीने कुलक्षयम्
तस्मात्सर्वप्रयत्नेन कारयेल्लक्षणान्वितम् १३४
मुखलिंगं ततो वक्ष्ये सर्वकामार्त्थसाधनम्
पूजाभागं समस्तन्तु द्विषष्टयंशं भजेत्क्रमात् १३५
त्रयोदशांगुलार्द्धन्तु मुखमेकं प्रकीर्तितम्
शराननञ्चतुर्वक्त्रं त्रिवक्त्रं चैकवक्त्रकम् १३६
चतुर्दिक्षु चतुर्वक्त्रं त्रिवक्त्रं पृष्ठहीनकम्
कुर्वेकवक्त्रमूर्ध्वे तु मुखमानेन बुद्धिमान् १३७
मकुटेनोर्ध्ववक्त्रन्तु त्रयोदशार्द्धांगुलेन तु
ग्रीवामूलात्स्तनान्तं स्यादर्द्धाधिकं त्रयोदश १३८
स्तनसूत्रविधिर्यावत्कारयेत् द्विभुजान्वितम्
प्रतिमालक्षणोक्तेन मार्गेणैव समाचरेत् १३९
शेषं लिंगवदाकारं कारयेल्लक्षणान्वितम्
वक्त्रलिंगप्रमाणन्तु प्रोक्तं पीठमथ श्रुणु १४०
स्त्रीशिलां तु परिग्राह्य पीठं कुर्याद्विशेषतः
लिंगविस्तारमानेन त्रिगुणं पीठविस्तृतम् १४१
कर्णा द्विगुणमेवं वा त्रिगुणं पीठविस्तृतम्
कर्णस्य द्विगुणार्द्धं वा लिंगदैर्घ्य समन्तु वा १४२
गर्भगेहं त्रिधाभज्य भागैकं पीठविस्तृतम्
लिंगमानेन हर्म्यं स्यात् लिंगमानेन पिण्डिका १४३
पूर्वाकृतिर्यथापीठं तथाकुर्यात्पुनःपुनः
अन्याकृतिर्न कर्तव्या कृता चेत् कर्तृनाशिनी १४४
वेदाश्राष्टाश्रमानन्तु विभजेदष्टधा पुनः

गुणभागमधस्त्यक्त्वा बाणांशं पीठकोच्छ्रयम् १४५
ब्राह्मच वैष्णवमानन्तु षोडशांशेन भाजयेत्
सप्तभागमधो मुक्त्वाग्रहांशं पिण्डिकोच्छ्रयम् १४६
पीठोत्सेधन्तु यन्मानं विकारांशेन भाजयेत्
पञ्चांशं पट्टिका प्रोक्ता बाणांशं पद्मपिण्डकम् १४७
अंशद्वयेन वृत्तं स्यात् वेदांशं ऊर्ध्वपद्मकम्
तस्योर्ध्वे पट्टिका द्वाभ्यामंशेन घृतवारिणी १४८
पीठतारं त्रिभागैकं नाळनिर्गममुच्यते
तत्समं मूलविस्तारं तत्त्रिभागैकमग्रतः १४९
उत्तरे जलमार्गं स्यात् सोमस्याभिमुखं भवेत्
मद्धये खातं त्रिभागैकं क्रमेण कृशता भवेत् १५०
एवं तु पद्मपीठं स्यात् भद्रपीठमथोच्यते
पूर्ववत् षोडशांशेन पीठोत्सेधं भजेत्ततः १५१
व्योमांशं पादुकोत्सेधं वेदांशं जगती भवेत्
अन्यांशं वृत्तमित्युक्तं भागैकेन तु पट्टिका १५२
गुणांशं कर्णमित्युक्तं भागैकेन तु पट्टिका
महापट्टिद्वयांशेन घृतवारितथांशकम् १५३
एवं स्यात् भद्रपीठन्तु सर्वलिंगेषु योग्यकम्
एकविंशति भागेन पीठोत्सेधं विभाजयेत् १५४
अंशेन पादुकां कुर्याच्चतुर्द्धा जगतीं कुरु
कर्णमेकेन कर्तव्यं पद्ममेकांशमेव च १५५
तत्कुंभं त्रिभिरंशैश्च पद्ममेकांशमेव च
कुर्यादेकेन कंपन्तु पञ्चांशेनैव कर्णकम् १५६
कंपमेकेन कर्तव्यं पद्ममेकेन कारयेत्
महापट्टिद्विभागाभ्यां पद्ममेकांशकेन तु १५७
तस्योर्ध्वे पट्टिकैकेन घृतवारितथांशकम्

विजयन्नामपीठन्तु सर्वशान्तिकरं परम् १५८
विभजेत्पिंडिकोत्सेधं अष्टादशविभागतः
एकेन पादुकां कुर्यादद्धयर्द्धं कंपपद्मयोः १५९
जगती चतुरंशं स्यात् गुणांशेनैव वप्रकम्
तदूर्ध्वे कंपमेकांशं द्वाभ्यां वै पट्टिका भवेत् १६०
पद्ममेकेन कर्तव्यमर्द्धेन घृतवारिणा
स्वायंभुवमिति प्रोक्तं सर्वदेवेषु योग्यकम् १६१
विकारांशेन विभजेत् भागेनोपानमुच्यते
पद्मतुंडद्विभागेन कंपमेकेन कारयेत् १६२
सप्तांशं कर्णमित्युक्तं द्वाभ्यां वै कंपपद्मकौ
अद्धयर्द्धेन महापट्टी पद्ममर्द्धेन कारयेत् १६३
कंपमर्द्धेन कर्तव्यमर्द्धेन घृतवारिणा
स्थंडिलं स्यादिदं पीठं सर्वदेवेषु पूजितम् १६४
भागार्द्धं तत्त्रिपादं वा समं वा शेषनिर्गमम्
मूलादष्टांशमग्रे तु हीनं स्यात् पद्मपीठके १६५
सर्वेषामेव पीठानां उपानात् पीठविस्तरम्
पीठिकालक्षणं प्रोक्तं पादशैलविधिं श्रुणु १६६
नपुंसकशिलां ग्राह्य पादाधारञ्च कल्पयेत्
ज्येष्ठमद्धयमकानिष्ठं त्रिविधं पादशैलकम् १६७
लिंगायामसमं शैलं उत्तमं परिकीर्तितम्
यस्य लिंगस्य विस्तारं द्विगुणं पादशैलकम् १६८
मद्धयमं त्विति विज्ञेयं अद्धयर्द्धं कन्नयसं भवेत्
समं वै चतुरश्रन्तु तदर्द्धं बहुलं भवेत् १६९
प्रासादमध्यसूत्रात्तु किञ्चिद्वामेति योजयेत्
मद्धयेमेत्ववटं कुर्याल्लिंगविस्तारमानतः १७०
अथवाश्वभ्रविस्तारं गर्भदमार्द्धार्द्धमुच्यते

ब्रंहभागप्रवेशं हि ज्ञात्वा ब्रह्मशिलोच्छ्रयम् १७१
श्वभ्रावकाशं सन्त्यज्य ब्रंहभागान्तमेव च
नन्द्यावर्तशिलां योज्य चत्वारियुगदिक्षु च १७२
पूर्वपश्चिममायामं तथा वै दक्षिणोत्तरम्
पश्चात्पश्चिमपूर्वन्तु तत्पश्चादक्षिणोत्तरम् १७३
लिंगस्याद्धयर्द्धतारेण दैर्घ्यं तस्यार्द्धं विस्तृतम्
तदूर्ध्वे पिंडिकां योज्य बंधयेदष्टबंधनैः १७४
पादाधारपदे मद्धये स्थापयेल्लिंगमुत्तमम्
ताश्च तां पुंशिलां सक्तां शैलचूर्णोऽपि बन्धयेत् १७५
प्रदक्षिणक्रमेणैव योजयेत्तु विशेषतः
शैललिंगमिति प्रोक्तं रत्नलिंगविधिं श्रुणु १७६
द्विविधं तत्समाख्यातं चलञ्चैवाचलन्तथा
स्थिरं प्रासादलिंगन्तु चलं सर्वत्र पूज्यते १७७
मरतकं पुष्टिदं ज्ञेयं पद्मरागं धनार्त्थकम्
आयुष्यवृद्धिवैडूर्यं स्फटिकं पुत्रवर्द्धनम् १७८
स्तंबनं पुष्यरागस्स्यात् दृष्टवश्यं प्रवाळकम्
आकर्षणं स्यात् विद्द्रुमाख्यं माणिक्कं सर्वसिद्धिदम् १७९
इन्द्रनीलन्तु मोक्षार्थं रत्नजानां फलं भवेत्
अंगुल्यादिवितस्त्यन्तं कुर्याल्लिंगन्तु रत्नजम् १८०
आयामसदृशन्नाहं शिरोवर्तनसंयुतम्
स्वप्रमाणेन कर्तव्या रत्नलिंगस्य पिण्डिका १८१
पिण्डिकास्वस्वयोनिस्स्यात् तदभावे हिरण्मयम्
रजतं ताम्रकञ्चैव अधमञ्चेति कीर्तितम् १८२
चतुरश्राथ वृत्ता वा चललिंगस्य पिण्डिका
आयामद्विगुणार्द्धं वा द्विगुणं त्रिगुणन्तु वा १८३
विस्तारं तत्समं ज्ञेयं शेषं पूर्वोक्तवत् कुरु

लिंगायामं त्रिभागैकं पीठमद्धये निवेशयेत् १८४
सर्वत्र वृत्तकं लिंगं त्रिभागं सूत्रवर्जितम्
रत्नलिंगं समाख्यातं लोहजं लिङ्गमुच्यते १८५
सौवर्णेन कृतं लिङ्गं भुक्तिमुक्तिफलप्रदम्
ताम्रजं पुत्रदं प्रोक्तं राजतं श्रीकरं भवेत् १८६
सुखदं कांस्यमित्युक्तं पैत्तळं रोगनाशनम्
आयसंपुत्रनाशन्तु त्रिलोहं मारणं भवेत् १८७
तथा चत्रपुसीसन्तु कल्पयेत्कल्पवित्तमः
रत्नजस्योक्तमार्गेण सर्वकर्मसमाचरेत् १८८
पञ्चवार्षिककां कन्यामलंकृत्यविशेषतः
तया संस्पर्शितं लिङ्गं तन्मुखञ्चेति कीर्तितम् १८९
लोहलिङ्गमिति प्रोक्तं पार्त्थिवं लिंगमुच्यते
अपक्वञ्चैव पक्वञ्च पार्त्थिवं लिङ्गमुच्यते १९०
पार्त्थिवस्य तु लिंगस्य शैलवन्मानमिष्यते
यावदुत्सेधमानन्तु तावद्वृत्तमिहोच्यते १९१
तालनिम्नगमेकांशं एकांशं पीठबन्धनम्
त्रिसूत्रेण विना कुर्याच्चतुरष्टाश्रवर्जितम् १९२
पर्वताग्रेन दीतीरे पुण्यक्षेत्रे मनोरमे
लिङ्गार्त्थं मृत्तिकाग्राह्या प्रशस्ता सर्वकामदा १९३
श्वेतरक्ता तथापीता कृष्णा चैव मनोरमा
श्लक्ष्णञ्चूर्णं ततः कृत्वा पञ्चगव्येन मर्दयेत् १९४
कपिलन्तु घृतं क्षीरं दधिवा तैलमेव च
यवगोधूमजं चूर्णं माषचूर्णं तथासमम् १९५
आहृत्य सर्वचूर्णानि मृत्तिका सहितानि च
मर्दयेत्तु विशेषेण श्यामलाक्षाञ्च कुन्दुरुम् १९६
श्रीवेष्टं गुग्गुलुञ्चैव सर्जगंधरसं तथा

बिल्वोद्भवं रसं ग्राह्यमेकीकृत्य विमर्दयेत् १९७
पञ्चनिर्याससंयुक्तं मासपक्वोषितन्तथा
ततो लिंगं प्रकुर्वीत श्रेष्ठमद्धयमकन्नयसम् १९८
पार्त्थिवं लिंगमाख्यातं पिण्डिकां तस्य मृण्मयीम्
लिंगविस्तारमानेन त्रिगुणं पीठविस्तरम् १९९
पूजयेत्तु प्रयत्नेन धर्मकामार्त्थमोक्षदम्
शान्तिपुष्टिकरं नित्यं पृथिवी राज्यसिद्धिदम् २००
एवं यः कुरुते मर्त्यस्स पुण्याङ्गतिमाप्नुयात् २०१

इति कारणागमे प्रतिष्ठा तन्त्रे लिंगलक्षणविधिपटलो नवमः

मूर्ध्नीष्टकाविधिपटलप्रारंभः

अथातस्संप्रवक्ष्यामि मूर्द्धशैलेष्टकाक्रमम्
यत्काले यत्समाप्नन्तु विमानं लक्षणान्वितम् १
महानस्यान्तकं वापि शक्तिध्वजसमन्तु तत्
मूर्ध्नीष्टकानां तत्काले विन्नयसेद्विधिपूर्वकम् २
नपुंसकोपलेनैव कारयेल्लक्षणान्वितम्
विकारांगुलमायामं तस्यार्द्धञ्च हलाश्शुभाः ३
तस्यार्द्धं नीव्रसंयुक्तं चतस्त्रस्त्वैकभूमिका
द्विभूमेरंगुलं वृद्ध्या रविभूम्यन्तकं क्रमात् ४
उपलंशैलके योज्यमिष्टकाधाममिष्टका
आदित्यांगुलमायामष्षडंगुलसुविस्तृता ५
नीव्रं युगांगुलेनैव शेषं पूर्ववदाचरेत्
एवं मूर्ध्येष्टकां कुर्यात्स्तूपिदण्डन्तु कारयेत्
असनं खादिरं वापि मधुकं पद्मतुंडकम्
तिलकं त्रीणिसारञ्च चन्दनं चंपकं तथा ६
एतैर्वृक्षैः प्रकर्तव्यं स्तूपिदंडं विशेषतः

पादायामसमं दीर्घं पादविष्कंभविस्तृतम् ७
स्तंभायामं त्रिधाकृत्वा मूलांशं चतुरश्रकम्
तस्योर्ध्वे वृत्तकं कुर्याद्विभागेन विशेषतः ८
अग्रमंगुलविस्तारमानुपूर्वात्कृशन्तथा
शिखिपादं ततः कुर्याद्विस्तारं त्रिगुणायतम् ९
विस्तारसमविस्तारं योजयेत्तद्वयं समम्
दंडमूले शिखीपादं सुस्निग्धं सुदृढं कुरु १०
ताम्रेण सायसेनाथ वेष्टयदंडाग्रमूलकौ
पूर्वे वा चोत्तरे वापि मंटपञ्चाष्टहस्तकम् ११
विकारांघ्रि समायुक्तं युगद्वारसमायुतम्
मंटपं तत्त्रिभागैकं मद्धयमे वेदिकां कुरु १२
तालमात्रं तलोत्सेधं दर्पणोदरसन्निभम्
दर्भमालासमायुक्तं वितानध्वजसंयुतम् १३
मुक्तादाम्नास्वलंकृत्य तरंगेणैव वेष्टयेत्
गोमयालेपनं कृत्वा पुण्याहं वाचयेत्ततः १४
वेदिकायाश्च तन्मद्धये चाष्टद्रोणैश्चशालिभिः
तदर्द्धैस्तंडुलैश्चैव तदर्द्धैश्च तिलैरपि १५
स्थण्डिलं कारयेधीमान् तन्मद्धये नळिनं लिखेत्
लाजपुष्पकुशैश्चैव विकिरेत्तु विशेषतः १६
प्रोक्षयेत्पञ्चगव्येन शिलाचेष्टकयापि वा
प्रोक्षयेद्धदयेनैव शुद्धतोयेन देशिकः १७
गैरिकेन लिखेद्धीमानक्षराणि विशेषतः
शकारं पूर्वभागे तु षकारं दक्षिणे लिखेत् १८
सकारं पश्चिमे लिख्य हकारञ्चोत्तरे लिखेत्
बिन्दुनादसमायुक्तमादौ प्रणवसंयुतम् १९
सौवर्णमौर्णसूत्रं वा अथ कार्पासकन्तु वा

कौतुकं बंधयेद्धीमान् प्रत्येकं वस्त्रवेष्टितम् २०
गंधपूष्पादिभिः पूज्य स्वस्वबीजेन देशिकः
वेदिकोपरि संस्थाप्य ऐन्द्रादिसौम्यकान्तकम् २१
नैवेद्यं दापयेत्तासां तांबूलञ्च निवेदयेत्
स्नापयेत्पञ्चगव्येन स्थाप्यदंडं विशेषतः २२
शिवांभसा तु संस्नाप्य यजेदीशानमन्त्रतः
कौतुकं बंन्धयित्वा तु वस्त्रेणैव तु वेष्टयेत् २३
स्थण्डिलस्योत्तरे देशे स्तूपिदंडन्तु विन्यसेत्
तन्तुना चित्रितान् कुंभान् गन्धतोयेन पूरितान् २४
सकूर्चान्सापिधानांश्च सवस्त्रान् हेमसंयुतान्
लोकपालाधिपां स्थाप्य चाष्टौ वै वेदिकोपरि २५
गंधपुष्पादिभिः पूज्य पूर्वादिक्रमयोगतः
वालुकाभिश्चतुर्दिक्षु कुर्यात्स्थण्डिलमुत्तमम् २६
अग्न्याधानादिकं सर्वं अग्निकार्योक्तमाचरेत्
सद्येनसमिधा हुत्वा आज्यं मूलेन होमयेत् २७
अघोरेण चरुं हुत्वा लाजं वै हृदयेन तु
तिलं हुत्वा तु शिखया सर्षपं कवचेन तु २८
बीजमुख्येन माषन्तु प्रत्येकं पञ्चविंशतिः
होमं कृत्वा विशेषेण द्रव्यान्ते व्याहृतिं हुनेत् २९
जयादिरभ्याधानञ्च राष्ट्रभृच्चक्रमाद्धुनेत्
स्विष्टमग्नेति मन्त्रेण जुहुयात् तदनन्तरम् ३०
ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः
नववस्त्रोद्धृतोष्णीषश्शुक्लमाल्यैर्विभूषितः ३१
हेमांगुलीयकटकैः कुंडलाद्यैरलंकृतम्
मुहूर्ते समनुप्राप्ते स्थापनन्तु समारभेत् ३२
आचार्यं पूजयेत्तत्र वस्त्रांगुलीयकादिभिः

सर्वातोद्य समायुक्तं स्वस्तिमंगळवाचकैः ३३
ब्रह्मघोषैस्समायुक्तं सर्वालंकारसंयुतम्
अनन्यमानसो भूत्वा स्थापयेत्स्थपतिस्सह ३४
सर्वाश्च बंधयेत्तासामग्रं प्रतिदिशिस्थितः
न्यस्त्वापूर्वादिषूर्ध्वे तु प्रागग्रविधिना क्रमात् ३५
तन्मद्ध्ये विन्यसेद्रत्नमिंद्रनीलमथेंद्रके
मरतकं याम्यदेशे तु स्फटिकं वारुणे तथा ३६
वज्रं सौम्ये तु विन्यस्य पद्मरागन्तु पावके
वैडूर्यं नैर्ऋते देशे मुक्तां वायुप्रगोचरे ३७
प्रवाळमैशे विन्यस्य माणिक्कं मद्ध्यमे न्यसेत्
ईशानेन तु मन्त्रेण स्तूपीदंडं ततोपरि ३८
तन्मूले प्रोद्धयेन्मंत्री कुंभोदेन विशेषतः
पूजयेत् गंधपुष्पाद्यैस्सुस्निग्धं बंधयेत्ततः ३९
स्तूपीदंडं त्रिभागैकं द्विभागेन तु बंधयेत् ४०

इति कारणे प्रतिष्ठातन्त्रे मूर्ध्नीष्टकाविधिपटलो दशमः

प्रतिमालक्षणविधिपटलप्रारंभः

ततः परं प्रवक्ष्यामि प्रतिमालक्षणं श्रुणु
त्रिविधं व्यक्तमव्यक्तं व्यक्ताव्यक्तं तथैव च १
व्यक्तन्तु सकळाकारं अव्यक्तं लिंगमुच्यते
मुखलिंगमिति प्रोक्तं व्यक्ताव्यक्तं प्रजायते २
अधुनाप्रोच्यते सर्वं सकळानान्तु लक्षणम्
चलं चलाचलञ्चैव अचलञ्च त्रिधाभवेत् ३
चलं धातुमयं ज्ञेयं शैलं चलाचलं स्मृतम्
अचलं मृण्मयं ज्ञेयं भित्तिचित्र पटन्तथा ४
चित्रहीनं चलं शैलमचलं चित्रयुक्सदा

गर्भद्वारे च हस्ते च हर्म्ये स्तंभे च लिङ्गके ५
अंगुले चैव तुंगानि जनयेत्तु विशेषतः
गर्भमानवशान्मानं द्विविधेन प्रकीर्तितम् ६
गर्भगेहं त्रिधाभज्य एकैकन्तु त्रिधा भजेत्
उत्तमत्रयमग्रे तु मद्धयमे मद्धयमत्रयम् ७
अधमत्रयमधस्तान्नवमानमुदीरितम्
अथवान्यप्रकारेण गर्भमानं वदाम्यहम् ८
गर्भाद्विंशतिभागेन दशहस्तन्तु कन्नयसम्
रुद्रांशं मद्धयमं ज्ञेयं रत्थ्यंशं चोत्तमं भवेत् ९
द्वारोस्त्ये सममानन्तु उत्तमं तत्प्रकीर्तितम्
ग्रहभागैकहीनन्तु मद्धयमं प्रतिमोच्छ्रयम् १०
अष्टभागैकहीनं स्यात् अधमं प्रतिमादयः
त्र्यहस्तमधमं ज्ञेयं पञ्चहस्तन्तु मद्धयमम् ११
उत्तमं नवहस्तन्तु हस्तमानमुदीरितम्
एकादिनवहस्तान्तमधमाद्युत्तमान्तकम् १२
नवधामानमित्युक्तं हस्तमानं विशेषतः
त्रयोदश करादूर्ध्वमेकत्र्यंशकरान्तकम् १३
हस्तमानेन कर्तव्यं क्षुद्रहर्म्येन कारयेत्
आदिप्रासादविस्तारं पात्बाह्यं सूत्रनिश्चितम् १४
तदर्द्धमुत्तमोत्सेधं तस्मादर्द्धन्तु मद्धयमम्
तदर्द्धमधमं ज्ञेयं प्रतिमा हर्म्यमानतः १५
प्राचीरुत्तरसीमान्तं स्तंभमानमथोत्तमम्
रंध्रभागैकहीनं यत्मद्धयमं समुदाहृतम् १६
अष्टांशहीनमधमं स्तंभमानं प्रकीर्तितम्
पूजाभागसमं मानं कन्नयसं प्रतिमोदयम् १७
द्विगुणं मद्धयमं ज्ञेयं नाहमानमथोत्तमम्

लिंगनाहं कनिष्ठन्तु द्विगुणं मद्ध्यमं भवेत् १८
द्विगुणं मध्यमं प्रोक्तं लिंगनाहवशात्कुरु
तिथ्यंगुलं कनिष्ठन्तु पञ्चविंशति मद्ध्यमम् १९
पञ्चत्रिंशति मात्रन्तु उत्तमञ्चेति कीर्तितम्
लब्धमानेन जात्यंशं योजयेत्तु विचक्षणः २०
चतुराशीति षष्टी च चतुर्विंशच्च षोडशः
भजैकांशं समायोज्य गणयेद्बुसुभिः क्रमात् २१
सप्तविंशतिभिर्भक्ते शिष्टं श्वेतादिभिर्भजेत्
तेनैवांशेन संयुक्तं मानं जात्याहकं भवेत् २२
आयव्ययर्क्षवाराष्ट योन्यंशकानि लक्षयेत्
शतात्रिंशदंशादि बेरमानं भजेत्क्रमात् २३
व्योमांशन्तु समायोज्य यावत्तत्सुशुभोदयम्
वसुभिर्गणिते त्वेकं हृदेत्वायं विनिर्दिशेत् २४
रसैस्तु गुणिते दिग्भिर्भाजिते व्ययमादिशेत्
वसुभिर्गुणिते सप्तविंशत् भक्ते तु संभवेत् २५
शिष्टमाश्वयुगाद्यन्तु नक्षत्रं गणयेत्क्रमात्
रंध्रैस्सगुणिते सप्त हृतेस्सूत्रादिवाकरः २६
गुणैस्संगुणयवसुभिर्भूतयोनिरुदाहृतम्
शिष्टन्तु गणयेन्मंत्री अष्टयोनिध्वजादिकम् २७
वेदैर्गुणहृते रंध्रैस्तस्कराद्यंशकं क्रमात्
आयाधिक्ये धनादिस्स्याद्व्ययाधिक्ये धनक्षयम् २८
आयाधिक्यं व्ययं हीनं तन्मानं शुभदं स्मृतम्
गणयेत्तु द्विभाक्कर्ता नृपवास्तुदिनान्तकम् २९
शुभानिजन्मसंपत्तिक्षेमं साधकमैत्रके
तथापरममैत्रञ्च वर्जितान्यन्यभानि वै ३०
वारेषु सितसोमज्ञ गुरवश्शुभदा स्मृताः

अशुभारविसौरारा शुभयोगे शुभप्रदाः ३१
योनिषु ध्वजसिह्मारुयो वृषो हस्ती शुभा स्मृता
धूमश्च खरकाकांश्च वर्जयेत्तु प्रयत्नतः ३२
ध्वजश्चेदर्त्थसिद्धिस्स्यात् धूमश्चेदग्निनाभयम्
सिंहोपिविजयः प्रोक्तः ककुरः कलहो भवेत् ३३
वृषभं पुत्रवृद्धिस्स्यात् स्थानभ्रंशन्तु गर्दभः
गजस्तुराष्टवृद्धिस्स्यात् काकोदुर्भिक्षसंभवः ३४
अंशकेषु च भुक्तिश्च शक्तिश्चैव विशेषतः
तथाविज्ञावनीनाथो निहितस्तु समृद्धिकम् ३५
शुभान्येतानि चान्यानि वर्जयेत्तु प्रयत्नतः
तस्करो नाशनं भुक्तिभोगदं शक्तिरिष्टदम् ३६
जयं वित्तावनीताथो रोगवृद्धि नपुंसकम्
निर्भीतश्रीप्रदं ज्ञेयं दरिद्रो धननाशनम् ३७
समृद्धिस्सर्वसिद्धिस्स्यात् पापं राष्ट्रविनाशनम्
एवं परीक्ष्यबहुधा कारयेल्लक्षणान्वितम् ३८
आयांशञ्चैव जात्यंशं तेन मानेन योजयेत्
भक्त्वामानांगुलेनाथ षट् शुभानि परीक्षयेत् ३९
ज्ञात्वा युक्तांगुलोच्छेदं वृद्ध्याहान्न्या प्रयोगवित्
आयादिसंपदर्त्थन्तु गृह्णीयात्तु विचक्षणः ४०
लोहजत्वेमधूच्छिष्टमग्निनार्द्री कृतन्तु यत्
वस्त्रेण शोधयेत् सर्वं दोषन्त्यक्त्वा तु शिल्पिना ४१
सर्वालंकारसंयुक्तं मण्टपे लक्षणान्विते
स्थण्डिलं कारयेत्तत्र अष्टद्रोणैश्चशालिभिः ४२
तन्मद्ध्ये नळिनं लिख्यसाष्टपत्रं सकर्णिकम्
कुशैः पुष्पैः परिस्तीर्य तस्योर्ध्वे फलकोपरि ४३
मुहूर्ते समनुप्राप्ते गृहीता याममात्रतः

सिद्धेन प्रतिमाकारं शिल्पिना कारयेद्बुधः ४४
तस्य दक्षिणभागे तु शान्तिमन्त्रं जपेत् गुरुः
बिंबं संपूजयेत् पश्चात् गन्धपुष्पादिभिर्हृदा ४५
आचार्यं पूजयेत्पश्चात् वस्त्रहेमांगुलीयकैः
शिल्पिनं पूजयेत्पश्चाद्धेमांगुलीयवस्त्रकैः ४६
बेरायामं परिग्राह्य तालं संख्या क्रमाद्भजेत्
दशतालन्नवतालं वा वसुतालर्षितालकैः ४७
रसतालेषु सहिता युगतालं त्रितालकम्
एवं तालक्रमं प्रोक्तमेकैकं त्रित्रिभेदकम् ४८
उत्तमं मद्धयमञ्चेति कन्यसं तालकं प्रति
दशतालोत्तमं वृद्धि चतुर्विंशच्च तालकम् ४९
एतस्य मध्यभेदश्च त्रितालस्यार्द्धमात्रकम्
त्रयोविंशति विख्याता भेदं प्रतियुगांगुलम् ५०
क्रमाद्धीनं प्रकर्तव्यमेवं तालक्रमं भवेत्
कोष्ठेन दशतालेन ब्रह्मविष्णुमहेश्वरान् ५१
उमां सरस्वतीं दुर्गां सप्तमातृ उषाम्महीम्
ज्येष्ठां लक्ष्मीञ्च कर्तव्यं दशतालस्य मद्धयतः ५२
ऋषीणाञ्चाश्विनी चैव आदित्येन्दुर्गुरुस्तथा
आर्यं शतमखञ्चैव चण्डेशं क्षेत्रपालकम् ५३
दशतालकनिष्ठेन कारयेत्तु विचक्षणः
विद्येशान् लोकपालांश्च अष्टमूर्तीन् वसूंस्तथा ५४
नवतालोत्तमेनैव कारयेल्लक्षणान्वितम्
अन्यांश्च सर्वदेवांश्च नवतालोत्तमेन तु ५५
यक्षानप्सरसश्चैव अस्त्रमूर्तीर्मरुद्गणान्
नवतालस्य मद्धयेन विद्याधरांस्तथा कुरु ५६
राक्षसान्यातुधानांश्च गन्धर्वान् सिद्धचारणान्

असुरांश्च पितॄंश्चैव नवतालाधमेन तु ५७
अष्टतालेन मर्त्यांश्च पिशाचास्सप्ततालतः
कुप्जकान्नसतालेन शरतालोत्तमेन च ५८
विघ्नेशं कारयेत्तस्य मध्यमेनाधमेन च
भूतरूपाणि कर्तव्यं युगतालेन बालकान् ५९
किन्नरान् किंपुरुषांश्चैव त्रितालेनैव कारयेत्
यल्लब्धोत्सेधमानन्तु चतुर्विंशच्छतं कुरु ६०
अंगुलं तेषु भागैकं वस्वंशैकं ततो यवम्
तस्याष्टैकांशकं यूकं एकैकन्तं नवांशकान् ६१
लक्षायास्वष्टभागैकन्तद्रोमाग्रमिति स्मृतम्
अंगुलं मात्रमित्युक्तं द्वयंगुलं कोलकं भवेत् ६२
त्रिमात्रन्तु कलाज्ञेया भागं स्याच्चतुरंगुलम्
तद्वयं यवकञ्चैव रव्यंगुलमुखं भवेत् ६३
मुखतालं मुखञ्चैव पर्याय वचनानि च
मानञ्चैव प्रमाणञ्च उन्मानं ह्युपमानकम् ६४
परिमाणं लंबमानं षड्विधं मानमिष्यते
मानं यत्प्रतिमायामं तिर्यङ्मानं प्रमाणकम् ६५
इध्मानं तत्प्रदेशाच्च द्वयन्तरं ह्युपमानकम्
परिमाणं नाहमानं लंबमानञ्च सूत्रकम् ६६
मानहीने महाव्याधिरधिकेशत्रुवर्द्धनम्
नाहं हीने विनाशं स्यात्तद्वृद्धिस्स्यात्क्षयं करम् ६७
प्रमाणहीने दारिद्र्यमधिकेदारनाशनम्
लंबमानविहीने तु राजाराष्ट्रस्य दोषकृत् ६८
उपमानाधिके हीने शिल्पिनं हन्तिदेशिकम्
सर्वलक्षणयुक्तञ्चेत्सर्वसिद्धिप्रदायकम् ६९
चतुर्विंशच्च तन्मात्रं मूर्द्धाद्यंघ्रि तलान्तकम्

उष्णीषमंगुलं प्रोक्तं केशान्तन्तु कलाभवेत् ७०
सार्द्धत्रयोदशमात्रं मुखमानं विधीयते
केशान्तादक्षिसूत्रान्तं भागञ्चतुर्यवाधिकम् ७१
अक्षिसूत्रात्पुटान्तन्तु तत्समञ्चैव कारयेत्
पुटान्ताद्धनुपर्यन्तं भागञ्चतुर्यवाधिकम् ७२
गळमर्द्धांगुलञ्चैव कर्णं भागसमुच्छ्रयम्
हिक्कादिहृदयान्तञ्च सार्द्धत्रयोदशांगुलम् ७३
हृदादिनाभिपर्यन्तन्तत्समञ्चेति कीर्तितम्
नाभ्यादिमेढ्रमूलान्तन्त्रयोदशांगुलं भवेत् ७४
मेढ्रमूलात्तु जान्वन्तं सप्तविंशतिमात्रकम्
द्विकोलकन्तु जानुस्स्यात् जंघाचाप्यूरुतत्समम् ७५
तलोत्सेधन्तु भागं स्यात्कायमानमिति स्मृतम्
उष्णीषात् पूर्वकेशान्तन्नवमात्रमिति स्मृतम् ७६
उष्णीषात्पृष्ठकेशान्तं सार्द्धत्रयोदशांगुलम्
उष्णीषात्पार्श्वकेशान्तं द्वादशांगुलमुच्यते ७७
द्वयोः कर्णान्तरं पूर्वे एकविंशतिमात्रकम्
कोलकं कर्णविस्तारमायामं यवकं भवेत् ७८
भ्रूसूत्रस्य समञ्चैव श्रोत्रोर्द्ध्वं परिकीर्तितम्
तत्पृष्ठकर्णयोर्मद्ध्ये त्रयोदशांगुलं भवेत् ७९
पिप्पल्यन्तादधः कुर्यात् भागन्नाळावलंबितम्
नाळात्तनोर्द्ध्वमात्रञ्च तत्घनं त्रियवं भवेत् ८०
पिप्पली चार्द्धमात्रञ्च सुषिरन्तस्य मानकम्
यस्य कुण्डलसंयुक्तं शेषं मात्रावलंबितम् ८१
कर्णिकाकारवत्कर्णन्नाळात्तु त्रिविशेषतः
द्वियवं कर्णपाली च तत्समं कर्णपट्टिका ८२
मात्रार्द्धकर्णपाली स्यात् अंगुलं कर्णताळकम्

लकारावर्तयोर्मद्धये पिञ्चळी कर्णचूळिका ८३
आपादात्कर्णमूलान्तं सप्तमात्रेण कल्पयेत्
द्विमात्रद्वियवाधिक्य नेत्रायामं विधीयते ८४
षडयवन्नेत्रविस्तारमायामन्तु त्रिधा भवेत्
कृष्णमण्डलमेकन्तत् मद्धयमे सितमण्डलम् ८५
कृष्णमण्डलमद्धये तु दृष्टिर्यूकप्रमाणतः
करवीरो यवं रक्तन्नयनत्रयमूलके ८६
कनीयकायवादीर्घा त्रिवर्णैर्लोचनं युतम्
ऊद्ध्वं वर्मस्य मानन्तु यवञ्चार्द्धमधो भवेत् ८७
नवतिः पक्षरोमस्यात् कृष्णाञ्जनसमप्रभम्
भूरेखाचक्षुरेखा च कोलद्वययवाधिकम् ८८
भूरेखामूद्ध्वकेशान्तन्तत्समञ्चेति कीर्तितम्
भूदीर्घं रसमात्रन्तु विस्तारं यवमेव च ८९
आरूढचापकृतिवन्मूलाग्रन्तु क्रमात्कृशम्
द्वयंगुलं त्रियवं प्रोक्तं द्वयोर्नेत्रान्तरं स्मृतम् ९०
मूलनासार्द्धमात्रञ्च अर्द्धनासायवांगुलम्
पुटमर्द्धांगुलन्तारन्तत्तुंगं पञ्चभिर्यवैः ९१
सुषिरं त्रियवं तिर्यक् बाह्ये चार्द्धयवं घनम्
पुटान्तात् त्रियवञ्चैव गोजिमानञ्चतुर्यवम् ९२
गोज्याश्च नासिकोत्सेधं कोलकञ्च यवाधिकम्
वंशस्यैवकविस्तारमंगुलञ्चेति कीर्तितम् ९३
पुष्करन्तु यवोत्सेधं पुरस्तात् षडयवन्ततः
द्वियवञ्चार्द्धमेकन्तु पुष्करस्य विधीयते ९४
तिलपुष्पसमाकारं नासाग्रस्य पुटद्वयोः
पुटान्तादधरोष्ठान्तं कोलकं द्वियवाधिकम् ९५
दशनोदृश्यादृश्यं हि द्वात्रिंशत्परिकीर्तितम्

द्वियवन्दन्तविस्तारमुत्सेधन्तत्समं भवेत् ९६
दंष्ट्रायामं यवाधिक्यं सदंशमुकुळाकृतिम्
ऊद्ध्वे षोडशदन्तं स्यादधस्तादपितावकी ९७
अधोदशनविस्तारं यवार्द्धन्तारमुच्छ्रयम्
जिह्वायामन्तु षण्मात्रं विस्तारं स्यात्तदर्द्धकम् ९८
अधरोष्ठस्य विस्तारमंगुलं स्याद्यवाधिकम्
मुनीयवं रक्ततारमायामं स्याद्विमात्रकम् ९९
भागञ्च त्रियवाधिक्यमास्यतारमिति स्मृतम्
त्रिवक्त्रचोत्तरापाली यवार्द्धञ्चोत्तमं मतम् १००
उत्तरोष्ठस्य विस्तारं त्रियवं परिकीर्तितम्
अनुस्याद्व्यंगुलायामन्तदूद्ध्वे तु यवंशुभम् १०१
सप्तायवोच्चमधरं त्रिमात्रं हनुवर्द्धनम्
त्रियवञ्चोन्नतं विद्धितालार्द्धञ्चाम्बुनिर्गमम् १०२
नासाग्रात्कर्णपाल्यञ्च त्रयोदशांगुलं भवेत्
गळप्रदेशविस्तारं कोलकञ्चेति कीर्तितम् १०३
ग्रीवाग्रस्य तु विस्तारं सार्द्धयावकमुच्यते
ग्रीवामूलस्य विस्तारन्नवमात्रञ्चषडयवम् १०४
ग्रीवात्तु गळपर्यन्तं कला च द्वियवाधिकम्
तत् गळाद्धनुपर्यन्तमंगुलञ्चेति कीर्तितम् १०५
ग्रीवासुवृत्तमित्युक्तं द्विरेखापरिवेष्टितम्
हिक्कासूत्रात्क्रमेणोच्चं भागं कोलकमंगुलम् १०६
अर्द्धांगुलं क्रमात् क्षीणं बाहुपर्यन्तमेव वा
वक्षस्थलस्य चायामं दशभागञ्चतुर्यवम् १०७
हिक्कासूत्रादधोबाहुस्सप्तविंशतिमात्रकम्
गोपुरं कोलकाययाममेकविंशत्प्रकोष्ठकम् १०८
मद्ध्यांगुलाग्रात्तस्याग्रात् सार्द्धत्रयोदशांगुलम्

सप्तांगुलन्तु चायामं शेषं मद्धयांगुलायतम् १०९
पाणेस्तलस्य विस्तारं सप्तमात्रमिति स्मृतम्
तत्तारस्याष्टभागैकहीनमग्रस्य तारकम् ११०
सार्द्धकोलकमात्रेण तालमूले घनं भवेत्
षडयवेनैकमात्रन्तु तस्याग्रस्य घनं भवेत् १११
अनामिकांगुलायाम तन्मानानामिका भवेत्
द्वियवोपेतभागेन अंगुष्ठस्य तु दैर्घ्यकम् ११२
यवाधिकेन भागेन दैर्घ्यं कानिष्ठकस्य तु
रसाब्धिरन्ध्रवस्वर्कयवतारं कनिष्ठिका ११३
अंगुष्ठान्तं तथाग्रे तु अष्टभागैकहीनकम्
अंगुल्यग्रं त्रिधा कृत्वा द्विभागन्नखविस्तरम् ११४
तत्तारेण यवोपेतन्नखायामं प्रकीर्तितम्
अंगुष्ठन्तु द्विपर्वं स्यादन्याङ्गुल्यास्त्रिपर्वकं ११५
तलाग्रे त्वंगुलं नीत्वा द्विरेखामन्तरं कुरु
तलमूलादेकरेखा मद्धयमांगुलिमूलका ११६
मणिबन्धस्य विस्तारं भागमेकं प्रकीर्तितम्
प्रकोष्ठं मद्धयविस्तारं त्रियवेन शरांगुलम् ११७
प्रकोष्ठं मूलतारन्तु कौशिकांगुलमुच्यते
कूर्परस्य तु विस्तारं सार्द्धसप्तांगुलं भवेत् ११८
बाहुमद्धयमविस्तारं सार्द्धायावकमुच्यते
बाहुमूलस्य विस्तारन्नवमर्द्धार्द्धमिष्यते ११९
हिक्कासूत्रात्तु कक्षान्तन्नवमात्रार्द्धमुच्यते
कारयेदुपबाहू च मूलतारं गुणांगुलम् १२०
अद्धयंगुलेन मद्धये तु शेषं पूर्ववदाचरेत्
कक्षयोरन्तरन्तिर्यक् चतुर्विंशतिमात्रकम् १२१
हिक्काचबुकयोर्मद्धये सार्द्धत्रयोदशांगुलम्

स्तनयोरन्तरं यद्वच्चूचुकन्तु यवान्तकम् १२२
द्वियवन्तस्यविस्तारं मण्डलन्तु द्विमात्रकम्
हृत्प्रदेशस्य विस्तारं सार्द्धं त्रिस्त्र्यंगुलं भवेत् १२३
जठरस्य तु विस्तारं सार्द्धत्रयोदशांगुलम्
यवद्वयन्तु निम्नं स्यात् विस्तारं षडयवं भवेत् १२४
नाभिप्रदक्षिणावर्त्त विस्तारं सममायतम्
श्रोणिप्रदेशविस्तारं सार्द्धसप्तदशांगुलम् १२५
कट्यग्रस्य तु विस्तारं विंशत्यंगुलमुच्यते
कटिमूलस्य विस्तारं द्वात्रिंशत्यंगुलं भवेत् १२६
शरीरं गोमुखाकारं कट्या ऊर्ध्वं प्रशस्यते
शरमात्रयवोपेतं मेढ्रायामं विधीयते १२७
वेदांगुलमिति प्रोक्तं मुष्कविस्तारदीर्घके
पक्षांगुलप्रमाणेन एकैकवृषणं स्मृतम् १२८
शेफं शीर्षाङ्गुलायामं तारं दशयवं भवेत्
क्षयमग्रेष्टभागैकं मुकुळोत्पलवत् भवेत् १२९
ऊरुमूलस्य विस्तारं सार्द्धत्रयोदशाङ्गुलम्
तन्मद्ध्ये मत्स्यविस्तारं यवमद्ध्यांगुलाधिकम् १३०
ऊर्वग्रस्य तु विस्तारं सार्द्धरंध्राङ्गुलं भवेत्
जानुमण्डलविस्तारं वसुमात्रार्द्धमिष्यते १३१
यवेनाष्टांगुलं प्रोक्तं जंघामूलस्य विस्तरम्
तन्मद्ध्ये मत्स्यविस्तारं सप्तमात्रयवाधिकम् १३२
नळकस्य तु विस्तारं सार्द्धवेदाङ्गुलं भवेत्
अक्षगुल्फद्वयोर्मद्ध्ये विस्तारन्तु शरांगुलम् १३३
तलमद्ध्यमविस्तारं सार्द्धभूतांगुलं भवेत्
तलाग्रस्य तु विस्तारं रसांगुलमिति स्मृतम् १३४
अक्षात्पाष्णर्यन्तरं भागं पाष्णर्युत्सेधन्तु तत्समम्

अद्धादंगुष्ठमूलन्तु नवमात्रार्द्धमिष्यते १३५
पादांगुष्ठायतं भागं तत्तारं तु षडंगुलम्
त्रियवेन चतुर्मात्रं प्रदेशन्नयायमिष्यते १३६
यवेन मात्रविस्तारं देशिकस्य विधीयते
अंगुष्ठतर्जनी मद्धये रंध्रन्तु त्रियवं भवेत् १३७
माल्यायामं त्रिमात्रार्द्धं विस्तारांगुलकं स्मृतम्
मात्रार्द्धानामिका दैर्घ्यं तत्तारमंगुलं भवेत् १३८
कनिष्ठाद्यंगुलायामं तत्तारमंगुलं स्मृतम्
दशयवञ्च पञ्चार्द्धं चतुरर्द्धञ्चतुर्यवम् १३९
त्रियवार्द्धं यवन्तारमंगुष्ठादि नखा स्मृता
विस्तारं सममायामं नखानां परिकीर्तितम् १४०
षट्सप्तत्यंगुलेनैव उरोनाहं प्रकीर्तितम्
नाभिदेशस्य नाहन्तु त्रिचत्वारिंशदंगुलम् १४१
श्रोणिदेशस्य नाहन्तु पञ्चदशांगुलं भवेत्
अन्येषाञ्चैव देवानामथनाहं विधीयते १४२
तत्तारं त्रिगुणी कृत्य तित्थ्यंशं विभजेत्तथा
त्रिगुणी कृततारेण एकांशं संप्रयोजयेत् १४३
तन्नाहञ्चैव सर्वेषां नाहमित्यभिधीयते
उष्णीषात्पृष्ठकेशान्तं सार्द्धत्रयोदशांगुलम् १४४
ग्रीवायामन्तु भागं स्यात्तत्समन्तु ककुद्भवेत्
ककुदः कटिसन्धिश्च सप्तविंशतिमात्रतम् १४५
गन्थप्रदेशं तस्याधस्सार्द्धत्रयोदशांगुलम्
तस्यायं पृष्ठकायामं सार्द्धवेदांगुलं भवेत् १४६
ऊर्वायामन्तु तस्याधस्सार्द्धद्वाविंशदंगुलम्
जान्वायामं तु भागं स्यात् जंघांघ्रिनवमात्रकम् १४७
पाष्णर्यायामन्तु भागं स्यात् पृष्ठायामं प्रकीर्तितम्

कर्णयोरंध्रपृष्ठे च द्वादशांगुलमुच्यते १४८
कद्मयोरन्तरं पृष्ठे सप्तविंशतिमात्रकम्
पृष्ठावधिं समारभ्य तस्योर्ध्वे दशमात्रतः १४९
स्फिक्पिण्डे कारयेदूर्ध्वे मूलात् भागस्तदुन्नतम्
पूर्वं लिंगोद्भवं बिंबं द्वितीयं चंद्रशेखरम् १५०
तृतीयं दद्मिणामूर्तिं चतुर्त्थं कामनिग्रहम्
पञ्चमन्तु विवाहं स्यादुमयासहितन्तु षट् १५१
सप्तमन्तु वृषारूढमष्टमं त्रिपुरान्तकम्
नवमञ्चार्द्धनारीशं कंकाळं दशमं भवेत् १५२
नृत्तमूर्तिं ततः प्रोक्तं भिद्माटनमतः परम्
त्रयोदशन्तु कालारिर्हरिरर्द्धञ्चतुर्दश १५३
सुखासनं ततः प्रोक्तं गंगाधरन्तु षोडशम्
चण्डेशानुग्रहं पश्चात् मुखलिङ्गमतः परम् १५४
अष्टादशानामेतेषां बिंबरूपं वदाम्यहम्
अयामं यत्तु लिंगस्य भूतांशं विभजेत्ततः १५५
ऊर्ध्वे व्योमांशकन्त्यक्त्वा मूले चैव तथाभवेत्
तन्मद्धये कारयेद्धीमान् चंद्रशेखरमूर्तिताम् १५६
अजविष्णू द्विपार्श्वे द्वौ नमस्कृत्वा तु कूलकौ
धर्मांशं विभजेल्लिंगं शरांशमुदयान्तयोः १५७
लिंगोर्ध्वे कारयेद्धंसमधस्तात्सूकराननम्
विष्णुं संकल्पयेदुर्वी मानेनैव च कर्षितम् १५८
बिंबस्य द्विमुखेनैव हंसरूपन्तु कारयेत्
अधुनालंबमानन्तु प्रवद्म्यामि समासतः १५९
ललाटघ्राणहन्मद्धये श्रोणी तु स्पृश्यमद्धयमे
मेढ्रमूलस्य मद्धयन्तु पादद्वयोश्च मद्धयमे १६०
द्वयंगुष्ठमूलयोर्मद्धये स्थितं यच्छिवसूत्रकम्

उष्णीषात्तु ककुद्वंश खण्डस्फिक्पार्ष्णिमद्धयगम् १६१
ऋजुस्थितिरिति ख्यातं पृष्ठसूत्रन्तु लंबयेत्
वक्त्रान्तात् पिप्पलीमूलात् गळपार्श्वात्क्रमेण तु १६२
स्तनमण्डलमद्धयाच्च श्रोणिकट्याश्च पार्श्वकान्
नळिकादंगुलं नीत्वा तलमद्धये विलंबयेत् १६३
लंबमानमिति प्रोक्तं उपानस्य विधिं श्रुणु
ऊरुमूलान्तरं मात्र जानुमद्धये कलार्द्धकम् १६४
सार्द्धपद्मांगुलेनैव जंघान्तरमिति स्मृतम्
नाळकान्तं शरांगुल्यं भागं पाष्णर्यन्तरं भवेत् १६५
अंगुष्ठाग्र द्वयोर्मद्धये यवकञ्चेति कीर्तितम्
सार्द्धपञ्चांगुलं मद्धये श्रोणिप्रकोष्ठमूलयोः १६६
पार्श्वमद्धयमबाहौ च मद्धयमे कौशिकांगुलम्
कर्तरी नामिकाबाह्वोरन्तरं दशमात्रकम् १६७
मणिबन्धकबाह्वोश्च द्वयन्तरन्तु यवंभजेत्
कर्तरी नामिकायास्तु हिक्कामद्धयात्तदन्तरम् १६८
एकत्रिंशतिमात्रं स्यात् कर्तव्यार्द्धन्तु दोस्फमम्
पादाग्राङ्गुष्ठमूलात्तु नाभे सत्वेऽङ्गुलं भवेत् १६९
पादाग्राग्रं स्तनान्तं स्यात् तयोर्मद्धयन्तरं यवम्
वरदञ्चेत्तु तत्पृष्ठं नाभेस्तु सममुच्यते १७०
कटिकाधः प्रदेशन्तु मेढ्रमूलं समं भवेत्
ऋज्वागतिस्थितिं वामा द्वरदाभयहस्तकम् १७१
कृष्णापरशुसंयुक्तं कारयेदिन्दुशेखरम्
अधोभागे तु भागेन जान्वन्तन्तु न दृश्यकम् १७२
एवं लिङ्गोद्भवं कुर्यात् चंद्रशेखरमुच्यते
लिंगञ्च विष्णुरूपञ्च विनाकुर्विन्दुशेखरम् १७३
इन्दुशेखरमाख्यातं दक्षिणामूर्तिरुच्यते

द्विविधं दक्षिणामूर्तिं व्याख्यानं मूर्तिकन्तथा १७४
गेयमूर्तिं तयोश्चैव लक्षणन्तु विधीयते
चतुर्भुजं त्रिणेत्रञ्च द्वीपिचर्माबरान्वितम् १७५
आवृतालंकृताभंगी शश्यर्ककुसुमान्वितम्
सदशन्दक्षिणं हस्तं पुस्तकं वामहस्तके १७६
सव्यके चाक्षमालाञ्च व्याळं वै वामहस्तके
पादाग्रे दृष्टिपातन्तु किञ्चित् भंगसमायुतम् १७७
लंबितं दक्षिणं पादं तस्योर्वग्रस्य चोपरि
वामपादस्य नळकं संयुतं कारयेत्सुधीः १७८
नासाग्रे मेढ्रमूलस्य वामे भागेन्तरास्थितम्
वामे हृन्मद्धयमात्सूत्रादन्तरञ्चांगुलं भवेत् १७९
नाभेर्वामे तु सूत्रन्तु द्वयन्तरं कोलकं भवेत्
एवं वै शिवसूत्रन्तु तत्पातालंबयेत्क्रमात् १८०
सूत्रादक्षांघ्रिपार्ष्णिश्च मद्धये सार्द्धमयन्तु वा
यमन्तु कारयेद्धीमान् सदशं हस्तकोच्चकम् १८१
चूचुकोच्च समन्तस्य अंगुष्ठं मूलकान्ततः
नाभेस्तु त्र्यंगुलञ्चैव द्वयन्तरं परिकीर्तितम् १८२
वामे तु वरदं हस्तं ऊर्ध्वे तु तलपृष्ठयोः
द्वयन्तरं भावमित्युक्तं नाभेस्तु मणिबन्धकात् १८३
द्वयन्तरं त्वितिविख्यातमेकोनविंशदंगुलम्
पार्श्वमद्धयमबाह्वोश्च द्वयन्तरन्तु षडंगुलम् १८४
परहस्तमणेश्चैव बाहुमद्धयाद्यमान्तकं
मद्धयांगुलाच्च दोर्मूलात् द्वयन्तरन्दशमात्रकं १८५
हिक्कासूत्राद्विमात्राथ समं हस्तस्य चोच्छ्रयं
हिक्कामद्धयं समारभ्य कटके मणिबन्धकान् १८६
द्वयन्तरं त्रियमं प्रोक्तं दृष्टिसंघैस्समावृतं

अगस्त्यश्च पुलस्त्यश्च विश्वामित्रोङ्गिरास्तथा १८७
एव व्याख्यानमूर्तिन्तु गेयमूर्तिं श्रुणुष्वथ
कटकं दक्षिणं हस्तमधोमुखन्तदुच्यते १८८
वामहस्तन्तु कटकमूर्द्ध्ववक्त्रन्तदुच्यते
तंत्रिनिवेशयेदूरुकराग्रे दक्षिणपादके १८९
वामहस्तस्य कटके सव्यहस्तन्तथोपरि
हिक्कामद्धयं समारभ्य कटके मणिबन्धनात् १९०
त्रिंशन्मात्रमिति प्रोक्तं दक्षिणे कटके तथा
नाभ्यादिमणिबन्धान्तं द्वयन्तरं यवमुच्यते १९१
ऊरुबाह्यं त्रिमात्रन्तु कटाकोर्द्ध्वे युगांगुलं
दण्डायाममिति प्रोक्तं विस्तारन्तु द्विमात्रकम् १९२
वापुवक्त्रन्तु षण्मात्रमुत्सेधन्तु तदर्द्धकम्
एतदेवविशेषन्तु शेषं पूर्वोक्तवत् भवेत् १९३
दक्षिणामूर्तिमेवं स्यात् श्रुणुमन्मथनिग्रहं
त्रिणेत्रञ्चतुर्भुजं देवञ्जटामकुटमण्डितं १९४
उग्रदृष्टिसमायुक्तमक्षमालोरगन्धरं
दक्षिणे तु पताकाच वामहस्तन्तु सूचिका १९५
एतदेवविशेषन्तु शेषं व्याख्यानमूर्तिवत्
बेरायामरसांशाच्च त्रिभागं मन्मथायतम् १९६
पीठस्थोवारथस्थोवा कामः काञ्चनसन्निभः
सर्वभूषणभूष्यञ्च दिव्यरूपसमन्वितम् १९७
पुष्पैश्चैव शरैर्युक्तमिक्षुचापञ्च षड्ध्वजम्
मदरागवसन्तैश्च हेमबान्धवसंयुतम् १९८
तापनीदहनीविश्वमोहिनी विश्वमर्दनी
मादिनी नामनिर्दिष्टास्तस्य पञ्चशरा इमे १९९
कार्मुकं वामहस्ते तु बाणन्तु सव्यहस्तके

देवस्याभिमुखं कुर्यात् कामरूपं प्रपादितम् २००
कामनिग्रहमेवं स्याच्छृणु वैवाह्यमूर्तिनम्
सचंद्रार्द्धजटामौली सौम्यं प्रथमयौवनम् २०१
चतुर्भुजं त्रिणेत्रञ्च हारकेयूरभूषितम्
मेखलोदरबन्धश्चद्यौमवस्त्रधरं शुभम् २०२
वासुकी कुण्डलं काञ्ची तद्यको हारपुष्करं
किञ्चित्त्रिभंगिकंकायं दद्यपादन्तु कुञ्चितम् २०३
वरदं वामहस्तन्तु कृष्णापरशुहस्तकम्
देवस्य दद्यहस्ते तु देवी हस्तन्तु संयुतम् २०४
नास्यन्तं वापि चास्यान्तं हिक्कासूत्रसमन्तु वा
पीनोरः पीतगन्धाञ्च पीनस्तनसमन्विताम् २०५
द्विबाहुकां द्विनेत्राञ्च सर्वाभरणभूषिताम्
दुकूलवसनां देवीं कुर्याद्देवस्य सव्यके २०६
देवस्यायाममानन्तु विभजेद्वा दशांगुलम्
रुद्रांशं वानवांशं वा वस्वंशं वैकहीनकम् २०७
आयामन्तद्धरेः प्रोक्तन्तस्य बाहु समन्वितम्
चिबुकान्तं वाथ कद्यान्तं लद्यायामं प्रकीर्तितम् २०८
विष्णुबिंबसमं वापि तद्वस्त्वंशैकहीनकम्
सप्तभागैकहीनं वा रसांशैकविहीनकम् २०९
अजायाममिदन्तस्य चतुर्भागैकभागता
अग्निज्वालोच्छ्रयं प्रोक्तन्तस्यार्द्धं विस्तृतं भवेत् २१०
देवमानांगसंयुक्तं कारयेत्तु विचद्यणः
ललाटनासिका मद्धयाद्वामपादस्य गुल्फकान् २११
व्यपोह्याभ्यंतरे मात्रं तत्रस्थं शिवसूत्रकम्
तत्सूत्रात् स्तनमद्धयाच्च दद्यिणे चांगुलांतरम् २१२
सत्सूत्रान्नाभिमद्धयाच्च वामे व्योमांगुलांतरम्

एवं स्याच्छिवसूत्रं तु द्वयंतरन्त्वधुनाश्रुणु २१३
वरदस्य तलं पृष्ठन्नाभिसूत्रसमं भवेत्
नाभेस्तु मणिबन्धांतादेकोनं विंशदंगुलम् २१४
पार्श्वमद्धयमबाह्वोश्च द्वयन्तरं कौशिकांगुलम्
मेढ्रमूलसमं कुर्यात् कटकं लळितन्तथा २१५
नाभेस्तु मणिबन्धान्तात् द्वयन्तरं स्मृतिमात्रकम्
पार्श्वमद्धयमबाह्वोश्च द्वयन्तरन्तु शरांगुलम् २१६
द्वयन्तरं दीपबाह्वोश्च चंद्रशेखरवत्कुरु
पादांगुष्ठद्वयोर्मद्धये सार्द्धत्रयोदशांगुलम् २१७
तत्रिभागैकभागन्तु पाष्णर्योद्वन्तरकं भवेत्
एतत्कुञ्चितपादन्तु द्विमात्रं वक्त्रमुच्यते २१८
देवस्य सूत्रवत्सूत्रं देव्याश्चैव तु लंबयेत्
देव्यादक्षिणहस्तस्य तलमद्धयं हरस्य तु २१९
हस्तेन संगृहीतं तु कारयेत्तु विचक्षणः
नाभेः प्रकोष्ठमूलांतान् द्वयंतरञ्चाब्धिमात्रकम् २२०
पार्श्वमद्धयमबाह्वोश्च द्वयंतरं तु द्विमात्रकम्
लंबितं वामहस्तं तु मद्धयबाहुकपार्श्वयोः २२१
द्वयंतरं शरमात्रं तु ऊरोस्तु मणिबन्धकात्
भागं तु द्वयंतरं प्रोक्तमूर्वग्रं मद्धयमांगुलात् २२२
द्वयंतरं तद्विमात्रं स्यात् पादांतरं तु पूर्ववत्
देविलक्षणमेवं स्यात् लक्ष्म्याश्च लक्षणं शृणु २२३
नागहस्तसमौ बाहू केयूरकटकोज्वलौ
शोभनांबरसंपन्ना श्रोणी च विपुला तथा २२४
मेखला कक्षिसूत्रांगा उमापार्श्वेवगार्त्थता
ललाटनासिकामद्धयात् वामाद्यंगुष्ठकाग्रतः २२५
मद्धयमे तु स्थितं सूत्रं शिवसूत्रमिति स्मृतम्

तत्सूत्राद्योनिमूलाश्च द्वयंतरं तु यवं भवेत् २२६
तत्सूत्रन्दक्षिणे नाभे द्वयंतरवसुमात्रकम्
हस्तो भयाभ्यान्देव्याश्च कटिदेशं स्पृशां कुरु २२७
दक्षिणे ह्युदरस्यैव मद्धये बाह्वोश्च मद्धयमे
द्वयंतरं तु द्विमात्रं स्यात् वामबाहुकपार्श्वयोः २२८
द्वयंतरं भागमित्युक्तं पादांगुष्ठकयोस्ततः
अष्टादशाङ्गुलेनैव द्वयन्तरं परिकीर्तितम् २२९
पाष्णर्योश्च द्वयंतरं तत्र षडंगुलमुदीरितम्
एवं लक्ष्मी समाख्याता विष्णुरूपमथोच्यते २३०
किरीटमकुटोपेतं कटिसूत्रोदरबन्धनम्
केयूरकटकञ्चैव यज्ञसूत्रसमन्वितम् २३१
लंबसूत्रसमायुक्तं पीतांबरसमायुतम्
मकरं कुण्डलोपेतं श्रीवत्सं वक्षसि स्थितम् २३२
शंखचक्रधरं कुण्डं हस्तद्वयेन धारिणम्
जलधारोन्मुखः किञ्चित् वक्रेणैव समायुतम् २३३
ललाटनासिका मद्धयान्मद्धयमे पादयोस्ततः
अंगुष्ठाग्रसमं सूत्रं लंबयेच्छवसूत्रकम् २३४
तत्सूत्राद्वयंतरन्नाभेर्वेदांगुलमिति स्मृतम्
कुणिडकायास्तु चोत्सेधं त्रयोदशांगुलं भवेत् २३५
नवांगुलं तु विस्तारं ग्रीवं वक्षांगुलं भवेत्
कुणिडकाननदेशे तु सव्यहस्तसमायुतम् २३६
कुणिडकाननदेशेन वामहस्ततलद्वयम्
वामहस्ताग्रपृष्ठं तु नाभेस्तु सममुच्यते २३७
नाभेस्तु मणिबन्धाच्च द्वयंतरं सप्तमात्रकम्
विष्णुरूपं समाख्यातं ब्रह्मरूपमथ शृणु २३८
चतुर्भुजञ्चतुर्बाहुं कमण्डल्वक्षधारिणम्

यज्ञसूत्रोत्तरीयन्तु जटामकुटसंयुतम् २३९
सव्यहस्ते ऋमालाञ्च वामहस्ते कमण्डलम्
स्रुवन्दक्षिणहस्ते तु पताकावामहस्तके २४०
अंबुजासनकासीनं ब्रह्माणं होमसम्मुखम्
ललाटनासिकामध्यान्नाभेर्गुल्फस्य मध्यमात् २४१
तत्सूत्रान्मद्धयमान्नाभेर्द्वयंतरं तु शरांगुलम्
पताकांगुष्ठमूलांतान्नाभेरष्टादशांगुलम् २४२
चूचुकोर्द्ध्वे समं कुर्यात्पताकाग्रं विचक्षणः
हृतं तु मणिबन्धायास्तन्नाभेस्तु समं भवेत् २४३
नाभेस्तुमणिबन्धाच्च त्रयोदशांगुलं भवेत्
पार्श्वमद्धयमबाह्वोश्च द्वयंतरं तु षडंगुलम् २४४
उभयोर्जानुसीमान्तमूर्ध्वकायसमं भवेत्
एवं स्यात्बहुरूपन्तु अग्निरूपमथश्रुणु २४५
देवस्यांगुलमानेन चतुर्विंशतिमात्रकम्
अग्निकुण्डन्तु विस्तारं मेखलात्रयसंयुतम् २४६
अग्न्यंगुलं तदुत्सेधं मेखलातारमंगुलम्
तन्मद्धये कल्पयेदग्निं पञ्चपात्रिशिखान्वितम् २४७
एवं वैवाह्यमुद्दिष्टं उमयासहितं श्रुणु
चतुर्भुजं त्रिणेत्रञ्च जटामकुटसंयुतम् २४८
सर्वाभरणसंयुक्तं वरदाभयहस्तकम्
कृष्णापरशुसंयुक्तं दक्षिणे वामकेऽपि च २४९
पत्रन्तु वामकर्णे तु दक्षिणे कुण्डलं भवेत्
उपपीतधरञ्चैव शयनं वामपादकम् २५०
लंबितं दक्षिणं पादं वामे गौरी समायुतम्
तयोर्मद्धये स्थितं स्कन्दस्सर्वलक्षणसंयुतम् २५१
ब्रह्मविष्णूद्विपार्श्वाभ्यां देवीभ्यां युक्तभोगदम्

ललाटनासिकामद्ध्यान्नाभेश्च मद्ध्यमं क्रमात् २५२
लिंगमद्ध्यात्तु पादस्य गुल्फमद्ध्यं स्थितं तथा
श्रोणीसंस्पर्शनं सूत्रं शिवसूत्रमिति स्मृतम् २५३
मुखान्तात्पिप्पलीमूलात् ग्रीवापार्श्वं तथैव च
चूचुकस्य तु मद्ध्यात्तु श्रोणीकत्याश्च पार्श्वकान् २५४
उष्णीकात्तु ककुद्वंशखण्डस्फिक्मद्ध्यमात् गतम्
पृष्ठसूत्रमिदं पार्श्वसूत्रात्तु सार्द्धमात्रकम् २५५
हित्वापार्श्वद्वयोश्चैव ऊर्वायाममतःपरम्
जानुपद्मांगुलश्चैव द्वयमाजानुसीमकान् २५६
दक्षिणं लंबजानुश्च आयश्चैव गुणांशकम्
वामजान्वन्तरात्सूत्रादूर्ध्वकायाच्च मानतः २५७
षण्मात्रं द्वयन्तरं प्रोक्तं नाळका मेढ्रमूलयोः
तलाग्रे ऊरुमद्ध्याच्च द्वयंतरं तु गुणांगुलम् २५८
सूत्रादुल्फांघ्रिपाष्णर्यंतं सार्द्धत्रयोदशाङ्गुलम्
कटके मणिबन्धाधः कटयग्रस्य समं भवेत् २५९
नाभेस्तु मणिबन्धात्तु द्वयंतरं षोडशांगुलम्
हस्तद्वयंतरकं सर्वं चंद्रशेखरवत्कुरु २६०
देवस्य बाहुसीमांतं देव्यास्त्वायाममुच्यते
द्विबाहुकात् द्विनेत्री च करण्डमकुटान्विता २६१
सर्वाभरणसंयुक्तादुकूलवसनान्विता
शयनं दक्षिणे पादं वामपादं तु लंबितम् २६२
कटकं दक्षिणे हस्तं वरदं वामहस्तकम्
ललाटनासिका मद्ध्याद्दक्षिणे च गुणांगुलम् २६३
हित्वा त्रैवन्नयसेत्सूत्रं शिवसूत्रमिति स्मृतम्
तत्सूत्राद्धृदयांताश्च वामे गुणांगुलांतरम् २६४
तत्सूत्राद्दक्षिणे नाभेर्द्वयंतरञ्चांगुलं भवेत्

कारयेत्कटकस्याग्रं चूचुकोर्ध्वसमं तथा २६५
अंगुष्ठमूलनाभेस्तु सार्द्धत्रयोदशांगुलम्
पार्श्वमद्धयमबाह्वोश्च द्वयंतरं पञ्चमात्रकम् २६६
वरदस्य तलस्याधो नाभेस्तु सममुच्यते
नाभेस्तु मणिबन्धाच्च द्वयंतरं षोडशांगुलम् २६७
पार्श्वमद्धयमबाह्वोश्च द्वयन्तरं तु षडंगुलम्
अन्नयानि सर्वकार्याणि देवस्योक्तवदाचरेत् २६८
बेरायामं तु विभजेत् अष्टया चैव भागिकम्
द्विभागं वा गुहायामं बाहुरूपेण कल्पयेत् २६९
द्विभुजश्च द्विनेत्रश्च सर्वाभरणभूषितम्
कटकं दक्षिणे हस्ते वामहस्तं प्रलंबितम् २७०
असीनो वा स्थितो वापि कारयेत्तु गुहं ततः
पद्मपीठोद्धर्वको वापि केवलं पीठकोपरि २७१
भवानीसहितं ह्येवं वृषवाहनमुच्यते
गौरीश्वरौ स्थितौ पीठे वृषभं पृष्ठतस्थितम् २७२
त्रिणेत्रञ्चतुर्भुजञ्चैव जटामकुटसंयुतम्
दिव्यांबरधरो देवस्सर्वाभरणभूषितः २७३
परशुं दक्षिणे हस्ते वामे कृष्णसमन्वितम्
कटकं दक्षिणे हस्तं वृषभस्यैवमस्तके २७४
वामहस्ते प्रकोष्ठन्तु स्थापितं कुरुबुद्धिमान्
ललाटनासिकामद्धयाद्दक्षिणे स्थितपादके २७५
गुल्फमद्धयात्स्थितं सूत्रं शिवसूत्रमिति स्मृतम्
तत्सूत्राद्धत्प्रदेशाच्च वामे चैव गुणांगुलम् २७६
तत्सूत्रादंगुलं नाभेर्दक्षिणे चांगुलान्तरम्
तत्सूत्रान्मेढ्रमूलान्तं दक्षिणे चतुरंगुलम् २७७
तत्सूत्राद्दक्षिणांघ्रिश्च जान्वोश्चैव गुणांगुलम्

मेढ्रमूलसमं कुर्यात् कटकं लळितन्ततः २७८
नाभेस्तु मणिबन्धान्तादेकोनविंशदंगुलम्
पार्श्वमद्धयमबाह्वोश्च द्वयन्तरञ्चाब्धिमात्रकम् २७९
बाहुकूर्परमद्धयोर्ध्वे स्तनसूत्रं न्यसेद्बुधः
पताकाधोमुखो वाथ हंसपक्षमथापि वा २८०
तन्मद्धयमांगुलाग्रन्तु नाभिसूत्रसमं भवेत्
प्रकोष्ठमूलाद्धृदयात् पञ्चविंशतिमात्रकम् २८१
पार्श्वकान्मणिबन्धाच्च त्रयोदशांगुलान्तरम्
तन्मद्धयमांगुलं नाभेर्द्वयन्तरं तिथिमात्रकम् २८२
सभंगस्थानकं कृत्वा पादांगुष्ठद्वयोस्तथा
द्वयंतरं तिथिमात्रं स्यात् पाष्णर्योर्मद्धये शरांगुलम् २८३
वामपादस्य चक्रं तु कोलकञ्चेति कीर्तितम्
इन्दुशेखरवत्कुर्यात्परहस्तौ विशेषतः २८४
तस्यैव वामभागे तु देवीं कुर्याद्विचक्षणः
वृषारूढमिदं प्रोक्तं त्रिपुरारिं श्रुणुष्वथ २८५
चतुर्भुजं त्रिणेत्रञ्च जटामकुटसंयुतम्
सर्वाभरणसंयुक्तं दिव्यांबरसमायुतम् २८६
पत्रं तु वामकर्णे तु दक्षिणे कुण्डलान्वितम्
धनुर्बाणसमायुक्तं कृष्णापरशुसंयुतम् २८७
उपपीतसमायुक्तं सभंगस्थानकं कुरु
वामे कटकहस्तोर्ध्वं हिक्कासूत्रसमं भवेत् २८८
मणिबन्धं समारभ्य हिक्कासूत्रस्य मद्धयमात्
षट्त्रिंशदंगुलञ्चैव द्वयंतरं परिकीर्तितम् २८९
वृषवाहनवच्छेषं कारयेत्तु विचक्षणः
त्रिपुरांतकमेवं स्यादर्द्धनारिं श्रुणुष्वथ २९०
सबालेन्दुजटाभारमैशमर्द्धं तु दक्षिणम्

उमार्द्धं वामभागे तु सीमंततिलकाळकम् २९१
नयनार्द्धं ललाटे तु संयुक्तं दक्षिणांशके
दक्षिणे कुंडलं कर्णे वामकर्णे तु पत्रकम् २९२
कुटिलं पालिकां वामे टंकाभयौ च दक्षिणे
उत्पलं वामहस्ते तु केयूरकटकान्वितम् २९३
उमांशे तु स्तनं कुर्यात् वहकारधरं तु वा
श्रोणयार्द्धदक्षिणे शंभोर्व्याघ्रचर्मकृतांबरम् २९४
उमार्द्धं कटिसूत्रांतं चित्रवस्त्रपरिच्छदम्
नूपुरालंकृतं वामे सव्यपादं तु कुञ्चितम् २९५
आभगेन तथाकुर्यात् सार्द्धनारीश्वरं वपुः
ललाटनासिकामद्ध्याद्वामांघ्रे गुल्फमद्ध्यमात् २९६
पार्श्वमद्ध्यमबाह्वोश्च द्वयंतरं तु षडंगुलम्
पादांकुष्ठद्वयोर्मद्ध्ये द्वयंतरं तिथिमात्रकम् २९७
पार्ष्णिद्वयोश्च मद्ध्ये तु भूतांगुलमिति स्मृतम्
तत्सूत्राद्धत्प्रदेशाच्च दक्षिणे भ्यंगुलांतरम् २९८
तत्सूत्राद्वामके नाभेर्द्वयंतरं चाङ्गुलं भवेत्
तत्सूत्रान्मेढ्रमूलाच्च द्वयंतरं तु युगांगुलम् २९९
वामके कटकस्याग्रे चूचुकोर्द्ध्वसमं भवेत्
नाभेस्तु मणिबन्धांतात् सार्द्धत्रयोदशांगुलम् ३००
पार्श्वमद्ध्यमबाह्वोश्च द्वयंतरं तु षडंगुलम्
पादांगुष्ठद्वयोर्मद्ध्ये द्वयंतरं तिथिमात्रकम् ३०१
पादद्वयोश्च मद्ध्ये तु भूतांगुलमिति स्मृतम्
शेषमन्यच्च सर्वं तु चंद्रशेखरवत् भवेत् ३०२
अर्द्धनारीश्वरं ह्येवं कंकाळं त्वधुना श्रुणु
चतुर्भुजं त्रिणेत्रञ्च कपर्दमकुटान्वितम् ३०३
पादे पादुकसंयुक्तं किञ्चिद्वै गमनोन्मुखम्

सर्वाभरणसंयुक्तं यज्ञसूत्रोपशोभितम् ३०४
शंखं तु वामकर्णे तु दक्षिणेन च कुण्डलम्
क्षौमवस्त्रधरं कुर्यात् दक्षिणे क्षुरिकायुधम् ३०५
डमरुं वामहस्ते तु प्रहरं दक्षिणे करे
कंकाळं दण्डमूलं तु पिञ्छदंडस्य मूलकम् ३०६
वामे त्वपरहस्तेन संगृहीतं तु कल्पयेत्
उभयोर्दण्डकाग्रं तु कंसकोपरिविन्नयसेत् ३०७
कृष्णामुखं गतं हस्तं दक्षिणे परहस्तकम्
नानानागसमायुक्तं किञ्चित्प्रहसिताननम् ३०८
बलिपात्रधरं भूतदेवं वामे तु कारयेत्
भिक्षादानोन्मुखास्त्रीभिर्मोहिताभिस्समाकुलम् ३०९
नानाभूतसमायुक्तं नानालीला समन्वितम्
ललाटमद्धयदक्षे तु मात्रं हित्वा तु सूत्रकम् ३१०
दक्षप्राणपुटात्पार्श्वस्थितांघ्रयंगुष्ठमूलकात्
दक्षभागांगुलं हित्वा तत्स्थानं लंबयेत् बुधः ३११
तत्सूत्राद्धृदयाद्दक्षे द्वयंतरं तु गुणांगुलम्
पूर्वकुंडलदृष्टाग्रं त्वष्टादशाङ्गुलं भवेत् ३१२
तत्सूत्राद्वामके नाभेर्द्वयंतरं तु युगांगुलम्
तत्सूत्रान्मेढ्रमूलांताद्वामोच्चं द्वयंगुलं भवेत् ३१३
पादांगुष्ठद्वयोर्मद्धये त्वष्टादशांगुलं भवेत्
पाष्णर्योश्चैवोभयोर्मद्धये सप्तांगुलमुदीरितम् ३१४
उभयोर्जानुमद्धये तु मुखम्वं प्रकीर्तितम्
अधोमुखं तु कटकं तस्याग्रन्नाभितत्समम् ३१५
नाभ्यास्समं प्रदेशं तु उदरान्मणिबन्धकात्
द्वयंतरं भागमित्युक्तं पार्श्वमद्धयमबाहुकान् ३१६
द्वयंतरं भागमित्युक्तं कटकं कोणसंयुतम्

ढक्कासंयुक्तहस्तं तु वरदञ्चेति कीर्तितम् ३१७
वरदे मणिबन्धाधः कुक्षिमद्धयसमं भवेत्
नाभेस्तु मणिबन्धाच्च द्वयंतरं स्मृतिमात्रकम् ३१८
पार्श्वमद्धयमबाह्वोश्च द्वयंतरं तु शरांगुलम्
हरिणयास्य गताहस्तमूरुमूलादधस्तथा ३१९
एकविंशति मात्रांतं समं तस्याग्रमुच्यते
तद्धस्तकटकं प्रोक्तं कुर्यादधोमुखं तु तत् ३२०
ऊरोश्च मणिबन्धाच्च द्वयंतरं तु यमं भवेत्
पार्श्वमद्धयमबाह्वोश्च द्वयंतरं सप्तमात्रकम् ३२१
हरिणीजिह्वयाहस्तस्याग्रमालेपितं कुरु
कंकाळधारिणं हस्तकटकञ्चेति कीर्तितम् ३२२
कक्षतुल्यं तु तस्याग्रं यमन्दोर्मणिबन्धयोः
बिंबस्य त्रिमुखं वापि सार्द्धत्रिमुखमेव वा ३२३
कारयेत् भूतरूपाणि पञ्चतालेन बुद्धिमान्
देवस्तनसमोच्चं वा कक्षोच्चं वा विशेषतः ३२४
नारी संकल्पयेद्धीमानुभयोः पार्श्वयोरपि
एवं कंकाळमाख्यातं नृत्तरूपमथ श्रुणु ३२५
चतुर्भुजं त्रिणेत्रञ्च सुविकीर्णजटान्वितम्
कुररी वक्षसंयुक्तं बहिः पिञ्चसमन्वितम् ३२६
मौलेर्दक्षे तु धुत्तूरमर्द्धचंद्रसमन्वितम्
दक्षिणे तु जटाग्रे तु जाह्नवीमभिवन्दिताम् ३२७
पत्रं तु वामकर्णे तु दक्षिणे नक्रकुण्डल्
सर्वाभरणसंयुक्तमुपपीतसमन्वितम् ३२८
व्याघ्राजिनां बरोपेतं पादकिंकिणि शोभितम्
जगत्प्रसारितं वामे दक्षिणे भयहस्तकम् ३२९
डमरुं सव्यहस्ते तु वह्निर्वै वामहस्तके

वक्रं तु दक्षिणं पादं अपस्मारोपरिस्थितम् ३३०
उद्धृतं वामपादं तु पादाग्रं दक्षिणानुगम्
ललाटमद्धयदक्षे तु हित्वा सार्द्धाष्टकं यवम् ३३१
तस्मात्तु लंबयेत् सूत्रं दक्षनासापुटांतकात्
दक्षिणांघ्रेस्तु गुल्फस्य मद्धयमादेव पादितम् ३३२
तत्सूत्रकक्षयोर्मद्धये उरःस्मृत्यं गुलं भवेत्
तत्सूत्रकक्षयोरंतर्वामोर्वोर्वसुमात्रकम् ३३३
तत्सूत्राद्दक्षिणे ग्रीवा षडंगुलमिति स्मृतम्
तत्सूत्राद्वामकेशीं वा गुणांगुलमुदाहृतम् ३३४
तत्सूत्राद्दक्षिणे नाभेर्द्वयंतरङ्गांगुलं भवेत्
तत्सूत्रान्मेढ्रमूलांताद्वामभागमिति स्मृतम् ३३५
वामास्फिक्पिण्डिकात् सूत्रात्सप्तानामंगुलं भवेत्
तत्सूत्राद्वक्रपादस्य जानुकात्तु दशांगुलम् ३३६
दक्षिणे बाहुसीमंताद्धिक्कासूत्रस्य मद्धयमात्
यवद्वयाधिकं विंशदंगुलञ्चेति कीर्तितम् ३३७
हिक्कामद्धयं समारभ्य दोस्सीमांतं तु वामके
यवद्वयसमायुक्तं सप्तादशांगुलं भवेत् ३३८
नाभेर्दक्षिणके कुक्षितारं भागमिति स्मृतम्
नाभेर्वामे तु कुक्षौ च तारन्त्रयो दशांगुलम् ३३९
वरदाग्निधरं हस्तं दोस्समञ्चेति कीर्तितम्
शरमात्रं पावकोत्सेधं विस्तारं तु गुणांगुलम् ३४०
त्रिशिखाभिस्समायुक्तं कल्पयेत्तलमद्धयमे
बाह्वोश्च मणिबन्धाच्च चतुस्त्रिंशदंगुलं भवेत् ३४१
डमरुकोपेतहस्तं तु सूचिहस्तमिति स्मृतम्
तत्सूचिहस्तकस्योद्धर्वं कर्णोद्धर्वसममुच्यते ३४२
बाह्वोश्च मणिबन्धाच्च चतुर्विंशदंगुलं भवेत्

वामांघ्रेश्चैव जानूद्ध्वंन्नाभेस्तु सममुच्यते ३४३
वामांघ्रेः पार्ष्णिकाधश्च वक्त्रांघ्रेर्जानुकोपरि
तत्समं त्विति विज्ञेयं तत् पार्ष्णे जानुकां ततः ३४४
चतुस्त्रिंशतिमात्रं तु द्वयंतरञ्चेति कीर्तितम्
मणिबन्धकजान्वोश्च द्वयंतरं तु यवं भवेत् ३४५
दोर्मूलांतसमञ्चैव अभयाग्रं प्रकीर्तितम्
मणिबन्धकबाह्वोश्च द्वयंतरं तु यमं भवेत् ३४६
तस्य कूर्परमद्धये तु व्याळं तत्रैव विन्नयसेत्
चूचुकन्नाभिकामूलात् द्वयंतरं तु यमं भवेत् ३४७
सव्यस्य वामसूत्रस्य मद्धयाद्वै पार्श्वयोस्तयोः
वामबाहुद्वयोर्मद्धये शार्दूलाजिनकन्नयसेत् ३४८
त्रिवक्रायाममानेन अपस्मारं ततः कुरु
चतुस्तालप्रमाणेन भूतरूपेण कारयेत् ३४९
तस्यैव वामपार्श्वे तु देवीं कुर्यात्सलक्षणाम्
भुजंगत्रासमेवं तु भिक्षाटनमथ श्रुणु ३५०
त्रिणेत्रञ्चतुर्भुजन्नग्नं रूपं किञ्चित्स्मिताननम्
आवृतालं कृताभंगी पादे पादुकसंयुतम् ३५१
दक्षिणे तु कराग्रं तु हरीणास्यानुगं भवेत्
दक्षिणावरहस्तं तु डमरुकयुतं भवेत् ३५२
वामे कपालहस्तं तु अपरं पिञ्चधारिणम्
कुञ्चितं दक्षिणं पादं वामपादं तु स्वस्तिकम् ३५३
सभंगस्थानकं कुर्यात् गमनोन्मुखरूपकम्
कपालोपेत हस्तस्य पृष्ठन्नाभिसमं भवेत् ३५४
मणिबन्धाच्च नाभेस्तु द्वयंतरं षोडशांगुलम्
शेषं सर्वविशेषेण कांकाळस्योक्तवत् भवेत् ३५५
एवं भिक्षाटनं प्रोक्तं कालनाशनमुच्यते

चतुर्भुजं त्रिणेत्रञ्च जटामकुटसंयुतम् ३५६
उद्धृतं दक्षिणं पादं वामपादं तु कुञ्चितम्
व्याघ्रचर्माम्बरोपेतन्तीक्ष्णनासोग्रदंष्ट्रकम् ३५७
दक्षिणे तु करेशूलं सूचिहस्तं तु वामके
परशुं दक्षिणे हस्ते नागपाशं तु वामके ३५८
अधोमुखं भवेच्छूलं दृष्टिर्वै कालदेहके
ललाटमद्धयाद्दक्षे तु हित्वा साद्धयाष्टकं यवम् ३५९
तस्मात्तु लंबयेत् सूत्राद्दक्षनासा पुटांतकान्
दक्षिणांघ्रेश्च पाष्णर्याग्रात्पक्षांगुलांतरं स्थितम् ३६०
तत्सूत्राद्वामकेनाभेरंगुल्यद्धयंतरं स्मृतम्
तत्सूत्रान्मेढ्रमूलांताद्दक्षोभागमथांतरम् ३६१
सूत्रजान्वोश्च मद्धये तु रंध्रांगुलमिति स्मृतम्
उच्छृतांघ्रेश्च जानुश्च कटयग्रस्य समं भवेत् ३६२
उद्धृतांघ्रेः स्थलाग्रांता जंघायामस्तु मात्रकम्
सूचिहस्ताग्रकं नाभेस्सममित्यभिधीयते ३६३
मणिबन्धाच्च मद्धयाच्च द्वयंतरं षोडशांगुलम्
शूलोपेतदराग्रं तु कर्णस्योर्ध्वसमं भवेत् ३६४
कर्णाग्रान्मणिबन्धाच्च द्वयन्तरं द्वियवं भवेत्
अपरे तु द्विहस्तौ तु कटकाविति कीर्तितौ ३६५
दोस्समं कटकाग्रन्तु द्वयन्तरन्तु यवं भवेत्
कालनाशनमेवञ्च हरिरर्द्धमथ श्रुणु ३६६
ईशार्द्धं पूर्ववत्प्रोक्तं विष्णवर्द्धे मकुटन्नयेत्
वामे तु द्विभुजोपेतं केयूरकटकोज्वलम् ३६७
स्यान्नक्रकुण्डलं कर्णे कटकं शंखहस्तकम्
अर्द्धपीतांबरोपेतं भूषणैर्भूषणाह्वकैः ३६८
ऋज्वागतन्तथा सर्वञ्चंद्रशेखरवत्कुरु

हरिरर्द्धमिदं प्रोक्तं सुखासनमथ श्रुणु ३६९
चतुर्भुजं त्रिणेत्रञ्च जटामकुटसंयुतम्
अभयं दक्षिणं हस्तं वरदं वामहस्तकम् ३७०
कृष्णापरशुसंयुक्तं वामदक्षिणहस्तयोः
शयनन्दक्षिणं पादं वामपादन्तु लंबितम् ३७१
उमयासहितवत्सर्वं स्कन्दगौरीविवर्जितम्
सुखासनमिति प्रोक्तं गंगाधरमथ श्रुणु ३७२
चतुर्भुजं त्रिणेत्रञ्च कपर्दमकुटान्वितम्
अभयं दक्षिणं हस्तं कटकं वामहस्तकम् ३७३
कपर्दमकुटन्तेन गृहीतं जाह्नवी युतम्
वामदक्षिणहस्तौ तु कृष्णापरशुसंयुतम् ३७४
अभयं पूर्ववत्प्रोक्तं कपर्दोपेतहस्तकम्
कर्णोर्ध्वस्य समं ज्ञेयं कर्णान्तं मणिबन्धयोः ३७५
द्वयन्तरं द्वियवं प्रोक्तं शेषन्तु त्रिपुरारिवत्
तस्य वामे भवानी तु कारयेल्लक्षणान्वितम् ३७६
जान्वन्तं वापि नाभ्यन्तं भागीरथ्यास्तु मानकम्
प्रलंबकजटोपेतमुष्णीषं जलहस्तकम् ३७७
द्विभुजञ्च त्रिनेत्रञ्च वल्कलांबरसंयुतम्
एवं गंगाधरं प्रोक्तं चण्डेशानुग्रहं श्रुणु ३७८
उमासहितवत्सर्वं स्कन्देनैव विना कुरु
किञ्चिदस्मिन्विशेषोस्ति तंविशेषं श्रुणु द्विजाः ३७९
कटकं दक्षिणे हस्तं वरदं वामहस्तके
देवस्य पुरभागन्तु चण्डेशन्तु प्रकल्पयेत् ३८०
देवस्य बाहुमात्रेण चण्डेशाया ममुच्यते
कृताञ्जलिपुटोपेतं चासीनं प्रतिवक्त्रकम् ३८१
देवश्शिरसिचण्डस्य मालया परिभूषयन्

चण्डेशानुग्रहं प्रोक्तं मुखलिङ्गं पुरोक्तवत् ३८२
आभंगसमभंगञ्च अतिभंगं त्रिधा भवेत्
आभंगन्त्र्यंगुलं प्रोक्तं समभंगं युगांगुलम् ३८३
अतिभंगं शरांगुल्यं मानेन्यूनन्तु कारयेत्
देवस्य वक्त्रमानेन मौल्यायामं विधीयते ३८४
अद्धयर्द्धद्विगुणं वापि पादोनद्विगुणन्तु वा
त्रयोदशांगुलं तारमग्रेष्टांशैकहीनकम् ३८५
भिक्षाटने च कंकाळे हर्यर्द्धे चार्द्धनारिके
सुखासने च कामारौ दक्षिणामूर्तिविग्रहे ३८६
न योजयेदुमादेवीं शेषाणान्तु सुयोजयेत्
कर्णान्तमुत्तमं ज्ञेयं हरस्यान्तौ तु मद्धयमौ ३८७
बाह्वन्तमधमं ज्ञेयं देव्यायामं विधीयते
मन्वंगुलप्रमाणेन सर्वायुधानि कारयेत् ३८८
तन्मानेन शिरश्चक्रं शीर्षदेशे तु विन्यसेत्
नृत्तमूर्तिश्च कंकाळं दक्षिणामूर्तिविग्रहम् ३८९
कुन्देन्दुस्फटिकाभासमन्यो विद्रुमसन्निभम्
देवस्य मुखमानेन पद्मोत्सेधमिति स्मृतम् ३९०
पादाधिकमथाद्धयर्द्धं समं वाब्जस्य चायतम्
उत्सेधं द्विगुणं तारमग्रेष्टांशैकहीनकम् ३९१
बेरायामं त्रिभागैकमासने पीठकुंगकम्
बिंबायामयुगांशैकमुत्सेधं स्थानकस्य तत् ३९२
उत्सेधसममायामं पादाधिकमथापि वा
अद्धयर्द्धं वा प्रकर्तव्यं चतुरश्रं समन्ततः ३९३
उत्सेधद्विगुणं वापि सार्द्धद्विगुणमेव वा
पादोनद्विगुणं वापि विस्तारं पूर्ववत्भवेत् ३९४
आयताश्रमिति प्रोक्तं निर्गमेन युतन्तु वा

आयामन्तु त्रिधा कृत्वा भागं निर्गमनं भवेत् ३९५
सप्तभागचतुर्भागमथवा निर्गमं भवेत्
पीठोत्सेधं परिग्राह्य तित्थ्यंशं विभजेत् क्रमात् ३९६
जन्ममेकांशमित्युक्तं युगांशं जगतिर्भवेत्
वेदांशं कुमुदोत्सेधं व्योमांशं पट्टिका भवेत् ३९७
पद्मांशं कण्ठमित्युक्तं पट्टिकांशैवमुच्यते
महापट्टी द्विभागेन कुर्वे तत् भद्रपीठकम् ३९८
उत्सेधं पूर्ववत् भज्य व्योमांशं जन्म उच्यते
जगती चतुरंशेन वप्रमन्यांशकं भवेत् ३९९
व्योमांशं पट्टिकाज्ञेया कन्धरन्तु द्विभागया
एकोनपट्टिकां कुर्यात् महापट्टिव्ययांशकम् ४००
व्योमांशमूर्ध्वपट्टी च श्रीकरं त्विति कीर्तितम्
स्मृत्यंशाविभजेद्दैर्घ्यमुपानं त्वेकमुच्यते ४०१
एकांशेनैव कंपन्तु पद्ममेकेन कारयेत्
कंपमेकेन कर्तव्यं जगती च युगांशकम् ४०२
रुद्राद्यांशन्तु वप्रं स्यात् पट्टमेकेन कारयेत्
पद्मांशेनैव कर्णन्तु कंपमेकेन कारयेत् ४०३
ऊर्ध्वपद्ममथांशेन महापट्टिस्तुर्यंशकम्
एतत्सौन्दरमाख्यातं दैर्घ्यमन्वंशकं भवेत् ४०४
जन्ममेकांशमन्यांशं पद्ममंशेन पट्टिका
चतुरंशेन कर्णन्तु व्योमांशेनैव कंपकम् ४०५
उर्ध्वपद्ममथांशेन महापट्टिद्वयांशकम्
व्योमांशेनोर्ध्वपट्टी च पद्मपीठमिति स्मृतम् ४०६
चतुर्विंशत्पञ्चविंशत् षड्विंशद्भागसंयुतम्
पीठकारं भजेत्तेषु एकांशं वेशनिर्गमम् ४०७
विस्तारं जगती बाह्य दशांशेनोर्ध्वपट्टिका

पङ्क्तित्रययुतं वापि भूतपङ्क्तियुतन्तु वा ४०८
मुनिपङ्क्तियुतं वापि कर्णभागन्तु कारयेत् ४०९

इति पूर्वकारणे प्रतिमालक्षणविधिपटल एकादशः

स्त्रीमानदशतालपटलप्रारंभः

स्त्रीमानं संप्रवक्ष्यामि यथावदनुपूर्वशः
उमां सरस्वतीं दुर्गां सप्तमातॄनुषां महीम् १
ज्येष्ठां लक्ष्मीञ्च मद्धयेन दशतालेन कारयेत्
यावदुत्सेधमानन्तु भजेद्विंशच्छतांगुलम् २
उष्णीषात्केशपर्यन्तं चतुर्मात्रमिति स्मृतम्
केशार्द्धान्तार्द्धपर्यन्तं त्रयोदशांगुलं भवेत् ३
केशान्तादक्षिसूत्रान्तं तत्त्रिभागैकमुच्यते
अक्षिसूत्रात्पुटान्तञ्च तत्समञ्चेति कीर्तितम् ४
तत्पुटाद्धनुपर्यन्तं तत्समं त्वभिधीयते
ग्रीवायामं चतुर्भागं हिक्कासूत्रात्स्तनान्तकम् ५
त्रयोदशांगुलं प्रोक्तं तस्मान्नाभेस्तु तत्समम्
नाभेस्तु योनिपर्यन्तं त्रयोदशांगुलं भवेत् ६
योन्यर्वागग्रकान्तञ्च षड्विंशति च मात्रकम्
जान्वायामन्तु भागं स्यात् जंघाचाप्यूरुतत्समम् ७
तलोत्सेधञ्चतुर्मात्रं कायमानमिति स्मृतम्
मूर्द्धादिपृष्ठकेशान्तं त्रयोदशांगुलं भवेत् ८
मूर्द्धादिपूर्वकेशान्तं सप्तांगुलमिति स्मृतम्
मूर्द्धादिपार्श्वकेशान्तं रंध्रमात्रमिति स्मृतम् ९
भूतांगुलं भ्रुवायामं तन्मद्धये तारकं यवम्
उभयोः पार्श्वयोश्चैव आनुपूर्वात् कृशन्तथा १०
भ्रूमद्धयमूर्ध्वकेशांतं द्विमात्रञ्चेति कीर्तितम्

आरूढकार्मुकाकारं भ्रुवोर्लक्षणसंयुतौ ११
भ्रूसूत्रनासिकामूलादंगुलञ्चेति कीर्तितम्
मध्ये सप्तयवं प्रोक्तं नासिमूलात् भ्रेवाग्रयोः १२
दृगंतरप्रमाणञ्च द्विमात्रं द्वियवं भवेत्
तत्समं स्याद्दगायामं तद्विस्तारं तु मात्रकम् १३
द्वियवं तूर्ध्ववर्मं तु अधोवर्मं यवार्द्धकम्
कनीनिकायवादीर्घा विस्तारं तत्समं भवेत् १४
दृगायामं त्रिधा कृत्वा मद्धयेकं कृष्णमंडलम्
ज्योतिर्मण्डलकं तस्य मद्धयमे तु यवं भवेत् १५
ज्योतिर्मंडलमद्धये तु दृष्टिर्यूकप्रमाणतः
श्वेतरक्तककृष्णैश्च वर्णैर्युक्तन्तु लोचनम् १६
भ्रूसूत्रस्य समं कुर्याच्छ्रोत्रस्योर्ध्वं विशेषतः
अपांगात् कर्णमूलान्तं यवहीनं सप्तमात्रकम् १७
कोलकं कर्णविस्तारमुत्सेधन्तु युगांगुलम्
नळायामन्ततः कुर्यात् रन्ध्रञ्चतुर्यवं भवेत् १८
अपरन्नाळविस्तारं यवक्षीणांगुलं भवेत्
पूर्वन्नाळार्द्धमात्रञ्च विस्तारार्द्धं घनन्तयोः १९
पिप्पलीचार्धमात्रञ्च सुषिरन्तत्समं भवेत्
त्रियवं कर्णपट्टी च श्रोत्रावटन्तु मात्रकम् २०
कर्णयोरन्तरं पूर्वे विंशदंगुलमेव च
प्राणमूलाग्रतारन्तु अर्द्धमात्रमिति स्मृतम् २१
अग्रनासस्तु विस्तारं यवोपेतस्तु मात्रकम्
नासिकापुटविस्तारमेकैकन्तु चतुर्यवम् २२
चतुर्यवं पुटोत्सेधं बाह्ये चार्द्धयवं घनम्
सुषिरं त्रियवं प्रोक्तं वंशविस्तारमंगुलम् २३
अधस्तात्तस्य विस्तारमर्द्धं यवमिति स्मृतम्

पुटसूत्रादधस्तात्तु अग्रनासियवं भवेत् २४
द्वियवं गोजिकातारं गोज्योत्सेधञ्चतुर्यवम्
गोज्यादिनासिकाग्रान्तमश्वन्नयंगुलमुच्यते २५
उत्तरोष्ठस्य विस्तारं त्रियवञ्चेति कीर्तितम्
आस्यायामञ्चतुर्मात्रं वक्त्रत्रयसमन्वितम् २६
यवप्रमाणमेवोक्तमुत्तरोष्ठस्य पालिका
अधरोष्ठस्य विस्तारमंगुलं स्याद्यवाधिकम् २७
द्वयंगुलं स्यात्तदायामं यवस्यात्तस्य पालिका
अर्द्धे त्वाकृतिवत्प्रोक्तं पक्वबिंबफलं भवेत् २८
ऊर्ध्वे षोडशदन्तं स्यादधस्तात्तावदेव तु
ऊर्ध्वदन्तस्य विस्तारं द्वियवन्तत्समासतः २९
अधोदन्तन्तु तस्यार्द्धं कारयेत्तु विचक्षणः
चिबुकञ्चार्द्धमात्रञ्च तन्निम्नन्तु यवं भवेत् ३०
चिबुकात् षडयवं ज्ञेयमधरोष्ठस्य निर्गमम्
अनुचक्रत्रिमात्रन्तु ग्रीवं सुवृत्तकं भवेत् ३१
ग्रीवाग्रस्य तु विस्तारं सप्तमात्रं यवाधिकम्
ग्रीवामूलस्य विस्तारमष्टांगुलयवाधिकम् ३२
बाह्वोश्चैवान्तरन्तिर्यक् द्वात्रिंशदंगुलं भवेत्
पक्षयोरन्तरन्तिर्यगष्टादशांगुलं भवेत् ३३
बाहुमूलस्य विस्तारं सप्तमात्रमिति स्मृतम्
हिक्कासूत्रं तयोर्बाहु षड्विंशदंगुलायतम् ३४
दशकोलंप्रकोष्ठं तु तस्मान्मद्धयांगुलाग्रकात्
त्रयोदशांगुलायामं तस्यार्द्धं तालमुच्यते ३५
शेषं मद्धयांगुलायामं भागं पञ्चयवाधिकम्
देशिन्नयायाममित्युक्तं भागं तु षडयवाधिकम् ३६
एतत्त्वनामिकादैर्घ्यं भागमंगुष्ठकायतम्

तत्समं तु कनिष्ठं स्याद्दशसप्तार्धकाष्टच ३७
सप्तार्द्धं षडयवश्चैव अंगुष्ठान्तरमुच्यते
विस्तारस्याष्टभागैकमग्रे चैव विहीनकम् ३८
सप्तार्द्धञ्चतुरर्द्धञ्च पञ्चार्द्धञ्चतुरर्द्धकम्
त्रियवञ्चनखानां तु तारमंगुष्ठकात्क्रमात् ३९
विस्तारं द्वियवाधिक्यं तखकायाममुच्यते
द्विपर्वोपेतमंगुष्ठं शेषास्त्रिपर्वसंयुताः ४०
तलमद्धयं त्रिरेखाभिस्संयुक्तं तु प्रकल्पयेत्
पद्मांगुलप्रमाणं तु तलमूलघनं भवेत् ४१
तत्घनस्याष्टभागैकमग्रे चैव विहीनकम्
मणिबन्धस्य विस्तारं त्र्यंगुलं द्वियवाधिकम् ४२
प्रकोष्ठमूलविस्तारं द्वियवं पञ्चमात्रकम्
बाहुकाग्रस्य विस्तारं कौशिकांगुलमुच्यते ४३
बाहुमद्धयमविस्तारं सार्द्धकौशिकमात्रकम्
हृदयावधिविस्तारं मन्वंगुलमिति स्मृतम् ४४
हिक्कामद्धयात्स्तनाद्धान्तं रव्यंगुलमिति स्मृतम्
स्तनयोरग्रमद्धयन्तु तत्समञ्चेति कीर्तितम् ४५
कुचमण्डलविस्तारं सार्द्धरन्ध्रांगुलं भवेत्
उन्नतन्दशमात्रन्तु तन्मद्धये चाद्धिमण्डलम् ४६
पद्मांगुलन्तु विस्तारन्तन्मद्धये तु स्तनाद्धकम्
द्वियवन्तस्यविस्तारं वृत्तन्दैर्घ्यन्तु तत्समम् ४७
जठरस्य तु विस्तारं रुद्रांगुलमिति स्मृतम्
नाभिप्रदक्षिणावर्त्तनिम्नं कुर्यात् सलक्षणम् ४८
निम्नं यवद्वयन्तस्य विस्तारं षडयवं भवेत्
ग्रोणिप्रदेशविस्तारं विंशदंगुलमुच्यते ४९
कटिप्रदेशविस्तारं षड्विंशदंगुलं भवेत्

योनिमूलस्य विस्तारं शरांगुलमिति स्मृतम् ५०
अग्रे त्वंगुलविस्तारमानुपूर्वात्कृशन्तथा
योनिरेवं प्रकर्तव्यं पिप्पलस्यैव पत्रवत् ५१
ऊरुमूलस्य विस्तारं आदित्यांगुलमुच्यते
तस्य मद्धयमविस्तारमेकादशांगुलं भवेत् ५२
ऊर्वग्रस्य तु विस्तारन्नवमात्रमिति स्मृतम्
जानुमद्धयमविस्तारं वस्वंगुलमुदाहृतम् ५३
जंघामूलस्य विस्तारमर्द्धेन सप्तमात्रकम्
जंघामद्धयमविस्तारं षण्मात्रं समुदीरितम् ५४
नाळकस्य तु विस्तारश्चतुरंगुलमुच्यते
अर्द्धांगुल्फद्वयोर्मद्धये विस्तारन्तु शरांगुलम् ५५
अंगुष्ठाग्रात्तु मद्धयार्द्धं चतुर्यवसमं भवेत्
अग्रे तलाग्रविस्तारं कौशिकांगुलमुच्यते ५६
तलमद्धयमविस्तारं शरांगुलमुदाहृतम्
तलाग्रस्य घनन्तत्र पद्धांगुलमुदाहृतम् ५७
बाह्ये घनन्तथाग्रन्तु मूलेद्धयर्द्धं द्विमात्रकम्
पादांगुष्ठायतं भागन्तत्समन्तु प्रदेशिनी ५८
त्रिमात्रमद्धयमायामन्नामिकार्द्धं द्विमात्रकम्
कनिष्ठांगुलस्य दैर्घ्यन्तु कोलकश्चेति कीर्तितम् ५९
द्वादशञ्चनवाष्टौ च सप्तार्धं षडयवन्तथा
अंगुष्ठादिकनिष्ठान्तं पादांगुलसुतारकम् ६०
तत्तदंगुलविस्तारादर्द्धं स्यान्नाळविस्तरम्
कद्धात्पाष्णर्यायतं भागमुत्सेधश्चतुरंगुलम् ६१
स्फिक्पिण्डस्य तु विस्तारं सप्तांगुलमिति स्मृतम्
ऊरूमूलं समारभ्य तस्योन्नतं गुणांगुलम् ६२
ककुदः कटिसन्धिश्च षड्विंशन्मात्रमुच्यते

कटिसन्धेर्वस्तिदेशस्त्रयोदशांगुलं भवेत् ६३
अपरेकक्षयोर्मद्धये एकोनविंशदंगुलम्
ककुद्दीर्घं भागमुक्तं विस्तारन्तालमेव तु ६४
हिक्कासूत्रोपरिस्कन्धमानञ्चैव द्विकोलकम्
तन्मद्धयमे चतस्याग्रे द्विमात्रञ्चार्द्धमात्रकम् ६५
अपरे कर्णयोर्मद्धये अर्द्धेनैकादशांगुलम्
सामान्नयलक्षणञ्चैव विशेषमधुनोच्यते ६६
द्विभुजाश्च द्विनेत्राश्च किञ्चित्प्रहसिताननम्
करण्डमकुटोपेता सर्वाभरणभूषिता ६७
दुकूलवसनोपेता सर्वावयवसुन्दरी
दक्षिणे कटकं हस्तं वामहस्तं प्रलंबितम् ६८
आभागन्तु वशात्कुर्यात्सूत्रञ्चैव तु लंबयेत्
नासाग्राल्लंबयेत्सूत्रं दक्षिणे स्थितपादके ६९
गुल्फमद्धयस्थितं सूत्रं शिवसूत्रमिति स्मृतम्
तत्सूत्रात्स्तनमद्धयाश्च वामे स्यात्तु गुणांगुलम् ७०
तत्सूत्राद्दक्षिणेनाभेरंगुलञ्चेति कीर्तितम्
तत्सूत्राद्योनिमद्धयाश्च दक्षिणे चतुरंगुलम् ७१
तत्सूत्राद्दक्षिणे जानुर्मद्धयाश्चैवगुणांगुलम्
अंगुष्ठयोर्द्वयोर्मद्धये सार्द्धत्रयोदशांगुलम् ७२
तत्रिभागैकभागन्तु पाष्णर्योरंध्रमिति स्मृतम्
कटकाग्रस्य चोत्सेधं स्तनकक्षसमं भवेत् ७३
नाभेस्तु मणिबन्धाश्च सार्द्धत्रयोदशांगुलम्
पार्श्वमद्धयमबाह्वोश्च द्वयन्तरं सप्तमात्रकम् ७४
प्रलंबितकरस्याग्रादूरुकोच्चं द्विमात्रकम्
ऊरुकान्मणिबन्धाश्च द्वयन्तरञ्चतुरंगुलम् ७५
पार्श्वमद्धयमबाह्वोश्च द्वयन्तरन्तुरसांगुलम्

पीनोरुः पीनगन्धा च पीनस्तरसमन्विता ७६
द्विबाहुकाद्विनेत्राच श्यामाभाकमलेक्षणा
दक्षिणे चोत्पलं हस्ते वामहस्तं प्रलंबितम् ७७
भवान्याकृतिन्दवं स्यात् वागीश्याकृतिरुच्यते
श्वेतपद्मासनासीनां शुक्लवर्णाञ्चतुर्भुजाम् ७८
जटामकुटसंयुक्तां मुक्ताकुण्डलमण्डिताम्
यज्ञोपवीतिनीं हारमुक्ताभरणभूषिताम् ७९
दुकूलवसनां देवीं नेत्रत्रयसमन्विताम्
सदशन्दक्षिणे हस्ते वामहस्ते तु पुस्तकम् ८०
दक्षिणे चाक्षमाला च करकं वामके करे
वागीश्याकृतिराख्यातादुर्गायाकृतिरुच्यते ८१
ललाटलोचनन्तस्यास्तिलकञ्च शिखामणिः
शशिखण्डकिरीटं वा मकुटं सकरण्डकम् ८२
सनक्रकुण्डलं रत्नमण्डनं कर्णमण्डनम्
कर्णावतं सकाकर्ण चूळिकापाळिकान्वितम् ८३
चतुर्भुजसमायुक्तामष्टाभिर्दोर्भिरन्विताम्
शूलं खड्गं शरञ्चक्रं दक्षिणेषु करेषु च ८४
पाशखेटकशार्ङ्गाश्च शंखं वामकरेषु च
चतुर्भुजे च वामे तु शंखं वामकरेषु च ८५
चक्रञ्चाभयहस्तञ्च दक्षिणे तु समायुता
द्विनेत्रासौम्यवदनामहिषस्य शिरस्थिता ८६
दुर्गायास्वाकृतिर्ह्येवं ब्रह्माण्याकृतिरुच्यते
चतुर्भुजाविशालाक्षी तप्तकाञ्चनसन्निभा ८७
वरदाभयहस्ता च कमण्डल्वक्षमालिका
हंसद्ध्वजाहंसरूढा जटामकुटधारिणी ८८
रक्तपद्मासनासीना ब्रह्माणी ब्रह्मरूपिणी

त्रिणेत्रीशुक्लवर्णाच शूलपाणीवृषद्ध्वजा ८९
वरदाभयहस्ता च साद्यमालाकरान्विता
जटामकुटिनीशंभोर्भूषणीसामहेश्वरी ९०
कुमारसदृशाकन्नचावर्णवाहनकेतुभिः
वासिकाबद्धमकुटा शक्तिकांकुशधारिणी ९१
रक्तवस्त्रामहावीर्या हारकेयूरभूषणी
वरदाभयहस्ता च कौमारी कुंकुमप्रभा ९२
पद्मपत्रविशालाद्यी श्यामवर्णामहाबला
शंखचक्रगदापद्मधराबाहुचतुष्टयी ९३
गरुडध्वजसंयुक्ता वैष्णवी विष्णुभूषणी
कृष्णपीतांबराशार्ङ्गी सर्वसंपत्करी नृणाम् ९४
पवित्रालंकृतोरस्का पादनूपुरसंयुता
सव्ये भयहलञ्चैव मुसलं वरदन्नचके ९५
वराहवक्त्रीवाराही यमभूषणभूषणी
वज्रहस्तागजारूढा लोचनद्वयसंयुता ९६
वस्त्रालंकारसंपन्नागजेंद्रध्वजवाहना
वरदाभयशक्त्याप्त बाहुकेन्दुप्रकीर्तिता ९७
दीर्घजिह्वोर्ध्वकेशा च कृष्णकाकृष्णदंष्ट्रिका
निर्मांसाव्यावृतमुखी चराडीखराडेन्दुमराडिता ९८
काळीकपालमाला च शवारूढा कृशोदरी
कौशिकारोहिणी वासौ चामुराडचागृध्रकेतुका ९९
मांसखराडसुसंपूर्णं कपालं वामपाणिभाक्
शूलाही दद्यिणे चैव वह्निर्वामकरस्थिके १००
व्याघ्रचर्मांबरा काळी त्रिणेत्री शंखकुंडली
लोकानां मातरस्सप्तमातरः अधिका इमे १०१
मातृणामाकृतिः प्रोक्ता उषायाश्चाकृतिं श्रुणु

गोक्षीरधवळप्रख्याद्विभुजा च द्विनेत्रिका १०२
सुस्त्रनाचारुवदना उषानीलाळकान्विता
उषायाश्चाकृतिः प्रोक्ता धरणयाकृतिरुच्यते १०३
चंद्रपुष्करणीतीरे चंद्रमास्सहतारकैः
स्वकरे स्थापितं लिंगं पूजयामासभक्तितः १०४
सुराणां पूजितानाञ्च गीतनृत्तमनोहरैः
सन्निधानप्रदं लिंगं कावेरीमद्धयमे शुभे १०५
श्रीमद्दीर्घपुराधीशं सहस्त्रकिरणं सदा
संपूज्य लोकवन्द्यत्वं पदमव्ययमाप्तवान् १०६
भद्रकाळी स्वयं पश्चात् भक्तियुक्ता महेश्वरी
संपूज्यविधिवल्लिंगं सायुज्यं पदमाप्नुयात् १०७
स्कान्दे – इंद्रपुष्करणी तीरे स्नात्वा नियतमानसाः
क्षाळयन्ति समस्तानि पापानि विविधानि च १०८
यक्षैश्च किन्नरैश्चैव कालेन वरुणेन च
कृशानुनाचमरुता भास्करेण हिमांशुना १०९
व्याघ्रपादहनूमद्भ्यां पातञ्जलिपुरस्सरैः
वसुभिश्चमरुद्भिश्च दानवैश्च युगेयुगे ११०
दिव्यैस्तपोधनैश्चैव पूजितं लिंगमद्भुतम्
करञ्जमूलसंस्थानं शिवलोकेश्वरं शिवम् १११
श्यामवर्णनिभा भास्वद्राजीवसमलोचना
हेमयज्ञोपवीता च द्विभुजा च द्विनेत्रका ११२
सर्वाभरणसंयुक्ता करण्डमकुटान्विता
रक्तांबरधरा चैव दक्षहस्तोत्पलान्विता ११३
धरणयाकृतिरेवं स्यात् ज्येष्ठायाकृतिरुच्यते
पीनोर्वी पीनगण्डा च पीनस्तनभरोदरी ११४
नीलकाळकसीमान्ता समं धम्मिल्लशिरोरुहा

स्निग्धाञ्जननिभा रक्ता बिंबोष्ठी तुंगनासिका ११५
द्विभुजा च द्विनेत्री च कुमुदं दक्षिणे करे
तन्नयापुत्रान्विता देवी दक्षिणे दक्षिणेऽपि च ११६
देव्याबाहुसमं कुर्यात् कन्नयका पुत्रकौ क्रमात्
पुत्रो वृषभवक्त्रस्तु द्विभुजौ च द्विनेत्रकौ ११७
ज्येष्ठाया आकृतिर्ह्येवं पद्मजा कृतिरुच्यते
पद्मपत्रासनासीना पद्माभापद्महस्तिनी ११८
हैमरत्नो ज्वलन्नक्र कुंडलं कर्णमण्डलम्
कमण्डलामलमुखी कर्णपूर्णाय तेक्षिणी ११९
सुयौवना सुरम्यांगा कुञ्चितभ्रूसविभ्रमा
रक्तोष्ठी वीतगन्धाच कञ्चुकाच्छादितस्तनी १२०
शिरसो मण्डनं शंखं चक्रं सीमान्तपादजम्
नागहस्तसमौ बाहू केयूरकटकोज्वलौ १२१
पङ्कजं श्रीफलञ्चैव वामके दक्षिणेऽपि च
शोभनांबरसंपन्ना श्रोणी च विपुलामता १२२
मेखला कटिसूत्रांगलद्मीलद्मीविवर्द्धनी १२३

इति पूर्वकारणे प्रतिष्ठातन्त्रे स्त्रीमानदशतालविधिपटलो द्वादशः

कनिष्ठदशतालविधिपटलप्रारंभः

अथ वक्ष्ये विशेषेण कनिष्ठदशतालकम्
ऋषयश्चाश्विनी चैव आदित्येन्दुगुहास्तथा १
आर्यं शतमखञ्चैव चण्डेशं क्षेत्रपालकम्
कनिष्ठदशतालेन कारयेत्तु विचक्षणः २
बेरायामन्तु विभजेत् हिक्काराधिशतांशकम्
उष्णीषमंगुलं प्रोक्तं केशमानं गुणांगुलम् ३
केशान्ताद्धनुपर्यन्तं मद्धयेन द्वादशांगुलम्

गळवृद्धयर्द्धमात्रेण भागं कर्णमिति स्मृतम् ४
हिक्कासूत्रात्स्तनान्तन्तु अर्द्धेन द्वादशांशकम्
स्तनान्तान्नाभिपर्यन्तं तत्समञ्चैव कीर्तितम् ५
नाभेस्तु मेढ्रमूलांतमर्द्धेन द्वादशांगुलम्
तन्मेढ्रमूलपूर्वाग्रात् पञ्चविंशतिमात्रकम् ६
जानुमानं तु भागं स्यात् जंघोर्वोरुसमं भवेत्
भागं तु चरणोत्सेधं कायमानमिति स्मृतम् ७
उष्णीषात् पृष्ठदेशांतमर्द्धेन द्वादशांगुलम्
उष्णीषात्पार्श्वकेशांतमष्टांगुलमिति स्मृतम् ८
उष्णीषात्पार्श्वकेशान्तं भूतमात्रमिति स्मृतम्
केशान्ताद्धनुपर्यन्तं मानञ्चैव त्रिधा भवेत् ९
केशान्तादक्षिसूत्रान्तमेकांसमिति कीर्तितम्
अक्षिसूत्रात्पुटान्तञ्च तत्समन्तु विधीयते १०
पुटान्ताद्धनुपर्यंतमेकांशेन प्रकल्पयेत्
यवोपेतं त्रिमात्रं तु दृगंतरं प्रकल्पयेत् ११
वस्त्रालंकारसंपन्ना गजेंद्रध्वजवाहिनी
तत्समन्नयनायामं भूतमात्रं भ्रुवायतम् १२
भ्रूमद्धयादूर्द्ध्वकेशांतं यवोपेतं द्विमात्रकम्
भ्रूमद्धयमे यवं तारमानुपूर्वात्कृशाग्रकम् १३
षडयवन्नेत्रविस्तारमूर्द्ध्ववर्मं यवार्द्धकम्
अर्द्धं यवं त्वधोवर्मं करवीरो यवो भवेत् १४
नेत्रायामं त्रिधा कृत्वा मद्धयैकं कृष्णमण्डलम्
कृष्णमण्डलमद्धये तु ज्योतिर्मण्डलकं यवम् १५
दृष्टियूकप्रमाणेन तन्मद्धये परिकल्पयेत्
तारं भ्रुवाग्रयोर्मद्धये यवञ्चेति प्रकीर्तितम् १६
भूसूत्रांतं तु तस्योर्द्ध्वे दैर्घ्यञ्चार्द्धयवं भवेत्

अपांगात् कर्णमूलांतं षण्मात्रञ्चैव षडयवम् १७
कर्णोद्ध्वं भ्रुवसूत्रस्य समञ्चेति प्रकीर्तितम्
द्विमात्रं कर्णविस्तारमायामं तु द्विमात्रकम् १८
पिप्पली चार्द्धमात्रन्तु तत्समं सुषिरं भवेत्
पिप्पल्यानां तु नाळाग्रं मात्राद्वयमिति स्मृतम् १९
अपाङ्गान्नाळविस्तारं यवाद्धाणांगुलं भवेत्
पूर्वन्नाळार्द्धमात्रञ्च तत्तारार्द्धं घनं भवेत् २०
अंतराळं तु मात्रेण कर्णपट्टीयवद्वयम्
द्वयोः कर्णांतरं पूर्वे द्वात्रिंशच्च त्रिमात्रकम् २१
पृष्ठे द्विकर्णयोर्मद्धये द्वादशांगुलमुच्यते
घ्राणमूलस्य विस्तारं त्रियवं समुदाहृतम् २२
नासिकाग्रस्य विस्तारमंगुलञ्चेति कीर्तितम्
पुटांतरार्द्धमात्रञ्च तुंगं तत्सममुच्यते २३
वंशाग्रतारमर्द्धांशमूलं तारं यवं भवेत्
परितो नासिकापाल्या घनमर्द्धयवं भवेत् २४
त्रियवं गोजिकायामं तारमर्द्धाधिकं यवम्
घ्राणांतात् गोजिकायाश्च यवहीनं द्विमात्रकम् २५
उत्तरोष्ठस्य विस्तारं त्रियवञ्चेति कीर्तितम्
तस्यायामञ्चतुर्मात्रं वक्त्रत्रयसमन्वितम् २६
अधरोष्ठस्य चायामं मात्रद्वयमुदाहृतम्
तस्यार्द्धं तस्य विस्तारं चुबुकं तु यवद्वयम् २७
विस्तारं तत्समं ज्ञेयन्निम्नमर्द्धयवं भवेत्
यवहीनांगुलं तस्मादधरोष्ठस्य निर्गमम् २८
ऊद्ध्वर्पालीमधःपालीं कुर्यादर्द्धयवेन तु
शिवमूलस्य विस्तारं वस्वंगुलमिति स्मृतम् २९
शिवाग्रस्य तु विस्तारं सार्द्धसप्तांगुलं भवेत्

वक्षस्थलस्य विस्तारं सप्तविंशति मात्रकम् ३०
पञ्चविंशतिमात्रं तु बाहुयामं प्रकीर्तितम्
आयामं तु प्रकोष्ठस्य एकोनविंशदंगुलम् ३१
मद्धयांगुलाग्रात्तस्याग्रादर्द्धेन द्वादशांगुलम्
तस्यार्द्धं तु कलायामं शेषं मद्धयांगुलायतम् ३२
द्वयंगुलद्वयवाधिक्यमंगुष्ठाया ममिष्यते
सार्द्धं वेदांगुलं प्रोक्तन्नामिकायास्तु दैर्घ्यकम् ३३
तथैव नामिकायास्तु भागं कनिष्ठिकायतम्
धर्माब्धिवसुषट्भूतं यवमंगुष्ठकान् क्रमात् ३४
कनिष्ठांगुलमंतं तु विस्तारं तु विधीयते
विस्तारस्याष्टभागैकमग्रतारविहीनकम् ३५
विस्तारं तु त्रिधा कृत्वा द्विभागन्नखविस्तरम्
तत्तारात्तु यवाधिक्यं नखायामं प्रकीर्तितम् ३६
अष्टांगुलं द्विपर्वं स्यादन्नयेषां तु त्रिपर्वकम्
तलमद्धयत्रिरेखाभिस्संयुक्तं परिकल्पयेत् ३७
तलमूलप्रदेशस्य घनं कोलकमुच्यते
अष्टांशहीनमग्रे तु तत् घनं परिकीर्तितम् ३८
तलायामसमं ज्ञेयं तलस्यैव तु तारकम्
मणिबन्धस्य विस्तारं मात्रं तु द्वियवाधिकम् ३९
प्रकोष्ठमूलविस्तारं शरमात्रञ्चतुर्यवम्
बाहुमूलस्य विस्तारं षण्मात्रं तु चतुर्यवम् ४०
बाहुमद्धयमविस्तारं सप्तांगुलमुदाहृतम्
बाहूमूलस्य विस्तारं वस्वंगुलमुदाहृतम् ४१
हिक्कासूत्रात्तु कक्षांतं वस्वंगुलमुदाहृतम्
द्वात्रिंशदंगुलं प्रोक्तं कक्षयोरंतरं ततः ४२
हृदयावधिविस्तारं अष्टादशांगुलं भवेत्

उदरस्य तु विस्तारं सप्तदशांगुलं स्मृतम् ४३
श्रोणिप्रदेशविस्तारं स्मृत्यंगुलमुदाहृतम्
षडयवं नाभिविस्तारं निम्नमर्द्धयवं भवेत् ४४
स्तनमण्डलविस्तारमर्द्धांगुलमुदाहृतम्
चूचुकं द्वियवं प्रोक्तमुत्सेधं तत्समं भवेत् ४५
हिक्कामद्धयात्स्तनांताच्च अर्द्धेन द्वादशांगुलम्
उभयोस्तनाद्वयोर्मद्धये अर्द्धेन द्वादशांगुलम् ४६
मुक्तायामं तु भागं स्यात् विस्तारं तत्समं भवेत्
शेफं पञ्चांगुलं दैर्घ्यं मुकुळोत्पलवद्भवेत् ४७
कटिप्रदेशविस्तारं स्मृत्यंगुलं त्रिपादकम्
ऊरुमूलस्य विस्तारमर्द्धेन द्वादशांगुलम् ४८
ऊर्वग्रस्य तु विस्तारं सार्द्धरंध्रांगुलं भवेत्
जानुमद्धयस्य विस्तारमर्द्धेनाष्टांगुलं भवेत् ४९
जंघामूलस्य विस्तारमर्द्धेन कौशिकांगुलम्
नाळकस्य तु विस्तारमर्द्धेन चतुरंगुलम् ५०
अंघ्रेस्तालाग्रविस्तारं कौशिकांगुलमुच्यते
तलमद्धयमविस्तारं भूतांगुलमुदाहृतम् ५१
अंगुष्ठस्य तु दैर्घ्यं तु चतुरंगुलमुच्यते
तस्याग्रात् गुल्फमद्धयाच्च अर्द्धेन द्वादशांगुलम् ५२
नामिकायास्समायामं भागञ्चैव यवाधिकम्
मद्धयांगुलं ततः प्रोक्तं भागं त्वनामिकायतम् ५३
कनिष्ठांगुलिकाया ममर्द्धेनैव गुणांगुलम्
मुन्नयद्रिनवनाडयाख्य त्रयोदशयवं क्रमात् ५४
कनिष्ठाद्यंगुलीनाञ्च विस्तारं तु विधीयते
अग्रे मूले समं प्रोक्तं विस्तारं तु त्रिधा भवेत् ५५
द्विभागं नखविस्तारमायामं तत्समं भवेत्

तलाग्रांगुष्ठमूले तु द्विमात्रं तु घनं भवेत् ५६
कनिष्ठमूले तस्याग्रे घनन्नवयवं भवेत्
अग्रयपाष्णर्यांतकं भागं पाष्णर्योत्सेधं तु तत्समम् ५७
पृष्ठमण्डलविस्तारं नवमात्रमुदाहृतम्
पद्मो दण्डाच्च वस्तौ तु पञ्चविंशतिमात्रकम् ५८
ककुद्भागमिति प्रोक्तं भागितम्मूल तारकम्
हिक्कायाः स्कन्धमूलांताश्चतुरंगुलमुच्यते ५९
मद्धये चाग्रे क्रमेणैव कोलकश्चैकमात्रकम्
कद्मयोरंतरं पृष्ठे चतुर्विंशति मात्रकम् ६०
एवं लद्मणमाख्यातं तेषामाकृतिरुच्यते
अगस्त्यश्च पुलस्त्यश्च विश्वामित्रः पराशरः ६१
जमदग्निश्च वाल्मीकी सनत्कुमारश्च सप्त च
शुक्लवस्त्रधरास्सर्वे शुक्लयज्ञोपवीतकाः ६२
शुक्लवस्त्रोत्तरीयाश्च जटावल्कलसंयुताः
कमण्डल्वद्महस्ताश्च दीर्घश्मश्रूसमन्विताः ६३
ऋषीणामाकृतिः प्रोक्ता अश्विन्नयाकृतिरुच्यते
उभयोस्सोपवीतौ तौ चूडामकुटधारिणौ ६४
फुल्लरक्तोत्पलाद्मौ च पीतस्त्रक् शुक्लवस्तकौ
अश्विन्याकृतिरेवं तु सूर्याकृतिं श्रुणुष्वथ ६५
एकचक्रस्ससप्ताश्वस्ससारथिमहारथम्
कृत्वा तु स्थापयेत्सूर्यं पुरुषाकृतिरूपिणम् ६६
तदर्द्धं वामतश्श्यामं नारीरूपसमन्वितम्
कृत्वा तु स्थापयेत्सम्यक्सर्वाभरणभूषितम् ६७
आकुञ्चितसुकेशं च प्रभामण्डलसयुतम्
मकुटं वा विधातव्यमन्यत्सर्वं सुमण्डलम् ६८
हस्तद्वयलसत्पद्मं कञ्चुकाञ्चितविग्रहम्

एकवस्त्रं द्विदोर्दण्डं स्कन्धेसक्तकरांबुजम् ६९
रथोपेतं विनावाथ केवलं पद्मसंस्थितम्
पादौ सखेटकौ तस्य स्थिरं पद्मासने स्थितम् ७०
जातिहिंगुल्य वर्णस्थासंस्थाप्यं सूर्यमण्डलम्
वैकर्तनो विवस्वांश्च मार्ताण्डो भास्करो रविः ७१
लोकप्रकाशकश्चैव लोकसाक्षी त्रिविक्रमः
आदित्यश्च तथा सूर्य अंशुमांश्च दिवाकरः ७२
एते वै द्वादशादित्या एषामाकृतिरुच्यते
द्विभुजाश्च द्विनेत्राश्च पद्मस्थाः पद्महस्तकाः ७३
रक्तांबरसुवर्णाश्च प्रभामण्डलमण्डिताः
उपवीतसमायुक्तास्सर्वाभरणभूषिताः ७४
आदित्याकृतिरेवन्तु चंद्राकृतिरथोच्यते
चित्रसिंहासनासीनः कुन्दस्फटिकसन्निभः ७५
प्रभामण्डलसंयुक्तो द्विबाहुश्च द्विनेत्रकः
आसीनोवास्थितो वापि कुमुदप्रज्वलत्करः ७६
तस्य दक्षिणभागे तु रोहिणी द्विभुजान्विता
सस्यांकुरनिभासाभ्याद्राजी वसमलोचना ७७
चंद्राकृतिस्समाख्याता स्कन्दस्याकृतिरुच्यते
रक्तांबरसदृक् स्तोकबालोबालार्कसन्निभः ७८
शिखण्डमणिकोग्रीवमांसलः प्रियदर्शनः
शक्तिस्तु विलसत्खट्ग चक्रपाशप्रसारितः ७९
दक्षिणे दक्षिणे रक्तजूटखेटककार्मुकः
पताकापिञ्छिकामुष्टिस्तर्जनी च प्रसारिता ८०
गुहोद्वादशबाहुस्स्यात् पुरीखेटकपत्तने
चतुर्दोर्भिर्वाथ षड्दोर्भिस्संयुक्तः परिकल्पयेत् ८१
सशक्तिस्सहयस्सासिस्साक्षमालस्सकुक्कुटः

सखेटश्च सषट्बाहुश्चतुर्दोस्वस्तिखेटकः ८२
सशक्तिः कुक्कुटश्चेकवक्त्रकः कुंकुमच्छविः
मयूरारोहसर्वत्र भ्रामराह्य द्विबाहुकः ८३
वासिकाबद्धमकुटस्सुब्रह्मण्यस्सुसुन्दरः
स्कन्दस्याकृतिरेवन्तु आर्यस्याकृतिरुच्यते ८४
मोहिनी तनयश्शान्तो द्विबाहुश्श्यामसन्निभः
पीठालंबितशायीतो वामदक्षिणपादकौ ८५
वामांघ्रिजानुकोद्ध्वें तु वामहस्तस्थितां कुरु
मण्डली भूतदण्डाग्रो वज्रदण्डधरो युवा ८६
स्निग्धनीलाञ्जनाकीर्णः कुन्दळी भूतभूद्ध्वजः
गजवाहनकेतुस्स्याद्विलासीसविलासिनी ८७
नीलश्वेतश्च वृषभ वाहनोवा चतुर्भुजः
रक्तचूडद्ध्वजो वापि सर्वत्र परिकीर्तितः ८८
ज्ञानीयोगासनासीनो वेदाद्धयायी पवित्रकः
सोभयांसोपवीतस्स्यान्नयूनावीरासने स्थितः ८९
लीलाविभीतभावी स्यात् सुरभावी सुखासनः
वामोरूपरिविन्नयस्तवामपादतले क्षणः ९०
आर्यस्याकृतिरेवन्तु शक्रस्याकृतिरुच्यते
वज्रपाणिर्महावीरस्सिंहस्कन्दोवलीलधृक् ९१
ललाटोरस्थलायाम पीवरोरुर्म्महोदरः
प्रसन्नवदनश्चयाम वर्णोरक्तांबरस्सुखी ९२
किरीटकुण्डलीहार केयूरादिविभूषितः
पृथुशीर्षो गजारूढो देवराजश्शचीपतिः ९३
शक्रस्याकृतिरेवन्तु चण्डेशस्याकृतिं शृणु
चण्डीचण्डेश्वरो रक्तश्वेतमिश्रश्च विस्तरः ९४
द्विबाहुस्सजटाचूढ शेखरः कर्णकुण्डलः

धृतयज्ञोपवीतश्च शुक्लांबरधरश्शुचिः ९५
सर्वभूषणसंभूष्यष्टं कपाणिरथापि वा
अर्द्धचंद्रासनासीनः पुष्पमालावलंबितः ९६
चरुडेशस्याकृतिर्ह्येवं क्षेत्रपालाकृतिं शृणु
रक्तोग्रेक्षणः काळमेघवर्णो वापि महाबली ९७
द्विबाहुर्वा चतुर्बाहुरष्टबाहुरथापि वा
कपालशूलो द्विभुजो घरुटापाशसमायुतः ९८
चतुर्बाहुः क्रमात्क्षेत्र पालो वामे च दक्षिणे
अग्निटंकौ चखट्वांगा भयमष्टभुजे क्रमात् ९९
रक्तपद्मासनारूढः श्यामवर्णोग्ररूपकः
विसृतोद्ध्वों रक्तकेशः कुंचितभ्रूसविभ्रमः १००
नग्नरूपशिरोमाला भूषितस्तीक्ष्णदंष्ट्रकः १०१
इति पूर्वकारणे प्रतिष्ठातन्त्रे कनिष्ठदशतालविधिपटलो त्रयोदशः

नवतालोत्तमपटलप्रारंभः

अथातस्संप्रवक्ष्यामि नवतालोत्तमं भवेत्
मुखद्वादशमात्रं स्यात् भागन्तु चतुरंगुलम् १
चतुर्भागाष्टवक्त्रैश्च कारयेल्लक्षणान्वितम्
विद्येशालोकपालाश्च अष्टमूर्तिवसूंस्तथा २
कारयेदन्नयदेवांश्च नवतालोत्तमेन तु
अनन्तेशस्तथासूक्ष्मशिवोत्तमश्चैकनेत्रकः ३
एकरुद्रस्त्रिमूर्तिश्च श्रीखरुडश्च शिखरिडनः
अष्टविद्येश्वरा ह्येते त्रिणेत्राश्च चतुर्भुजाः ४
अभयं वरदोपेता टंकशूलधरास्तथा
रक्तकुन्दस्तथा नीलं पीतं कृष्णञ्चकुंकुमम् ५
अरुणं भिन्नाञ्जनप्रख्यं क्रमाद्विद्येशवर्णकम्

जटामकुटसंयुक्ता उपवीतसमन्विताः ६
विद्येशा कृतिरेवं स्यात् दिक्पाला कृतिरुच्यते ७
पूर्वमेव मया प्रोक्ता चाकृतिर्वज्रपाणिनः
अर्द्धचंद्रासनासीनो ब्रह्मरूपो हुताशनः ८
प्रज्वलत्काञ्चनज्योतिः पिंगलः पिंगलोचनः
हेमकूर्च्चाग्रसदृशः स्वरूपञ्च शिरोरुहम् ९
तरुणादित्यसंकाशन्तद्वस्त्रमुपवीतकम्
अक्षमाला च शक्तिश्च दक्षिणे दक्षिणेऽपि च १०
ज्वालामाला कुलन्तीव्रं पार्श्वस्थान्नयंशुमण्डलम्
मेषारूढञ्च कुण्डस्थो योगपट्टेन वेष्टितम् ११
दक्षिणे तु स्थिता स्वाहा रक्तकुण्डलमण्डिता
अग्नेराकृतिरेवं स्याच्छृणुवैवस्वताकृतिम् १२
दण्डपाणिर्महादीप्तः कालाञ्जनसमच्छविः
महामहिषिकारूढो दीप्ताग्निसमलोचनः १३
यमस्याकृतिरेवन्तु राक्षसेशाकृतिं श्रुणु
राक्षसेशो विशालाक्षः पीतवस्त्रश्शवासनः १४
निर्ऋतिस्सुस्थितासीनः खड्गहस्तो महाज्वलः
निर्ऋतेराकृतिर्ह्येवं वरुणस्याकृतिं श्रुणु १५
शंखकुन्देन्दुधवळः पाशहस्तो महाबलः
केयूरकुण्डली हारी पीतवासास्सुशोभनः १६
आसीनोवास्थितो वापि मकरे वरुणस्मृतः
कुञ्चितभ्रूयुवावायुस्ताम्रदृक् धूम्रसन्निभः १७
अंकुशेन करोवीरश्शंबरांबरसंयुतः
मृगारूढो विधातव्या सर्वभूषणभूषितः १८
एवं सदागतिस्सर्वव्यापकोयं समीरणः
मकुटीकुण्डली हारी केयूरी नरवाहनः १९

यक्षराजः कुबेरोयन्तप्तकाञ्चनसन्निभः
शंखपद्मनिधी युक्तो गदाहस्तो निधीश्वरः २०
वृषारूढो महाराजो धवळः पिंगलेक्षणः
त्रिशूलपाणिरीशानस्त्रिणेत्रो लोकशंकरः २१
दिक्पालाकृतिरेवं स्यादष्टमूर्त्याकृतिं श्रुणु
भवश्शर्वस्तथेशानः पशुपत्युग्रकस्तथा २२
रुद्रो भीमो महादेवः कीर्तितास्त्वष्टमूर्तयः
चतुर्भुजास्त्रिणेत्राश्च जटामकुटधारिणः २३
अभयं वरदोपेताष्टंकं कृष्णधरा स्मृताः
सर्वाभरणसंयुक्ता रक्तक्षौमधरा इमे २४
शुक्लं श्यामञ्च रक्तञ्च कृष्णं गोक्षीरसन्निभम्
काश्मीरं विद्रुमन्नीलं भवादीनान्तु वर्णकम् २५
अष्टमूर्त्याकृतिर्ह्येवं वसूनामाकृतिं श्रुणु
धरो धूम्रश्च होमश्च आपश्चैवानिलोनलः २६
प्रत्यूषश्च प्रभासश्च वसवश्चाष्ट एव च
द्विभुजाश्च द्विनेत्राश्च असिखेटक संयुताः २७
रक्तवर्णा इमे सर्वे पीतवस्त्रसमन्विताः
सर्वाभरणसंयुक्ताः स्निन्धकुन्तळमूर्द्धजाः २८
वसूनामाकृतिर्ह्येवमस्त्रमूर्त्या कृतिं श्रुणु
वज्रं शक्तिञ्च दण्डञ्च खट्गं पाशं तथांकुशम् २९
गदात्रिशूलञ्चित्रञ्च पद्मञ्चेति दशायुधम्
द्विभुजाश्च द्विनेत्राश्च सर्वाभरणसंयुताः ३०
कृताञ्जलिपुटोपेताः करण्डमकुटान्विताः
तत्तद्वक्त्रप्रमाणेन अस्त्रमूर्तिसमन्विताः ३१
नानावर्णसमायुक्ता नीलजीमूतवर्णकम्
नीलकं पद्मरागञ्च तुषारञ्चेंद्रनीलकम् ३२

शारदाभ्रञ्च रक्तञ्च वज्रादीनान्तु वर्णकम्
जायाशक्तिगताविद्या पाशपद्मेन पुंसके ३३
शेषाः पुमानिति ख्याताः कीर्तिता त्वस्त्रमूर्त्तयः ३४
इति पूर्वकारणे प्रतिष्ठातन्त्रे नवतालोत्तमविधिपटलश्चतुर्दशः

नित्याग्निविधिपटलप्रारंभः

अतःपरं प्रवक्ष्यामि नित्याग्नियजनक्रमम्
आग्नेय्यां स्थापयेदग्निं विधिनादेशिकोत्तमः १
चतुरश्रं वाथ वृत्तं वा मेखलात्रयसंयुतम्
अरत्निमात्रविस्तारं तन्मानं बिलमुच्यते २
पश्चिमे दक्षिणे वापि योनिरश्वत्थपत्रवत्
कुण्डे तु स्थापयेदग्निमवच्छिन्नन्तु कारयेत् ३
यावन्मूलोपचारन्तु तावदग्निं सुपूजयेत्
त्रिकालमेककालं वा द्विकालं वा यजेद्गुरुः ४
उत्तमन्तु त्रिकालं स्यात् मद्ध्यमन्तु द्विकालकम्
अधमं त्वेककालं स्यात् नित्याग्निर्यजनन्तथा ५
शिवाग्रे वाथ कर्तव्यं सर्वशान्तिकरं परम्
मार्जनं प्रोक्षणं तत्र गोमयेनोपलेपयेत् ६
अघोरास्त्रेण मंत्रेण शोधयेत्तु विशेषतः
गन्धैः पुष्पैश्च धूपैश्च दीपैरर्घ्यैश्च पूजयेत् ७
परिस्तरेत् द्विदर्भैश्च परिषेकमथाचरेत्
कृत्वा चैवाज्यसंस्कारं पश्चादाघारमेव च ८
आज्यं हुत्वा हृदामंत्री हविश्चैवाक्षमात्रतः
अग्नआयाहि मंत्रेण शोधयेत्तु विशेषतः ९
प्रत्येकं षोडशं वारं द्वात्रिंशद्वा समाचरेत्
प्रणवेनैव हुत्वा तु पश्चादिद्धमाहुतिञ्चरेत् १०

चरुं हुत्वा तदन्ते तु व्याहृतिं जुहुयात्ततः
ब्रह्मांगानि ततो हुत्वा स्विष्टान्तं हि न कारयेत् ११
प्रणीताघारसमिधौ ब्रह्मकूर्चं विनाचरेत्
कुर्याद्धीमान् प्रतिपद्दं स्थालीपाकं तदादितः १२
समिदाज्यचरूंश्चैव अष्टाविंशतिसंख्यया
होमयेत्तु विशेषेण स्थालीपाकं समाचरेत् १३
आज्यस्थालीं प्रणीताञ्च प्रोद्दणीञ्चैव कल्पयेत्
ब्रह्माणं दद्दिणेभ्यर्च्य वामे तस्य जनार्दनम् १४
प्रणवेनैव होतव्यं वेदादींश्चैव होमयेत्
कूश्माण्डाहुतिभिर्हुत्वा स्विष्टान्तं नाचरेद्बुधः १५
तत्पुरुषेण मंत्रेण चरुहोमं समाचरेत्
चरुभागं त्रिधाभज्य गव्याज्येनाभिघारयेत् १६
एकभागं निवेद्यं स्यात् एकभागं हुतं भवेत्
शेषभागार्द्धं बल्यर्थं शेषमाचार्यभोजनम् १७
अन्येषां भोजने दोषो भुक्तञ्चेत् कृच्छ्रमाचरेत्

इति पूर्वकारणे प्रतिष्ठातंत्रे
नित्याग्निविधिपटलः पञ्चदशः

बलिकर्मविधिपटलप्रारंभः

अथ वद्दये विशेषेण बलिकर्मसु योजयेत्
बकारं बलवर्द्धन्यां लिकारं धान्यसंग्रहम् १
बकारलिकारसंयुक्तं बलिशब्दाः प्रकीर्तिताः
वृषादिबलिपीठान्तं बलिं कृत्वाविशेषतः २
अद्दद्वयप्रमाणेन बलिकारेऽत्र कीर्तितम्
पतंगञ्च भुजंगञ्च ऊर्ध्वाधस्संप्रपूजयेत् ३
द्विभुजौ च द्विनेत्रौ च सर्वाभरणभूषितौ

रक्ताद्यो रक्तवर्णश्च तद्वर्णांबरभूषितौ ४
दक्षिणे तु शिरोन्यस्त्वा पादौचैवोत्तरे तथा
द्विनेत्रौ पीतवर्णौ च भद्रकायौ भयं करौ ५
कृतांजलिपुटोपेतौ शोधयेत्तत्प्रजापतेः
नित्यं दक्षिणपादे च अपदानादपादतः ६
ग्रामे च द्विभुजं विद्यान्नागरादौ चतुर्भुजाः
स्वायंभुवे च दैव्ये च आर्षे गाणे तथैव च ७
द्विभुजे च द्विनेत्रे च श्वेतोभौ चोग्ररूपकौ
नित्योत्पादानकौ चैव व्याळाभरणभूषितौ ८
द्विबाहू भद्रकायस्तु मातुलुंगसमप्रभौ
पूजयेत् द्वारपार्श्वे तु ग्रामादिषु च पूर्ववत् ९
द्वारस्य मद्धयमे चैव दक्षिणे तु तथोत्तरे
स्थानशुद्धिं ततः कृत्वा तस्योर्ध्वे वक्त्रं कल्पयेत् १०
तस्योर्ध्वे बलिदानन्तु द्वारदेवान् सुवृद्धये
नाळिकेरप्रमाणन्तु उत्तमस्य विधीयते ११
कपित्थस्य फलं कृत्वा मद्धयमन्तु प्रमाणकः
कुक्कुटाण्डप्रमाणं स्यात् बलिं सर्वत्र दापयेत् १२
स्वयंभूदैविकञ्चैव देव्यमार्षकमानुषम्
राक्षसं बाणलिंगञ्च सप्तधा लिंगमुच्यते १३
दैविकन्तु भवादीनां मित्रादीनान्तु मानुषम्
भूतादीनां स्वयंभूतमार्षकं परिवारकैः १४
वसूनां बाणलिंगन्तु विद्येशानान्तु देविकम्
यक्षादिरक्षसां लिंगं बलिदेवाः प्रकीर्तिताः १५
भवश्शर्वस्तथेशानः पशुपतिर्नील एव च
उग्रो भीमो महादेव इत्यष्टौ मूर्तयस्तथा १६
पीतञ्च कुंकुमं कृष्णं नृणां भिन्नाञ्जनप्रभम्

नीलं श्वेतं तथा रक्तं त्वष्टमूर्तेश्च वर्णकम् १७
अभयावरदास्सर्वे पाशांकुश चतुर्भुजाः
त्रिणेत्रं मेघवर्णञ्च द्विपादञ्चैव नूपुरम् १८
जटामकुटसंयुक्तमष्टमूर्तिस्वरूपकम्
देविकाख्यञ्च लिंगन्तु बलिदेवाः प्रकीर्तिताः १९
इंद्राग्नी च यमश्चैव निर्ऋतिर्वरुणस्तथा
वायुस्सोमस्तथैशान्यो ब्रह्मविष्णुश्च लोकपाः २०
मानुषे लिंगवत्कृत्य लोकपालबलिस्तथा
संवर्तं पूर्वतो न्यस्य चोन्मत्तमग्निगोचरे २१
कुण्डोदरं दक्षभागेनैर्ऋतौ दीर्घकायकौ
वारुणयां ह्रस्वपादन्तु वायव्यांसिंहरूपकम् २२
सोमे गजमुखं प्रोक्तं ऐशान्यान्तु प्रियम्मुखम्
श्वेतं पीतं तथा कृष्णं रक्तं श्यामञ्च धूम्रकम् २३
अतिरक्तं तथा नीलं भूतवर्णमिति स्मृतम्
उग्ररूपसमायुक्तं द्विभुजञ्च द्विपादकम् २४
दण्डहस्तन्तथा सर्वे भूतरूपमिति स्मृतम्
अष्टभूतमिदं प्रोक्तं स्वायंभुवबलिं ददेत् २५
मद्धयहारञ्च हारायां वृषभादिप्रदक्षिणम्
वृषभं पूर्वतस्स्थाप्य आग्नेय्यां पावकस्तथा २६
मातृणां दक्षिणे भागे वीरविघ्नसमन्वितम्
विघ्नेशं नैर्ऋते भागे सुब्रह्मण्यन्तु पश्चिमे २७
ज्येष्ठायां वायुदिग्भागे दुर्गास्थानं तथोत्तरे
चण्डेशमीशदिग्भागे भास्करं पूर्वतो दिशि २८
कूपस्थानं तथैशान्यामाग्नेय्यां पचनालयम्
परिवारालयं सर्वं बाह्ये बाह्यान्तरे तथा २९
भूतपीठस्य पार्श्वे तु इंद्रं संपूजयेत्ततः

आग्नेय्यां दिशि पर्यन्तं स्वस्वस्थाने विशेषतः ३०
द्वारस्योत्तरपार्श्वे तु ब्रंहाणन्तु प्रकीर्तितम्
पितामहेशयोर्मद्ध्ये आदित्या द्वादशोच्यते ३१
भास्करं क्षेत्रपालौ च शांकरे वा विशेषतः
शक्रपावकयोर्मद्ध्ये अश्विन्यौ द्वौ तु विन्यसेत् ३२
आग्नेययमयोर्मद्ध्ये संस्थाप्य सप्तरोहिणीम्
याम्यनैर्ऋतयोर्मद्ध्ये पितृस्थानं विधीयते ३३
निर्ऋतिवारुणयोर्मद्ध्ये अप्सरोगण एव च
वरुणवायव्ययोर्मद्ध्ये मुनीनां स्थानमुत्तमम् ३४
वायव्यसोमयोर्मद्ध्ये अष्टौ वसुधरास्तथा
सोमईशानयोर्मद्ध्ये रुद्रैकादश एव हि ३५
प्रतिमे वापि पीठे वा इष्टिके वा प्रपूजयेत्
बलिपीठन्ततः कृत्वा चतुर्दिक्षु विशेषतः ३६
बाह्याभ्यन्तरयोः पीठौ पूर्वद्वारे तु विन्यसेत्
अन्तस्थसर्वदेवास्तु पिशाचात् बाह्यपीठके ३७
यक्षाणां दक्षिणे पीठे राक्षसानान्तु पश्चिमे
गन्धर्वाणान्तु सौम्ये तु भूतानां पूर्वमेव च ३८
तदूर्ध्वेपद्ममित्युक्तमष्टशक्तीर्दळे न्यसेत्
सर्वदेवमयं पीठमग्रपीठं प्रकल्पयेत् ३९
ततः पुरस्थितं पीठं बलिं दद्याद्विशेषतः
आमोदश्च प्रमोदश्च प्रमुखो दुर्मुखस्तथा ४०
अविघ्नो विघ्नकर्ता च बलिपीठादिदेवताः
अविघ्नं कर्णिकामद्ध्ये आमोदं पूर्वदिग्दळे ४१
याम्ये चैव प्रमोदन्तु प्रमुखे पश्चिमे दळे
दुर्मुखन्तु दळं सौम्ये विघ्नकर्तारमीशके ४२
आमोदं श्यामवर्णन्तु प्रमोदं कृष्णवर्णकम्

प्रमुखं स्फटिकाभासं दुर्मुखं कुंकुमप्रभम् ४३
अविघ्नो विद्रुमाभासो विघ्नकर्ताञ्जनप्रभः
द्विभुजाश्च द्विनेत्राश्च टंकपाशधरास्तथा ४४
उग्रदृष्टिसमायुक्ता भीमरूपा महाबलाः
सर्वाभरणसंयुक्ता नागयज्ञोपवीतकाः ४५
प्रसादाभिमुखास्सर्वे दीर्घदंष्ट्रोत्कटाननाः
पूर्वे च दक्षिणे चैव पश्चिमे चोत्तरे तथा ४६
गर्भगेहस्य पश्चाच्च चतुष्कं चोत्तमोन्नतम्
त्रिभागं मद्धयमं प्रोक्तं द्विभागमधमं भवेत् ४७
द्वारोत्सेधं समं श्रेष्ठं सत्रिपादन्तु मद्धयमम्
द्वारार्द्धमं विद्धिविस्तारोत्सेध तत्समम् ४८
विस्तारं सुविभज्याथ हाटकेन तु विंशतिः
भागेनोपानमेकेन चतुर्भिर्जगती तथा ४९
कंपं कृत्वा तु केतूर्ध्वे तदूर्ध्वे केन पट्टिका
कण्ठं कुर्याच्चतुर्भागे केनैवोद्येन पट्टिका ५०
महापट्टी तु द्वयंशेन द्वयंशाब्जदळकोन्नतम्
कर्णिकामेकभागेन प्रोक्तमुत्सेधमुत्तमम् ५१
बलिपीठमिति ख्यातं सर्वेषां बलितृप्तये
यक्षराक्षसपैशाचभूतगन्धर्वकिन्नराः ५२
सर्वदेव ऋषीणान्तु बलिं सर्वत्र तृप्तये
आर्षं तु परिवाराख्यं बलिन्दद्यात् प्रकीर्तिताः ५३
सरोध्रुवश्च ह्लोमश आपश्चैवानिलोनलः
प्रत्यूषश्च प्रभावश्च वसवश्चाष्ट एव च ५४
बाणलिंगं तथायोग्यं बलिन्दद्यात्प्रकीर्तिताः
अनन्तेशस्तथासूक्ष्मश्चैकनेत्रशिशवोत्तमः ५५
एकरुद्रस्त्रिमूर्तिश्च श्रीकण्ठश्च शिखण्डिनः

अष्टविद्येश्वराश्चैव दिव्यलिंगबलिन्तथा ५६
पूर्वे यक्षगणाश्चैव राक्षसा गणगाणवाः
पिशाचगणदाक्षिरया गाणवं गणनैर्ऋते ५७
किन्नरोगणं वारुणये पितृणां गणं वायवे
दानवानां गणे सौम्ये ऐशान्यांगगणास्मृताः ५८
अष्टानां गणमेवोक्तं बलिदानन्तु रक्षसाम्
नित्यानां वसवानान्तु प्रथमद्वारिपूजयेत् ५९
नन्दीशैवमहाकाळो द्वितीयद्वारिपूजयेत्
आमोदश्च प्रमोदश्च चतुर्त्थे द्वारिकल्पयेत् ६०
गणेशं गुहमेवोक्तं पञ्चप्रासादके न्यसेत्
द्वारदेशं समाख्यातं बलिन्तत्र प्रकल्पयेत् ६१
प्रस्थपादं बलिः प्रोक्तं तण्डुलस्य प्रमाणतः
नित्यनैमित्यकञ्चैव बलिंकृत्वा विशेषतः ६२
त्रिसंध्यायां बलिंकृत्वा अन्यकालेन कारयेत्
अथवान्यप्रकारेण काम्यार्त्थे तु बलिन्ददेत् ६३
महाहविर्निवेद्यान्ते बलिन्दद्याद्विशेषतः
नैमित्तिकोपसन्ध्यास्तु हविष्यञ्च बलिन्ददेत् ६४

इति पूर्वकारणे प्रतिष्ठातन्त्रे बलिकर्मविधिपटलषोडशः

पञ्चामृतक्षीराभिषेकविधिपटलप्रारंभः

इक्षुसारञ्च रूपं स्यात् मधुनाविजयन्तथा
घृतानां पुण्यमेवन्तु पयसायुर्विवर्द्धनम् १
आरोग्यं दधिसंयुक्तं पञ्चामृतफलन्तथा
यावन्निश्चिन्त्यममृतं तत्समन्तु प्रकल्पयेत् २
पञ्चप्रस्थाधमं प्रोक्तं द्विगुणं मद्धयमं भवेत्
त्रिगुणं उत्तमं प्रोक्तं पञ्चामृतन्तु कल्पयेत् ३

इक्षुर्मधुघृतञ्चैव पयोदधिक्रमेण तु
प्रस्थं प्रस्थं प्रमाणं स्यात् पञ्चामृतमिति स्मृतम् ४
इक्षुसारञ्च मद्धये तु मधूनां पूर्वमेव च
घृतं वै दक्षिणे स्थाप्य पश्चिमे तु पयस्तथा ५
दध्युत्तरे च कृत्वा वै पञ्चामृतन्तु कल्पयेत्
सद्यादीशानमन्त्रं स्यात् मद्धयादीनि कृतस्य तु ६
गन्धपुष्पं तथाकूर्चं धूपदीपं तथा भवेत्
मूलमन्त्रेण सहजं शिवमन्त्रं तथोच्चरेत् ७
पञ्चगव्यान्तके पूज्य पञ्चामृतस्य कल्पयेत्
सर्वव्याधिविनिर्मुक्तं सर्वपापक्षयं भवेत् ८
अष्टोत्तरशतप्रस्थैः पूजयेत्क्षीरमेव च
द्विगुणं मद्धयमं प्रोक्तं उत्तमं त्रिगुणं भवेत् ९
घृताभिषेकसंयुक्तं सर्वशान्तिकरं शुभम्
क्षीराभिषेकसंयुक्तं जिह्वासहस्त्रं भोजयेत् १०
फलाभिषेकसंयुक्तं सत्फलं पापनाशनम्
द्वादशानान्तु भारं स्यात् उत्तमं परिकीर्तितम् ११
तदर्द्धं मद्धयमं प्रोक्तं तदर्द्धमधमं तथा
यथेष्टं काम्यमित्युक्तं कुर्यात्क्षीराभिषेचनम् १२
अनावृष्टौ ज्वरोग्रस्य सर्वव्याधिनिवारणम्
अर्कवारादिसंयुक्तं सोमवारादिसंयुतम् १३
जन्मनक्षत्रकर्तव्यं पूजयेत्परमेश्वरम्
मासं वाप्यर्द्धमासं वा सप्तवारमथापि वा १४
पञ्चाहं वा त्रिरात्रं वा एकाहं संप्रपूजयेत् १५
इति पूर्वकारणे प्रतिष्ठातन्त्रे पञ्चामृतक्षीराभिषेकविधिपटलस्सप्तदशः

करणाधिकारविधिपटलप्रारंभः

अतः परं प्रवक्ष्यामि करणानान्तु लक्षणम्
यागांगाश्च तथा सर्वे करणञ्चेति कीर्तितम् १
अरणीलक्षणञ्चैव स्रुक्स्रुवस्य च लक्षणम्
लक्षणन्तोरणानाञ्च अष्टमं गळलक्षणम् २
आयुधानां प्रमाणञ्च कूर्मासनस्य लक्षणम्
खड्वायालक्षणञ्चैवोलूखलस्य तु लक्षणम् ३
शिबिकालक्षणञ्चैव डोळायालक्षणन्ततः
लक्षणन्दीपमालायाः पुष्पाधारस्य लक्षणम् ४
भेरिकालक्षणञ्चैव कर्त्तृकाफलकाविधम्
समिधो लक्षणञ्चैव परिधीनान्तु लक्षणम् ५
दर्भाणां लक्षणञ्चैव कूर्चानां लक्षणन्ततः
लक्षणं विष्टरस्याग्रं लंबकूर्चस्य लक्षणम् ६
परिस्तरणदर्भाणान्दर्भमालाप्रमाणकम्
प्रोक्षणीलक्षणञ्चैव पवित्रस्य तु लक्षणम् ७
पाद्यपात्रस्य मानस्य पात्रस्याचमनस्य च
लक्षणञ्चार्घ्यपात्रस्य पात्रयोर्गन्धपुष्पयोः ८
लक्षणं घृतपात्रस्य प्रणीतालक्षणन्तथा
प्रोक्षणी लक्षणञ्चैव शिवकुंभस्य लक्षणम् ९
वर्द्धनीलक्षणञ्चैव सामान्नयं कुंभलक्षणम्
लक्षणं कलशस्यैव शरावस्य तु लक्षणम् १०
कुरिडकालक्षणञ्चैव हविः पात्रस्य लक्षणम्
लक्षणञ्चरुपात्रस्य विधानस्य तु लक्षणम् ११
पात्रस्य चोपदंशानाञ्जलाधारस्य लक्षणम्
तरंगलक्षणञ्चैव गात्रवेष्टनलक्षणम् १२
वितानलक्षणञ्चैव ध्वजानां लक्षणन्ततः
उष्णीषञ्चोत्तरीयस्य वस्त्राणाञ्चैव लक्षणम् १३

पर्यंकानां विधिश्चैव उपधानस्य लक्षणम्
कद्दयायालक्षणश्चैव प्रच्छन्नपटलक्षणम् १४
छत्रस्य लक्षणश्चैव पिंछचामरयोस्तथा
मयूरव्यजनश्चैव दुकूलव्यजनस्य च १५
लक्षणन्धूपपात्रस्य घरटायाश्चैव लक्षणम्
लक्षणन्दीपपात्रस्य दीपाधारस्य लक्षणम् १६
नीराजनस्य पात्रस्य महाघरटासुलक्षणम्
स्थलिकालक्षणश्चैव दद्धास्तुलक्षणन्ततः १७
दीपादिलक्षणश्चैव पाद्याधारस्य लक्षणम्
तथाचाचमनाधार पात्रस्यैव तु लक्षणम् १८
लक्षणं दर्प्पणस्याथ पादुकायाश्च लक्षणम्
पात्रस्य लक्षणश्चैव जलद्रोणयाश्च लक्षणम् १९
यंत्रिकालक्षणश्चैव उल्कालक्षणमेव च
गोळकापट्टपुष्पाणां मकुटस्य च लक्षणम् २०
हुतप्रमाणं सर्वेषां द्रव्यानाञ्च प्रजापते
शमी वा पिप्पलं वापि गृह्यारणयतरुं पुनः २१
अब्ध्यंगुलन्तु विस्तारं तिथ्यंगुलन्तु दैर्घ्यकम्
रसांगुलघनाप्रोक्ता दैर्घ्याग्रासुदृढासमा २२
प्रथमस्य परीणाहं भूतांगुलमिति स्मृतम्
द्वाविंशदंगुलं दैर्घ्यं कीलंक्रव्यायसाग्रके २३
युगांगुलेन मूले तु कीलंस्वेनैव कारयेत्
प्रथमस्याग्रके मूले त्वधः पट्टेन वेष्टयेत् २४
सप्तांगुलन्तु विस्तारं तदर्द्धं घनमुच्यते
उभयोः पार्श्वयोश्चैव मुष्टिरष्टांगुलं भवेत् २५
भूतांगुलपरीणाहं सर्वत्रैव सुवृत्तकम्
पञ्चादशांगुलायामं त्रिवृत् गोपालरज्जुकम् २६

तन्तुना वाथ कर्त्तव्यं कनिष्ठांगुलिनाहकम्
अरणीलक्षणं प्रोक्तं स्रुक्लक्षणमथ श्रुणु २७
स्रुक्स्रुवौ खदिरेणैव शम्यावैकंकतेन वा
अथवायाज्ञिकैर्वृक्षैः कर्त्तव्यौ लक्षणान्वितौ २८
संगृह्यमद्धयसारन्तु द्विधाकृत्वा तरुं पुनः
तत्पार्श्वे बिलमाख्यातमवक्रन्निर्व्रणन्दृढम् २९
द्वात्रिंशदंगुलायामं सप्तांगुलसुविस्तृतम्
तत् घनन्तु चतुर्मात्रमेवं पादञ्च तत्र वै ३०
मद्धये सूत्रं प्रसार्यादौ मुखायामं षडंगुलम्
अग्रभागं त्रिभागैकं मुखविस्तारमुच्यते ३१
यवत्रयप्रमाणेन पट्टिकामुखपार्श्वयोः
यवमानेन निम्नं स्यात् मुखं सर्वमशेषकम् ३२
पक्षांगुलं गळायामं विस्तारन्तु शरांगुलम्
सप्तांगुलायतावेदी विस्तारन्तत्समं भवेत् ३३
बिलं सुवृत्तं मद्धये तु चांगुलद्वयमानतः
तद्विस्तारसमं गर्त्तं सुवृत्तं बिलमुच्यते ३४
पट्टिकाबिलबाह्ये तु यवमानघनान्वितम्
तत्बाह्येष्टदळं पत्रं यवनिम्नं विचित्रितम् ३५
वेदिकायास्तु परितः पट्टिकात्रियवा घनाः
बिलादूर्द्ध्वमुखात्खात्वा कनिष्ठांगुलमानतः ३६
तारेण वाथ ताम्रेण नाळं कृत्वा तु योजयेत्
पक्षांगुलप्रमाणेन पद्माकारन्तु गण्डिका ३७
दण्डिकैकांगुलावृत्ता तन्नाहञ्चाब्धिमात्रकम्
रव्यंगुलन्तु दण्डोच्चन्तस्यार्द्धन्नाहमुच्यते ३८
तन्मूले कलशाकारमंगुलद्वयमानतः
धर्मांगुलन्तु नाहं स्यात् तस्याधस्ताच्च पादयुक् ३९

वेदिकायास्त्वधः पद्मं पृष्ठाकारं सकर्णिकम्
गजोष्ठपृष्ठसदृशमास्यं पृष्ठा कृतिर्भवेत् ४०
एवं संग्राह्य तच्छेषं परित्यज्य दृढं यथा
एवं स्रुक्लक्षणं प्रोक्तं स्रुवलक्षणमुच्यते ४१
द्वाविंशदंगुलायामं दण्डिनाहं रसांगुलम्
मूलात् ग्रीवान्तरं यावत् त्र्यंगुलं ग्रीवनाहकम् ४२
मूलवच्चाग्रनाहं स्याद्बिबिलन्नासिका कृतिः
पूरितं करिषार्द्धेन बिलमानं प्रकीर्तितम् ४३
पुष्कराधः प्रकर्त्तव्या गण्डिका द्वियवोन्नता
दक्षिणेन करेणैवा नामिकान्तु सुवक्रकाम् ४४
अंगुष्ठाञ्च सुपर्वं स्यात्तर्जनी मद्ध्यमांगुली
संयुक्तौ चोच्छ्रितौ द्वौ च उच्छ्रिता च कनिष्ठिका ४५
करणे तेन मन्त्रज्ञस्स्रुवेणैव तु होमयेत्
स्रुग्बिलन्तु घृतेनैव पूरयित्वा बिलोपरि ४६
स्रुवाग्रेणैव तन्त्रेण पुटं स्यात्तु विधाय च
उत्तानौ तु करौ कृत्वा वेणिबन्धन्तु कारयेत् ४७
उच्छृतौ द्वौ तु तर्जन्यौ तथा चैव कनिष्ठिकौ
वक्रांगुष्ठौ स्रुवौ ग्राह्य द्वाभ्यां पूर्णाहुतिं हुनेत् ४८
एवं स्रुक्स्रुवयोः प्रोक्तञ्चोरणानान्ततश्शृणु
भूतहस्तसमुत्सेधं विस्तारस्स्यात्तदर्द्धकम् ४९
करप्रमाणं शूलं स्यादंघ्रिनाहं रसांगुलम्
कन्नयसाय समे तद्धि वक्ष्यतेतः परं क्रमात् ५०
भूतहस्तं समारभ्य नवहस्तान्तकं क्रमात्
दीर्घन्तालाधिकं कुर्यात्तेषामर्द्धन्तु विस्तृतम् ५१
तस्मात्पक्षांगुलाधिक्यन्नाहं प्रत्येकमाचरेत्
तोरणानाञ्च सर्वेषां शूलं वै हस्तमानकम् ५२

नवधातोरणं प्रोक्तं श्रुणुष्वाथाष्टमं गलम्
याज्ञिकं वृत्तमादाय कारयेल्लक्षणान्वितम् ५३
कलांगुलसमायामं विस्तारन्तु तदर्द्धतः
पद्मासनमधस्तात्तु विस्तारार्द्धेन कारयेत् ५४
श्रीवत्सादीनि तस्योद्धर्वे लेखयेत्तु विशेषतः
श्रीवत्सम्मत्स्ययुग्मञ्च स्वस्तिकन्दर्पणं गजम् ५५
पूर्णकुंभञ्च वृषभन्दीपं स्यादष्टमं गलम्
अष्टमं गलमेवं स्यादस्त्राणां लक्षणं श्रुणु ५६
हैमराजतताम्रैर्वा अयसापादपेन वा
एतेष्वेकतमेनैव कारयेल्लक्षणान्वितम् ५७
षोडशांगुलमायामं षडंगुलन्तु विस्तृतम्
तदर्द्धन्तु घनं प्रोक्तं सुदृढन्त्ववव्रणं ऋजुम् ५८
चतुरंगुलमानेन मद्धयमे गणिडकात्रयम्
गणिडकानान्तु नाहन्तु प्रत्येकं द्वादशांगुलम् ५९
कृतांगुलप्रमाणेन शूलं कुर्यात्तदग्रके
अर्द्धांगुलप्रमाणेन पत्रतारं प्रकीर्त्तितम् ६०
पत्तपत्रद्वयं कृत्वा अर्द्धचंद्राकृतिर्भवेत्
मद्धयपत्रमृजुं प्रोक्तं पत्रतारं यवद्वयम् ६१
पत्रतारेण मूले तु पादायामं प्रकीर्तितम्
द्विगुणम्मद्धयपत्रस्य पादायामं प्रकीर्तितम् ६२
अर्द्धांगुलप्रमाणेन पत्राणान्तु घनं भवेत्
शेषं दण्डमिति प्रोक्तं नाहञ्चैव नवांगुलम् ६३
एवम्मूले तु कर्तव्यं त्रिशूलं लक्षणान्वितम्
वज्रस्य लक्षणं प्रोक्तं शक्तिलक्षणमुच्यते ६४
विकारांगुलमायामं विस्तारन्तु युगांगुलम्
तस्यार्द्धन्तु घनम्मद्धये गणिडका चतुरंगुलम् ६५

तदूद्ध्र्वे तदधः कृत्वा त्रिशूलं मद्धयपत्रवत्
शक्तिलक्षणमेवन्तु दण्डलक्षणमुच्यते ६६
कल्पांगुलसमायामं मूलं वेदाङ्गुलेन तु
गणिडकाकारयेद्वृत्तं विस्तारञ्चतुरंगुलम् ६७
कृतांगुलं भवेन्मुष्टिस्तन्नाहं कौशिकांगुलम्
कृत्वांगुलन्तु विस्तारन्तस्योद्ध्र्वे गणिडकांगुलम् ६८
ऊद्ध्र्वे रसांगुलन्तारमधस्तात्तु युगांगुलम्
क्रमेण कृशतां कुर्यात् विस्तारार्द्धेन वर्द्धितम् ६९
नाहन्तु दणिडमेवं स्यादसिलक्षणमुच्यते
षोडशांगुलमायाममश्विन्नयंगुलविस्तृतम् ७०
मद्धयमे नवतन्मद्धये पृष्ठे त्वश्रन्तु कारयेत्
कञ्चुकन्तु षडंगुल्यं तद्विस्तारं यवद्वयम् ७१
युगांगुलेन कण्ठन्तु तस्यनाहं गुणांगुलम्
अर्द्धांगुलन्तु फलका विस्तारं त्रियवं घनम् ७२
पुष्पमर्द्धांगुलं ज्ञेयं शेषं युक्त्याप्रकल्पयेत्
असिलक्षणमेवं स्यात् पाशलक्षणमुच्यते ७३
आयामं पूर्ववत्कृत्वा फलद्वयकृतांगुलम्
रसांगुलन्तु विस्तारं परस्परनिरीक्षकौ ७४
वेदांगुलन्तु नाहन्तु तदूद्ध्र्वे द्वादशांगुलम्
द्वयमर्द्धन्तु नाहं स्यात् कृशतः कृशमूलतः ७५
पाशस्य लक्षणं प्रोक्तं शृणुष्वंकुशलक्षणम्
कलांगुलसमायामं तन्नाहन्तु षडंगुलम् ७६
अर्द्धांगुलेन मुकुळमग्न्यंगुलप्रमाणतः
तरुणेंदुसमाकारं मुकुळाधस्तु योजयेत् ७७
अंकुशञ्चैवमाख्यातं गदालक्षणमुच्यते
गणिडकैकांगुलम्मूलं मुष्टिस्तु चतुरंगुलम् ७८

तदूद्ध्वें गरिडकांगुल्यं गदाशेषं प्रकीर्तितम्
षोडशांगुलनाहं स्यादष्टाग्रन्तु गदाकृतिः ७९
गदायालक्षणं प्रोक्तं शूलस्य लक्षणं श्रुणु
षोडशांगुलमायामं विस्तारन्तु षडंगुलम् ८०
वेदांगुलघनं प्रोक्तं शूलवत्कारयेत् बुधः
शूललक्षणमेवं स्याच्चक्रलक्षणमुच्यते ८१
आयामं पूर्ववत्प्रोक्तमष्टांगुलन्तु विस्तृतम्
मद्धयेनाभिसमायुक्तं षोडशारसमायुतम् ८२
एकांगुलन्तु विस्तारं परितः पत्रमुच्यते
मूद्धिर्नपार्श्वे तु कर्त्तव्यं ज्वलनान्तं विशेषतः ८३
दण्डन्तु शूलवत्कुर्यात्प्रोक्तञ्चक्रस्य लक्षणम्
चक्रलक्षणमेवोक्त श्रुणु पद्मस्य लक्षणम् ८४
अर्द्धांगुलन्तु मुकुळं नाहं स्मृत्यंगुलं भवेत्
दळाष्टकसमायुक्तन्नाळायामं दशांगुलम् ८५
रसांगुलन्तु तन्नाहं कुर्यात्पद्मं सलक्षणम्
एवं दशायुधं प्रोक्तं कूर्मासनविधिं श्रुणु ८६
रुद्रांगुलन्नु विस्तारस्तदर्द्धन्नैववर्द्धयेत्
श्रुत्यंगुलं घनं प्रोक्तं मुष्टिं भूतांगुलं भवेत् ८७
सप्तांगुलेन तन्नाहं मानांगुलेन कारयेत्
कच्छपासनमेवं स्यात् खट्वायालक्षणं श्रुणु ८८
चतुर्विंशांगुलं पद्मं ज्येष्ठम्मानांगुलेन तु
मद्धयमन्तु कलांगुल्यमधमं द्वादशांगुलम् ८९
विंशत्यंगुलमानेन ज्येष्ठं पादस्य नाहकम्
मद्धयमस्याधमस्यैव विद्यांगुलविहीनकम् ९०
मूलपादस्य विस्तारं शेषं युक्त्या प्रकल्पयेत्
महांघ्रिखरपादं वा मृगेंद्रांघ्रिसमन्तु वा ९१

षट् त्रिंशदंगुलन्तारं द्विगुणन्तत्समायुतम्
कौशिकांगुलविस्तारमीळिकाग्न्यंगुलं घनम् ९२
ईळिकारन्तथा कृत्वा मद्धयभागेन पट्टिका
कुर्यात्कपोतकं बाह्ये पट्टिका द्वयमेव तु ९३
अधमं कल्पतारैर्वा रत्नहेमेन वेष्टयेत्
ईळिकाभ्यन्तरे चैव विन्नयस्त्वाधातुनागळात् ९४
सुषिरेष्वर्गळानान्तु नाराचं योजयेत्सुधीः
नाराचैश्च समायुक्तं रज्वासं वेष्टये ततः ९५
खट्वायालक्षणं प्रोक्तं प्रोच्यते लूखलस्य तु
विंशत्यंगुलमायाममुत्तमं संप्रकीर्तितम् ९६
स्मृत्यंगुलं भवेन्मद्धयं कन्नयसन्तु कलांगुलम्
आयामं त्रिगुणी कृत्य तन्नाहन्तु विधीयते ९७
चतुर्त्थाविभजेदायं त्रिभागं गर्त्तमुच्यते
उत्सेधस्यार्द्धमानेन ग्रीवामूलस्य नाहकम् ९८
ओष्ठं पद्मांगुलं प्रोक्तमुत्तमस्य विशेषतः
पादं पादांगुलं हीनं मद्धयमस्याधमस्य तु ९९
लूखलस्यैवमाख्यातं मुसलस्य विधिं श्रुणु
सार्द्धत्रितालमधमं युगतालन्तु मद्धयमम् १००
उत्तमं भूततालं तु मुन्नयद्रिरन्ध्रकांगुलम्
कन्नयसादिपरीणाहं वृत्तन्तु सर्वतस्समम् १०१
आयसार्द्धांगुलेनैव वेष्टयेन्मूलके दृढम्
एवन्तु मुसलं प्रोक्तं शिबिकालक्षणं श्रुणु १०२
सारदारुमयेनैव मानांगुलेन कारयेत्
षट्त्रिंशदंगुलन्तारं कन्नयसस्य प्रकीर्तितम् १०३
मद्धयमञ्चाष्टचत्वारि षष्टयंगुलमथोत्तमम्
विस्तारं द्विगुणायामं पादोनद्विगुणन्तु वा १०४

ईळिकायास्तु विस्तारं श्रेष्ठस्याब्ध्यंगुलं भवेत्
अंगुलांगुलहीनन्तु मद्धयमस्याधमस्य च १०५
तस्यार्द्धन्तु घनं प्रोक्तमीळिकायाः प्रजापते
ईळितारं त्रिधा कृत्वा मद्धयभागेन पट्टिका १०६
भागेनैकेन तत् बाह्ये कारयेत्तु कपोतकम्
आयाममष्टधा कृत्वा भागेन भित्तिपादकम् १०७
कुंभञ्च वलयञ्चैव वृत्तकञ्चारुहीनकम्
ईळिकामद्धयोर्मद्धये चतुरश्रीकृतन्तथा १०८
एकैकशांशेन चोद्धर्वाधः पट्टिका द्वयमेव हि
मद्धयमे तु विभागेन फलका चक्रमेण तु १०९
ईळिकैर्जालकैश्चैव फलकैर्गळकैरपि
नानावल्ली समायुक्तां नानाक्रीडा समायुताम् ११०
तत्पूर्वभित्तेरुत्सेधमष्टांगुलमिति स्मृतम्
सिंहद्वयसमायुक्तन्तदूद्धर्वे मकरास्यकम् १११
पालिकासदृशं पादं तत्र सप्तांगुलोन्नतम्
अयः पट्टैश्च नाराचैर्दृढं कुर्याद्विशेषतः ११२
वेणिकावेष्टनं वापि फलकाबन्धनं कुरु
शिबिकालक्षणं प्रोक्तं डोळाया लक्षनं श्रुणु ११३
पादोर्ध्वे कल्पयेद्धीमान् मरटपाकृतिकन्तथा
अश्वश्च वृषभश्चैव गजं सारम्म्यकर्मणि ११४
विनाचान्नयानि सर्वाणि रथवत्कारयेत्क्रमात्
डोळाया लक्षणं प्रोक्तं दीपमालाविधिं श्रुणु ११५
अयसावाथ ताम्रेण दारुभिर्दीपमालिका
द्वारेषु द्वारवत्कुर्यात् लिंगपृष्ठे प्रभाकृतिः ११६
द्वारमानप्रमाणेन कारयेदन्यदेशके
सुस्निग्धं कारयेद्धीमान् स्कन्धान् वेदांगुलायतान् ११७

त्रिभागैकन्नचसेद्दण्डे भूतांगुलमथान्तरम्
दीपमालाविधिः प्रोक्तः पुष्पाधारविधिं श्रुणु ११८
अशोकार्जुनको निंबं मधूकं पनेसासनः
खादिरं शिंशुपाचाम्रं चन्दनं चंपकाशुभा ११९
अष्टतालप्रमाणेन विस्तारं द्विगुणायतम्
देवपादसमायुक्तं द्वादशांगुलदैर्घ्यकम् १२०
घनमष्टांगुलं प्रोक्तं भित्युत्सेधं गुणांगुलम्
दर्पणोदरसंकाशं कुर्यान्मानांगुलेन तु १२१
पुष्पाधारविधिप्रोक्तं भेरिकालक्षणं श्रुणु
युगतालसमायामं नागभूतयमं भवेत् १२२
द्वादशांगुलमानेन मुखतारं विधीयते
आमुखान्तं सुवृत्तं स्यात् घनमर्द्धांगुलं भवेत् १२३
उभयोः पार्श्वयोर्मद्धये त्वयः पट्टेन वेष्टयेत्
सप्तकीलसमायुक्तं मानांगुलेन कारयेत् १२४
भेरिकालक्षणं प्रोक्तं कत्रिकालक्षणं श्रुणु
षड्विंशत्यंगुलायामं तिथ्यंगुलन्तु विस्तृतम् १२५
पार्श्वे युगांगुलं हित्वा वर्तयेच्च शिखण्डवत्
षडंगुलप्रमाणेन तन्मद्धये वर्तयेत्क्रमात् १२६
युगांगुलप्रमाणेन भित्युत्सेधं प्रकीर्तितम्
द्वियवन्तु घनन्तस्य मद्धये गर्भन्तु कारयेत् १२७
परितः पट्टिकां कुर्यात् द्वयंगुलन्तु घनं भवेत्
द्वादशांगुलमायामं द्विवक्रं खरपादवत् १२८
नाहमर्द्धांगुलं तस्य एकपादन्तु योजयेत्
कत्रिकालक्षणं प्रोक्तं समिधो लक्षणं श्रुणु १२९
अदित्यांगुलमायामं कनिष्ठांगुलनाहकम्
पादेन पादसंयुक्तं अग्रेणाग्रसमायुतम् १३०

कवक्रं निर्वृणञ्चैव शुष्काश्चैव शुभप्रदाः
समिधो लक्षणं प्रोक्तमेवमिद्धमस्य लक्षणम् १३१
आयामं परिधीनाञ्च वेदयुक्तं दशांगुलम्
मद्ध्यांगुलपरीणाहमवक्रानिर्वृणासमा १३२
प्रोक्ता तु यत्समित्तेन परिधिध्वनि संग्रहेत्
एवं स्यात्परिधीनान्तु दर्भाणां लक्षणं श्रुणु १३३
स्त्रीपुन्नपुंसकाः काशास्त्रिविधास्समुदाहृताः
मृदुश्यामाचजायाचजायाकर्मसु योजयेत् १३४
ईषत्पक्वसमायुक्तं स्थिरः पुल्लिंगकाशकः
पुंस्त्रियायास्तु पुल्लिंगान् ग्राहयेत्तु विशेषतः १३५
नपुंसकं तु संग्राह्यं स्थिरं कोमळवर्जितम्
मूलस्थूलं भवेन्नारी अग्रस्थूलं नपुंसकम् १३६
मूलाग्रन्तु समञ्चैव पुमान्दर्भस्य लक्षणम्
विच्छिन्नाग्रासुभिन्नाग्रा अग्रास्याखण्डितास्तथा १३७
दर्भाणां लक्षणं ह्येवं कूर्चानां लक्षणं श्रुणु
नवकाशैश्चोत्तमं स्यात्सप्तकाशैस्तु मद्ध्यमम् १३८
कन्यसं भूतकाशैस्तु ग्रंधिव्योमांगुलं भवेत्
दक्षिणावर्तकं ग्रन्धिकूर्चाग्रं चतुरंगुलम् १३९
ग्रन्धिमूलात्समारभ्य रुद्रधर्मग्रहायतम्
कूर्चानां लक्षणं प्रोक्तं विष्टरस्य विधिं श्रुणु १४०
धातुकाशसमायुक्तं ग्रन्धितं सव्यमार्गतः
रव्यंगुलन्तु मूलाग्रं ग्रन्धिव्योमांगुलं भवेत् १४१
विष्टरस्य विधिः प्रोक्तो लंबकूर्चविधिं श्रुणु
एकविंशतिदर्भैश्च ग्रंधिरेकांगुलं भवेत् १४२
ग्रन्धिस्तुद्दक्षिणावर्तः कूर्चाग्रञ्चतुरंगुलम्
मूर्द्धादिपादपर्यन्तं लंबितं तत्तदायतम् १४३

लंबकूर्चविधिः प्रोक्तः परिस्तरणमुच्यते
धर्मकाशसमायुक्तं ग्रन्धिपद्मांगुलं भवेत् १४४
वेदांगुलं भवेदग्रं षट्त्रिंशदंगुलायतम्
परिस्तरणमेवं स्यात् दर्भमालाविधिं श्रुणु १४५
भूतवेदाग्निदर्भैर्वा व्योमहस्तं प्रलंबितम्
कनिष्ठांगुलनाहन्तु रज्जुं कुर्यान्मनोरमम् १४६
दर्भमालाविधिः प्रोक्तः प्रोद्गणी लद्गणं श्रुणु
सप्तविंशतिभिर्दर्भैः कलांगुलसमायतम् १४७
व्योमांगुलं भवेत् ग्रन्धिवेदांगुलं तथाग्रकम्
वेणिकाविष्टरावाथ प्रोच्यते प्रोद्गणी तथा १४८
कुशं काशसुवर्णैर्वा द्वाभ्यां वा त्रिभिरेव वा
एकी कृत्याग्रकान्तैश्च एकमूलन्तु योजयेत् १४९
षोडशांगुलमायामं वर्तयित्वा समन्ततः
द्विगुणी कृत्य तद्रज्जुं ग्रंधिरेकांगुलं भवेत् १५०
दद्गिणावर्तकं तस्य तदग्रञ्चतुरंगुलम्
अनामिकाया योक्तव्यमुभयोर्हस्तयोरपि १५१
सत्पवित्रकरेणैव सर्वकार्यं समाचरेत्
सपवित्र करेणैव कुर्यादाचमनक्रियाम् १५२
नोच्छिष्टं तत्पवित्रन्तु भुक्तोच्छिष्टन्तु वर्जयेत्
सौवर्णञ्चेत् पवित्रन्तु कुञ्जेनागफणेन तु १५३
नाहेनानामिकायास्तु कुर्याद्वृत्तं समं यथा
पवित्रविधिमाख्यातं पात्राणां लद्गणं श्रुणु १५४
मृण्मयं कन्यसं तारं ताम्रजं मद्धयमं भवेत्
सौवर्णेन कृतं पात्रमुत्तमञ्चेति कीर्तितम् १५५
तारं रसांगुलं ज्ञेयमुत्सेधन्तु युगांगुलम्
तत्पृष्ठांघ्रिसमायुक्तं चतुरंगुलमानतः १५६

आस्येन नासिकायुक्तं वेदांगुलसमायुतम्
पाद्यपात्रं समाख्यातं शृणवाचमनपात्रकम् १५७
आदित्यांगुलमानेन कुक्षिविस्तारमुच्यते
अष्टत्रिंशति मात्रेण नाहं कुक्षेस्तु मद्धयमम् १५८
अग्न्यंगुलगळोत्सेधमोष्ठं व्योमांगुलं भवेत्
आस्यतारं त्रिमात्रन्तु पार्श्वे घ्राणसमायुतम् १५९
पक्षांगुलसमायामं रंध्रं कानिष्ठिकं समम्
अद्धयर्द्धांगुलमानेन पादं कुर्यात्तु पृष्ठके १६०
एवमाचमनं पात्रमर्घ्यपात्रमथ श्रुणु
वस्वंगुलन्तु विस्तारमुत्सेधञ्चतुरंगुलम् १६१
अर्घ्यपात्रमिदं प्रोक्तं गंधपात्रमिदं श्रुणु
एवमेवं विशेषेण कल्पयेत् गन्धपात्रकम् १६२
गन्धपात्रं समाख्यातं पुष्पपात्रमथ श्रुणु
अष्टांगुलसमुत्सेधं विस्तारं विंशदंगुलम् १६३
नाहं भूतांगुलं ज्ञेयं उभयोः पार्श्वयोरपि
तन्मानं पादविस्तारं विधानकसमन्वितम् १६४
एवमेवन्तथा कुर्यात् वेत्रेणैवाथवा कुरु
पुष्पपात्रविधिः प्रोक्तमाज्यपात्रविधिं श्रुणु १६५
वेदांगुलं समुत्सेधं विस्तारन्तु षडंगुलम्
अष्टांगुलेन तस्योद्धर्वमेतद्धि घृतपात्रकम् १६६
सार्द्धभूतांगुलन्तारं सार्द्धांगुलसमुच्छ्रयम्
प्रणीतालक्षणं प्रोक्तं प्रोक्षणी लक्षणं शृणु १६७
बाह्वंगुलन्तु विस्तारमुत्सेधन्तु गुणांगुलम्
पात्राणामप्यलाभे तु शंखं वा शुक्तिकन्तु वा १६८
प्रोक्षणी पात्रमेवं हि शिवकुंभविधिं श्रुणु
तिथ्यंगुलप्रविस्तारन्निम्नं रुद्रांगुलायतम् १६९

आस्यं वेदांगुलं ज्ञेयं करठायामन्तथांगुलम्
ओष्ठमेकांगुलं ज्ञेयमर्द्धांगुलन्तु निर्गमम् १७०
गळादधस्त्रिरेखायुक् पक्वबिंबफलप्रभम्
अळंकरहितं स्निग्धं दाडिमी कुसुमप्रभम् १७१
शिवकुंभविधिः प्रोक्तो वर्द्धनी लक्षणं श्रुणु
रंध्रांगुलं प्रविस्तारं वर्द्धनीजठरस्य तु १७२
अग्न्यंगुलन्तदुत्सेधं वक्रमर्द्धांगुलं भवेत्
अग्न्यंगुलमधोष्ठन्तु पार्श्वे तु नासिकायुतम् १७३
सार्द्धांगुलप्रमाणेन उत्पलाकृतिवत्कुरु
सार्द्धांगुलं गळोत्सेधं त्रियवञ्चाष्टनिर्गतः १७४
वर्द्धनी लक्षणं प्रोक्तं कुंभानां लक्षणं श्रुणु
रुद्रांगुलन्तु विस्तारमुत्सेधं पर्वतांगुलम् १७५
त्र्यंगुलञ्चोष्ठविस्तारमुत्सेधं व्योममात्रकः
सार्द्धांगुलं गळोत्सेधं त्रियवञ्चोष्ठनिर्गमम् १७६
कुंभानां लक्षणं प्रोक्तं कलशानां श्रुणुष्वथ
वस्वंगुलप्रविस्तारमुत्सेधन्तु रसांगुलम् १७७
ग्रीवमर्द्धांगुलोत्सेधमोष्ठन्तत्सममेव तु
त्र्यंगुलञ्चोष्ठविस्तारं यवमोष्ठस्य निर्गतः १७८
पक्वबिंबफलोपेतं शेषं युक्त्याप्रकल्पयेत्
कलशस्य विधिः प्रोक्तं शरावलक्षणं श्रुणु १७९
पक्षांगुलसमुत्सेधं विस्तारन्तु गुणांगुलम्
शरावमेवमाख्यातं कुरिडकालक्षणं श्रुणु १८०
वेदांगुलन्तु विस्तारमग्न्यंगुलन्तु दैर्घ्यकम्
सार्द्धांगुलेन तारन्तु चोष्ठमर्द्धाङ्गुलं भवेत् १८१
पक्षांगुलं गळोत्सेधं पार्श्वे घ्राणसमायुतम्
व्योमांगुलप्रमाणेन पदं पृष्ठे नियोजयेत् १८२

कुण्डिकालक्षणं प्रोक्तं हविः पात्रविधिं श्रुणु
तस्य कुक्षेस्तु विस्तारं दशांगुलमिति स्मृतम् १८३
अर्द्धांगुलसमुत्सेधं कर्णोत्सेधमथांगुलम्
कण्ठं व्योमांगुलं ज्ञेयमास्य तारं कृतांगुलम् १८४
शेषं बुद्ध्याप्रकर्त्तव्यं पचेत्पात्रार्द्धकेशिवम्
द्रोणन्तु तण्डुलं यावत्तावत्ब्रह्मणमाचरेत् १८५
हविःपात्रविधिः प्रोक्तश्चरुपात्रविधिं श्रुणु
उदरस्य तु विस्तारन्धर्मांगुलमिति स्मृतम् १८६
कृतांगुलन्तदुत्सेधं कर्णमेकांगुलोच्छ्रयम्
आस्यमेकांगुलं प्रोक्तमोष्ठमेकांगुलं भवेत् १८७
चरुपात्रविधिः प्रोक्तः विधानस्य विधिं श्रुणु
पात्रस्य तारं यावत्तु तावत्कुर्याद्विधानकम् १८८
ईषन्निमग्नं तन्मद्ध्ये वलयन्तत्र विन्नयसेत्
विधानस्य विधिः प्रोक्तमुपदंशविधिं श्रुणु १८९
उदरस्य तु विस्तारमष्टांगुलमिति स्मृतम्
युगांगुलसमुत्सेधं कण्ठमेकांगुलं भवेत् १९०
षडंगुलेनास्य तारं ओष्ठमेकांगुलं भवेत्
पात्रं स्यादुपदंशाय जलाधारविधिं श्रुणु १९१
चतुर्विंशतिमात्रन्तु विस्तारमुदरस्य तु
विंशदंगुलमुत्सेधमास्य तारं कलांगुलम् १९२
ओष्ठं पञ्चांगुलं ज्ञेयं तस्याधस्तात्त्रिरेखया
यवत्रयप्रमाणेन कुर्यादुदरबन्धनम् १९३
विस्तारमुदितं यत्र तस्योद्धर्वेनैववर्द्धयेत्
पात्राणामपि सर्वेषां तन्नाहविधिरुच्यते १९४
पाद्यपात्रादिपात्राणि कुर्यान्नानांगुलेन तु
जलाधारमिति प्रोक्तं तरंगस्य विधिं श्रुणु १९५

क्षौमपट्टदुकूलैर्वा कुर्यात्कार्प्पासशालिना
तिथिवस्त्रयुतं वापि चार्कवस्त्रयुतन्तु वा १९६
रन्ध्रवस्त्रयुतं वापि चास्येरज्जुसमायुतम्
नानावर्णसमायुक्तन्नानारूपसमन्वितम् १९७
एवन्तरंगमाख्यातं स्तंभवेष्टनमुच्यते
गात्रायामसमं वस्त्रन्निच्छिद्रन्तेन वेष्टयेत् १९८
स्तंभवेष्टनमेवन्तु वितानमधुनोच्यते
दैर्घ्यं वै पङ्क्तिमानं स्याद्विस्तारमपि तत्समम् १९९
दुकूलपट्टदेवांगैः कार्पासेनैव कारयेत्
वितानलक्षणं प्रोक्तं केतूनां लक्षणं श्रुणु २००
विंशदंगुलविस्तारमायामं त्रिंशदंगुलम्
विस्तारेण समं पुच्छन्तस्योद्धर्वे शिखरं भवेत् २०१
चतुःपुच्छं त्रिपुच्छं वा पुच्छद्वयमथापि वा
पार्श्वे कदलिकायुक्तं वेत्रद्वयसमायुतम् २०२
केतुलक्षणमेवोक्तं पताकालक्षणं श्रुणु
नवहस्तमष्टहस्तं वा सप्तहस्तमथापि वा २०३
ध्वजवत्कारयेच्छेषन्नानावस्त्रैश्च कारयेत्
पताकालक्षणं ह्येवं क्षुद्रद्ध्वजविधिं श्रुणु २०४
बाणांगुलन्तु विस्तारं द्वादशांगुलदैर्घ्यकम्
वेत्रद्वयसमायुक्तं शेषन्तु केतुवत्कुरु २०५
क्षुद्रद्ध्वजविधिः प्रोक्तं शिखरे रज्जुसंयुतम्
ध्वजानां लक्षणं प्रोक्तं उष्णीषस्य विधिं श्रुणु २०६
षट् हस्तं पञ्चहस्तं वा पञ्चभागेन विस्तृतः
सुश्लक्ष्णं सदशं सूक्ष्मं सितं रोमविवर्जितम् २०७
शिरसञ्चिबुकेनैव कर्णाभ्याञ्चैव वेष्टयेत्
पुच्छं वै वामकर्णन्तु वेष्टयेत्तु प्रदक्षिणम् २०८

वेष्टयित्वेवमेकन्तु शेषं शिरसिवेष्टयेत्
उष्णीषलक्षणं प्रोक्तमुत्तरीयविधिं श्रुणु २०९
बाणहस्तायतं वापि वेदहस्तायतन्तु वा
तालमात्रप्रविस्तारं बन्धयेत्तु द्विपुच्छकौ २१०
यज्ञोपवीतवद्धार्यमुत्तरीयं विशेषतः
यजने स्थापने चाग्नि कार्ये चैवोत्सवे जपे २११
उष्णीषञ्चोत्तरीयञ्च धारयेत् देशिकोत्तमः
उत्तरीयविधिः प्रोक्तं वस्त्रलक्षणमुच्यते २१२
देवांगं क्षौमकं वापि नेत्रं कार्पाससंभवम्
उत्तमन्नवहस्तं स्यात् मद्धयमं रसहस्तकम् २१३
अधमं बाणहस्तं स्यात् चतुर्भागैकविस्तृतम्
सामान्नचवस्त्रमेवन्तु सर्वकार्यन्तु संग्रहेत् २१४
पीठोत्सेधस्य चाद्धयर्द्धं वस्त्रविस्तारमुच्यते
तस्याष्टांगुलमायामं सदशन्तु सलक्षणम् २१५
जीर्णितञ्चाग्निदग्धञ्च आखुदष्टञ्च वर्जयेत्
वस्त्रस्य लक्षणं प्रोक्तं पर्यंकानां विधिं श्रुणु २१६
अरडजम्मुरडजञ्चैव रोमजञ्चर्मजन्तथा
वामजञ्चैव पञ्चैते शयनं संप्रकल्पयेत् २१७
खत्वायामसमायाममायामार्द्धन्तु विस्तृतम्
उत्सेधं हस्तमानन्तु प्रहिणं व्याघ्रद्वर्मणाम् २१८
पूरितञ्चानिलेनैव चर्मजञ्चेति कीर्तितम्
आधारं पूर्ववत्कृत्वा रोमैः कृष्णमृगोद्भवैः २१९
संपूर्णकञ्च यत्तल्पं रोमजञ्चेति कीर्तितम्
पूर्वोक्तलक्षणोपेतं वस्त्रेण प्रहणं कुरु २२०
शाल्मली तूलसंपूर्णम्मुरडजञ्चेति कीर्तितम्
प्रागुक्तलक्षणोपेतं देवांगैः पञ्जरं कुरु २२१

हंसरोमेण संपूर्णमण्डजं चेतिकीर्तितम्
सुसितं सूक्ष्मसुश्लक्ष्णं कार्पासेनैव संभवम् २२२
उपरिपूरणं यत्तु वामजं चेतिकीर्तितम्
उपर्युपरिकल्प्येवं पर्यंकश्चैव पञ्चधा २२३
पर्यंकानां विधिः प्रोक्तश्चोपधानविधिं श्रुणु
षट्त्रिंशदंगुलायामं तन्नाहत्रिगुणं भवेत् २२४
हंसरोमसुसंपूर्णं देवांगेनैव पञ्जरम्
कार्पासपंजरेणैव कारयेदुपवेष्टनम् २२५
उपधानं हस्तपादानां युक्त्या तु परिकल्पयेत्
उपधानविधिः प्रोक्तं कक्ष्यायालक्षणं श्रुणु २२६
अग्न्यंगुलन्तु विस्तारमश्विन्नयंगुलमेव च
कार्पासेन तथा कुर्याद्यावत्खट्वाप्रवेष्टनम् २२७
कक्षायालक्षणं प्रोक्तं प्रच्छन्नपटमुच्यते
द्वारायामसमं दीर्घं विस्तारस्यार्द्धविस्तृतम् २२८
बाणहस्तसमायामं पटस्याधारदण्डकम्
प्रच्छन्नपटमेवन्तु छत्रलक्षणमुच्यते २२९
चतुर्मुखप्रविस्तारं समवृत्तमधोमुखम्
आधारं वैणवेनैव तन्तुनाबन्धयेत्क्रमात् २३०
वस्त्रेण वेष्टयेत्सर्वं मुक्तादामैश्च रत्नकैः
मकुटं हेमपट्टैश्च भूषयेत् भूषणार्हकैः २३१
वस्त्रेण मद्धयमं कुर्यात्तालपत्रैश्च कन्नयसम्
बाणानिरसतालैर्वा नाळायामं प्रकीर्तितम् २३२
छत्रलक्षणमेवोक्तं पिंछालक्षणमुच्यते
बर्हिपिंछं प्रकर्तव्यं विस्तारं त्रियवं भवेत् २३३
वस्त्रेण वेष्टयेत्सर्वं पुनः पिंच्छैश्च वेष्टयेत्
आधारमयसा कृत्वा हैमेन मकुटं कुरु २३४

शेषं बुद्ध्याप्रकर्तव्यं नाळस्य च्छत्रनाळवत्
पिंच्छलक्षणमेवन्तु चामरस्य विधिं श्रुणु २३५
दर्भेण दारुजेनैव शुल्बेन रजतेन वा
सौवर्णेनैव रत्नेतदण्डं कुर्याद्विचक्षणः २३६
चतुर्विंशांगुलायामं दण्डनाहं शरांगुलम्
नानागण्डिकयायुक्तन्नाना कुंभलतान्वितम् २३७
नानाकर्णसमायुक्तन्नानामण्डलसमायुतम्
संयुक्तञ्चमरीवालैर्यथाशोभन्तु कारयेत् २३८
चामरस्य विधिः प्रोक्तं मयूरव्यजनं श्रुणु
दण्डन्तु पूर्ववत्प्रोक्तं शिखिनो भिन्नपिंच्छकैः २३९
क्रमेणैव तु संयोज्य शेषं युक्त्याप्रकल्पयेत्
मयूरव्यञ्जनं ह्येवं दुकूलव्यञ्जनं श्रुणु २४०
षोडशांगुलविस्तारं वैणवेनैव वर्तुळम्
क्षौमदेवांगपट्टैर्वा दुकूलेनैव वेष्टयेत् २४१
त्र्यंगुलन्दण्डनाहन्तु षट्त्रिंशदंगुलायतम्
नानातन्तुसमायुक्तं दण्डमात्रं विचित्रयेत् २४२
दण्डाग्रन्तु त्रिधा कृत्वा शेषं युक्त्या प्रकल्पयेत्
पर्यंकादीनि सर्वाणि कुर्यान्मानांगुलेन गु २४३
दूकूलव्यञ्जनं ह्येवन्धूपपात्रविधिं श्रुणु
हेमेन रजतेनैव ताम्रेण पैत्तळेन वा २४४
वेदांगुलन्तु विस्तारं पत्रोत्सेधन्तदर्द्धकम्
ओष्ठमर्द्धांगुलं प्रोक्तं बाह्ये पद्मदळान्वितम् २४५
ग्रीवस्याधो द्विपादन्तु पादायामद्विमात्रकम्
अब्ध्यंगुलसमायामन्नाहं पक्षांगुलं भवेत् २४६
दण्डपुच्छेन पादन्तु कारयेद्गजपादवत्
पञ्चांगुलन्तु विस्तारन्नानावल्लिसमायुतम् २४७

अग्न्यंगुलं विधानोच्चमनेकसुषिरान्वितम्
कारयेन्मुकुळाकारं शेषं बुद्ध्याप्रकल्पयेत् २४८
धूपपात्रविधिः प्रोक्तं धूपघरटाविधिं श्रुणु
बाणांगुलं तु विस्तारमुत्सेधं तत्समं भवेत् २४९
त्रियवञ्चोष्ठविस्तारं तन्नाहं तु चतुर्यवम्
उपपट्टिकयायुक्तं मात्रेण शिखरान्वितम् २५०
चतुर्यवं गळोत्सेधं जिह्वावेदांगुलायतम्
घरटायाञ्चैव तन्नाहं विस्तारार्द्धेन विस्तृतम् २५१
अग्न्यंगुलेन दरडोच्चं नाहं तत्सममेव तु
दरडस्याग्रे वृषं वापि नळिनं शूलमेव च २५२
शेषं युक्त्या प्रकर्तव्यं शुद्धकंसेनसुव्रतम्
कृत्वा तु विधिना धीमान् धूपदाने तु घोषयेत् २५३
धूपघंटाविधिः प्रोक्तं दीपपात्रविधिं श्रुणु
धूपपात्रवदाकारं विशेषं किञ्चिदस्ति हि २५४
अग्न्यंगुलं तु विस्तारमायामं तु शरांगुलम्
अश्वत्थपत्रवत्कुर्यादोष्ठस्य च द्वयं भवेत् २५५
मद्ध्येनाभिसमायुक्तं मुकुळेनैव वर्जितम्
नवशक्तिनवदीपं स्यात्सप्तदीपेषु मातरः २५६
पञ्चदीपे निवृत्यादिरेकदीपे सरस्वती
दीपपात्रविधिः प्रोक्तं दीपाधारविधिं श्रुणु २५७
एकहस्तं समारभ्य नवहस्तांतमेव च
शरांशं पादविस्तारमाज्याधारं तु तत्समम् २५८
तस्योर्ध्वे मुकुळाकारं धर्मांशेन प्रकल्पयेत्
नानापट्टिकयायुक्तं नानाकुंभसमायुतम् २५९
एकदरडेन कर्तव्यमनुरूपक्रमेण तु
शुद्धकांस्यकतारैर्वा पैत्तळेनैव कारयेत् २६०

दीपाधारमिदं वक्ष्ये नीरांजनाय पात्रकम्
सौवर्णं रजतं ताम्रं ज्येष्ठादीनि क्रमेण तु २६१
षट्त्रिंशदंगुलायाममुत्तमं तु प्रकीर्तितम्
तस्मात्षडंगुलं हीनं मद्ध्यमं परिकल्पयेत् २६२
हस्तमात्रप्रविस्तारं कन्यसं पात्रमुच्यते
कर्णिका तत्त्रिभागैकं तत्पञ्चांशैकमुच्छ्रयम् २६३
यवद्वयविशालेन पट्टिकां परितः कुरु
उत्सेधं तत्समं ज्ञेयं तद्बाह्योष्टदळं भवेत् २६४
ओष्ठं तु परितः कुर्यात् कर्णिकोच्छ्रायमानतः
एवं कुर्याद्विशेषेण पूर्णचंद्रसमं यथा २६५
युगांगुलसमायामं दीपाधारघटोपमम्
अश्विन्यंगुळविस्तारं घटवक्त्रं प्रकीर्तितम् २६६
प्रोक्तं पद्मांगुलं रंध्रं कर्णिकामद्ध्यमे युतम्
दीपाधाराणयधिष्ठात्रा योजयेत्तु दळं प्रति २६७
रंध्राधारं शराधारं एकाधारमथापि वा
मद्ध्ये चैव महाशासु पञ्चधाराणि कल्पयेत् २६८
अग्न्यंगुलोच्चमानेन पृष्ठपादं प्रकल्पयेत्
पात्रं नीराजनायेदं महाघण्टाविधिं श्रुणु २६९
शुद्धकांस्येन कर्तव्यं विस्तारं पर्वतांगुलम्
अब्ध्यंगुलं तदुत्सेधं गळोत्सेधं गुणांगुलम् २७०
नाहं रसांगुलं तस्य पट्टिकाद्वयसंयुतम्
शिखरोच्चं द्विमात्रेण तन्नाहं भूधरांगुलम् २७१
सुषिरेण समायुक्तं चतुर्नासिसमायुतम्
ताराद्धार्द्धवृद्धितं नाहं जिह्वारंध्रांगुलायतम् २७२
शिखरावलयोपेतं शेषं युक्त्याप्रकल्पयेत्
महाघण्टाविधिः प्रोक्तः स्थलिका लक्षणं श्रुणु २७३

कन्यसं कांस्यसंभूतं रजतं मद्धयमं भवेत्
हेमन्तु चोत्तमं प्रोक्तं स्थलिका नवधोदिता २७४
द्वादशांगुलविस्तारमधमाधममुच्यते
अग्न्यंगुलविवृद्धया तु षट्त्रिंशदंगुलान्तकम् २७५
अष्टधातारमेवन्तु कन्नयसादित्रयंत्रयम्
द्वियवञ्चोष्ठविस्तारं उत्सेधं तत्समं भवेत् २७६
वेत्रं युगांगुलेनैव अधमस्याधमस्य तु
यवेनैकेन वृद्धया तु यावन्नवयवांतकम् २७७
स्थलिका नामथाष्टानां वेत्रेष्टौ संप्रकल्पयेत्
स्थलिकालक्षणं प्रोक्तं दर्व्याश्च लक्षणं श्रुणु २७८
द्वादशांगुलमायामं तद्वैर्घ्यं पञ्चधा भवेत्
अद्धयर्द्धांशेन पुच्छं स्यात्पक्षांशमग्रमुच्यते २७९
त्रियवं पुच्छतारं तु वक्त्रतारं शरांगुलम्
व्योमांगुलप्रमाणेन मद्धयतारं विधीयते २८०
अर्द्धांगुलं तु हीनं स्यात् मद्धयमस्याधमस्य तु
दर्व्याश्च लक्षणं प्रोक्तं त्रिपादलक्षणं श्रुणु २८१
चतुर्त्थांशं खपादी च बकपादत्रिपादिका
कर्तव्यं स्थालिकापादं लक्षणेन विशेषतः २८२
उच्चं युगांगुलं ज्ञेयं मुखतारं तु तत्समम्
अग्निपादसमायुक्तं त्रिवक्रांशं खपादिका २८३
तारं षडंगुलं ज्ञेयं तच्चतुर्गुणमायतम्
ईषत्त्रिभागिकापादं पक्षांगुलं तु नाहकम् २८४
मृगराट्पादवन्मूले बकपादिप्रकीर्तितम्
शरांगुलं तु विस्तारमुत्सेधं पर्वतांगुलु २८५
अग्निपादसमायुक्तं त्रिवक्रांगुष्ठनाहकम्
शरावाकृतिवन्मूले शेषं बुद्धया प्रकल्पयेत् २८६

एवं त्रिपादिका प्रोक्ता स्थालिकापादमुच्यते
पिण्डिकोत्सेधमानं यदुत्सेधं तत्समं भवेत् २८७
शेषं पूर्वोक्तवत्कुर्यात् द्विगुणं पादनाहकम्
पादाग्रेषु खुरं कुर्यात् शेषं युक्त्या तु कारयेत् २८८
स्थलिकापादमेवोक्तं पाद्याधारविधिं श्रुणु
कलांगुलं तु विस्तारमुत्सेधं पर्वतांगुलम् २८९
सोमांगुलं भवेदोष्ठमाकृतिस्स्याच्छरावत्वान्
उभयोः पार्श्वयोश्चैव वलयेन समन्वितम् २९०
पृष्ठे त्रिपादसंयुक्तं चतुरंगुलमायतम्
वक्रद्वयसमायुक्तं तस्याधस्सिंहपादवत् २९१
पाद्योदकं तथा तस्मिन्पात्रे तु परिवर्जयेत्
पाद्याधारमिदञ्चैवाचमनाधारमुच्यते २९२
कलांगुलसमायामं मुखतारं यवं भवेत्
ओष्ठमेकांगुलं प्रोक्तं धुत्तूरकुसुमोपमम् २९३
ऊर्ध्वकायमिदं कृत्वा दण्डायामं नवांगुलम्
अग्न्यंगुलं तु विस्तारं द्विगुणं पादविस्तरम् २९४
गंडिकात्रयसंयुक्तं दण्डं कुर्याद्विशेषतः
वर्जयेत्तु तथैतस्मिन्पात्रेत्वाचमनोदकम् २९५
प्रोक्तमाचमनाधारं दर्पणस्य विधिं श्रुणु
स्मृत्यंगुलं तु विस्तारं पूर्णचंद्राकृतिर्यथा २९६
नाळं वस्वंगुलं ज्ञेयं पादं वेदांगुलं भवेत्
नानापट्टिकयायुक्तं शुद्धकांस्येन कारयेत् २९७
विस्तारमुदितं पूर्वमेषामर्द्धेन वर्तयेत्
तन्नाहञ्चैव सर्वेषां नाहमित्यभिधीयते २९८
एवं तु दर्पणं प्रोक्तं पादुकस्य विधिं श्रुणु
नित्योत्सवस्य यात्रांते पूजनार्त्थं तु पादुका २९९

ताम्रतारसुवर्णैर्वा कारयेल्लक्षणान्विता
त्रिमात्रार्द्धं तु मात्रांतं अर्द्धेनार्द्धेन वर्द्धयेत् ३००
रंध्रायामानि चोक्तानि कन्यसादित्रयंत्रयम्
आयामस्यार्द्धमेवं तु अग्रपादस्य विस्तृतम् ३०१
षष्ठांशेन तु मद्धयांतमायामं युगभागिकम्
एकभागं भवेदुच्चं गुणांशे द्वयंशकं खुरम् ३०२
शेषमूर्ध्वदलं प्रोक्तं हले युक्त्या प्रकल्पयेत्
अङ्गुष्ठोच्चं तलोच्चस्य चतुर्भागत्रिभागिकम् ३०३
तच्छरांशे युगांशं तु नालशेषं तु पुष्करम्
अङ्गुष्ठोच्चसमं पुष्पं विस्तारं मुकुलान्वितम् ३०४
पुष्पोन्नते त्रिभागैकं मुकुलं कारये द्विज
एवं सलक्षणं कृत्वा प्रोक्षणं विधिना कुरु ३०५
मण्टपस्य तु मध्येऽस्मिन् स्थण्डिलं शालिना कुरु
परिस्तीर्य ततो दर्भैर्हृदा गन्धादिनार्चयेत् ३०६
नववस्त्रमथास्तीर्य पञ्चगव्यैस्तु पादुकम्
क्षालयेदष्टमृद्भिस्तु शुद्धतोयेन सेचयेत् ३०७
वस्त्रोपरिन्यसेद्धीमान् पादुकं वर्मणा ततः
वस्त्रेणोपरि संछाद्य स्थापयेत्कलशाष्टकान् ३०८
मध्ये च पादुकाग्रे तु वृषकुम्भं निधापयेत्
सकूर्चान् सापिधानां च वस्त्रान् दिक्पालात्मकात् ३०९
मध्यमे वृषकुम्भे तु वृषबीजन्यसेत्ततः
धेनुमुद्रां प्रदृश्याथ हैमं तत्र विनिक्षिपेत् ३१०
पुण्याहं वाचयेत्तत्र स्थण्डिलं सिकतेन तु
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ३११
समिधाज्य चरुं लाजान् तिलान् सद्यादिमन्त्रतः
होमयेत्तु विशेषेण प्रत्येकं पञ्चविंशतिः ३१२

घृतेन वृषमन्त्रेण हुनेदष्टोत्तरं शतम्
प्रभाते सुमुहूर्ते तु मन्त्रन्यासमथाचरेत् ३१३
जयादिरभ्याधानं च राष्ट्रभृच्च क्रमाद्धुनेत्
स्विष्टमग्नेति मन्त्रेण होमं परिसमापयेत् ३१४
आचार्यः पूजयेत्तत्र वस्त्रनिष्कादिभिः क्रमात्
वृषबीजं समादाय कुम्भान् तत्पादुकद्वये ३१५
तज्जलं चाभिषेकं तु कुम्भान्यादाय देशिकः
तत्पादुकस्योपरिष्टास्तु तत्तद्बीजानि विन्यसेत् ३१६
तत्कुम्भस्तज्जलेनैव अभिषिच्य स्वबीजकैः
अर्चयेद्वृषमन्त्रेण मुद्गान्नं तु निवेदयेत् ३१७
सर्वालङ्कारसंयुक्तं प्रासादाभ्रमणं कुरु
एवं कृत्वा विधानाच्च अर्चयेत्प्रतिसन्धिषु ३१८
पादुकास्थापनं प्रोक्तं शृणु गात्रस्य लक्षणम्
षोडशाङ्गुलमायामं विस्तारं तु द्विमात्रकम् ३१९
मध्यचक्रसमायुक्तं द्वियवं घनमुच्यते
वेदाङ्गुलं भवेन्मुष्टिर्दारुणा परिकल्पयेत् ३२०
भूताङ्गुलपरीणाहमधः पट्टेन वेष्टयेत्
गात्रस्य लक्षणं प्रोक्तं जलद्रोणिविधिं शृणु ३२१
वेदभारजलैः पूर्णं श्रुत्यर्थं वाथ वर्तुलम्
वलयैर्युग्मपार्श्वे तु संयुक्तं ग्रीववर्जितम् ३२२
लक्षणं च जलद्रोण्यां लोहजं मृण्मयेत्तु वा
एवं कृत्वा विधानेन यन्त्रिकालक्षणं शृणु ३२३
मध्याङ्गुलपरीणाहं तन्मूले च यवद्वये
वक्त्रद्वयसमायुक्तं गर्गलस्यार्हकं कुरु ३२४
यन्त्रिकालक्षणं प्रोक्तमुल्कलस्य विधिं शृणु
हस्तमात्रसमायामं कनिष्ठाङ्गुलिनाहकम् ३२५

दीपस्य धारमग्रे तु कुर्याद्धूर्धूरपुष्पवत्
त्रियङ्गुलेनास्य तारं गर्तायामं गुणाङ्गुलम् ३२६
कारयेदधसाधस्ता मुष्टिं तु दारुणा कुरु
उल्कलस्य लक्षणं प्रोक्तं गोलकालक्षणं श्रुणु ३२७
अर्धाङ्गुलसमायुक्तं पूजभागसमायुतम्
नाहं चैव परिग्राह्य कुर्याद्धैमेन गोलकाम् ३२८
पार्श्वलक्षणमुद्धृत्य सूत्राग्रे सुषिरत्रयम्
नानारत्नसमायुक्तं लिङ्गवत्कारयेत्ततः ३२९
गोलकालक्षणं प्रोक्तं पट्टलक्षणमुच्यते
रुद्राक्षाङ्गुलम--- पट्टतारं प्रकीर्तितम् ३३०
लिङ्गनाहं तु नाहं स्यात्पट्टं हैमेन कारयेत्
पट्टलक्षणमेवं स्यात्पुष्पलक्षणमुच्यते ३३१
अग्रयङ्गुलं तु विस्तारं मध्यमे कर्णिकायुतम्
दलाष्टकसमायुक्तं सरत्नं काञ्चनेन तु ३३२
सुवर्णकुङ्कुमं ह्येवं मकुटस्य विधिं श्रुणु
कपर्दमकुटं चैव किरीटमकुटं तथा ३३३
करण्डमकुटं चैव केयूरं मकुटं तथा
ईशानात्करण्ठपूरं च कुक्षिबन्धनमेव च ३३४
कटिसूत्रं नूपुरं च चिह्नवीरं तथैव च
करण्ठमालाय यज्ञं च प्रतिमाणां यथार्हकम् ३३५
नानारत्नसमायुक्तं सर्वहेमेन कारयेत्
धूपपात्रोदिकान्सर्वान्मानाङ्गुलेन कारयेत् ३३६
प्रोक्षयेत्पञ्चगव्येन पुरुषेण विशेषतः
प्रासादस्याग्रतः कुर्यात् मण्टपं चतुरश्रकम् ३३७
संप्रोक्ष्य हृदयेनैव पात्रेऽन्यैव तु विन्यसेत्
शिवाग्निं कारयेद्धीमान् पूर्वोक्तविधिना सह ३३८

समिधाज्यचरुं चैव सद्यास्त्रहृदये हुनेत्
प्रत्येकं तु शतं हुत्वा कृत्वान्ते स्पर्शनं कुरु ३३९
आदावन्ते च कर्तव्यमग्निकार्योक्तमार्गतः
हृदयेनैव संग्राह्यमीशानेन तु पूजयेत् ३४०
एवमाभरणं प्रोक्तमाहुतीनां विधिं श्रुणु
कषार्धगोघृतेनैव एकाहुतिसमाचरेत् ३४१
द्विपर्वस्त्राव तर्जन्या बिन्दुरित्यभिधीयते
बिन्दुषट्कं तु कर्षार्धमद्वयं कर्षकं भवेत् ३४२
कर्षद्वयं तु मुष्टिं स्यात् तद्वयं प्रसृतिर्भवेत्
तद्वयं कुसुमं प्रोक्तं तद्वयं धारणं भवेत् ३४३
धारणाष्टपलं प्रोक्तं प्रस्थं विंशत्पलं भवेत्
दुग्धस्य मधुनो दध्नस्सृवपूर्णाहुतिर्भवेत् ३४४
शुक्तिमात्रेण जुहुयात्तिलं चैव तु सर्षपम्
ओदनं चाकृमात्रेण शुक्तिर्धेनकुलर्थकम् ३४५
निष्पापं नवभिः प्रोक्तं यवा वेणुकुलस्थवत्
शक्तिमात्रेण शालीं तु विंशद्भिर्माषमुद्गकौ ३४६
पृथुकं धानकं सत्तु मुष्टिमात्रेण होमयेत्
प्रियङ्गु कोद्रवं चैव अल्पं तु तिलवद्भवेत् ३४७
फलानि स्वमाणेन पत्राणि शरसंख्यया
त्रिंशदंशेन भागेन भित्वा तु पनसं हुनेत् ३४८
विभीती फलमात्रेण कन्दं भित्वा तु होमयेत्
--- गुलं प्रोक्तमपूपस्त्वत्प्रमाणतः ३४९
क्षीरान्नं कृसरान्नं च गुलान्नं शुक्तिमात्रतः
करेण जुहुयाद्रव्यं द्रवद्रव्यं सुवेण च ३५०
स्थाल्यान्नं च विनिक्षिप्य हुनेद्यत्तत्प्रमाणतः
पूर्णाहुतिं स्रुवां कुर्यात्सुपुष्पोपरिविन्यसेत् ३५१

स्रुक्स्रुवं मङ्गलतोरणभेरिमरटपकुरुडसमित्कलशानाम्
मानविहीनततोधिकमानं दारधनक्षयकृत्कलह स्यात् ३५२

इति कारणे प्रतिष्ठातन्त्रे क्रियापादे करणाधिकारः पटलः

अंकुरार्पणविधिपटलप्रारंभः

अतःपरं प्रवक्ष्यामि अंकुरार्पणमुत्तमम्
उत्सवे स्नपने चैव प्रोक्षणे स्थापने तथा १
अन्यस्मिन्मंगले कार्ये मंगलांकुरमुच्यते
द्विविधं तत्समाख्यातं भद्रं क्षुद्रन्तथैव च २
सर्वेषु यागपूर्वेषु नवमे सप्तमे हनि
पञ्चमे वा शिवं पूज्य कारयेदंकुरार्पणम् ३
अधिवासनानि रात्रौ तु तद्दिनात्पूर्वरात्रके
अंकुरार्पणकार्ये तु निश्चित्यदिवसं तथा ४
नवाहे चैवसप्ताहे पञ्चाहे त्रय्यहेपि वा
सद्योंकुरार्पणं वापि कारयेदंकुरार्पणम् ५
बीजानामधिपश्चंद्रः तस्मात्तु निशि निर्वपेत्
अनंकुरन्तु यत्कर्म तत्कर्मनिष्फलं भवेत् ६
अंकुरादङ्कुरं नास्ति तत्कर्माणयन्तरं विना
दिवाकालेन कर्तव्या कृतञ्चेत्सस्यनाशनम् ७
चंद्रदृष्टौ पराह्णे वा ततस्सद्यांकुरार्पपेत्
सद्यांकुरार्पणञ्चेत्तु दिवौ वा निशिनिर्वपेत् ८
पालिकाघटिका चैव शरावाच त्रिधा भवेत्
सौवर्णं राजतं वापि ताम्रं वा मृणमयन्तु वा ९
पालिकाष्टादशांगुल्यामुच्चम्मात्रांगुलेन तु
पालिकामूलविस्तारं षोडशांगुलमुच्यते १०
तदर्द्धं पादविस्तारं तत्षड्भागैकमोष्ठकम्

विस्तारस्य त्रिभागैकं वर्तितं बिलमुच्यते ११
एवं पादक्रमं प्रोक्तं शेषदण्डं प्रकल्पयेत्
विस्तारस्य त्रिभागैकं दण्डविस्तारमुच्यते १२
पालिकालक्षणं प्रोक्तं घटिकालक्षणं श्रुणु
घटिकाघटविस्तारमष्टांगुलमुदाहृतम् १३
पालिकापादवत्कुर्यात् दण्डं वै चतुरंगुलम्
पञ्चवक्त्रसमायुक्तं घटिकाकरयेत् बुधः १४
घटिकालक्षणं प्रोक्तं शरावमधुनोच्यते
शरावमुखविस्तारमष्टांगुलमुदाहृतम् १५
तदर्द्धं पादविस्तारमुत्सेधाष्टांगुलोच्छ्रयम्
नाहं स्यात्पलिकादीनां विस्तारार्द्धेन वर्तितम् १६
काळं भिन्नञ्च सुषिरं भेदञ्चैव तु लीनकम्
वर्जयेत्तु प्रयत्नेन कारयेल्लक्षणान्वितम् १७
ईशोविष्णुर्विरिञ्चिश्च पालिकाद्यधिदेवताः
प्रत्येकमष्टकं ग्राह्यं ततस्स्थापनमारभेत् १८
भवं शर्वन्तथेशानं पशुपत्युग्रकौ तथा
रुद्रं भीमं महादेवं पालिकाद्यष्टविन्यसेत् १९
केशवं माधवञ्चैव नारायणं त्रिविक्रमम्
वामनं श्रीधरं विष्णुं पद्मनाभं घटेन्नयसेत् २०
त्रयीमयं त्रिमूर्तिञ्च पद्माक्षं पद्मयोनिकम्
चतुर्म्मुखञ्च धातारं पितामहं जयन्तथा २१
ब्रह्माष्टकमिदं ज्ञेयं शरावे क्रमशोन्नयसेत्
पूजयित्वा यथान्नयायं कारयेत्पालिकादिषु २२
चतुर्विंशतिसंख्याभिस्स्थापयेत्तु विशेषतः
षोडशद्वादशञ्चैव वसुचैव चतुर्त्थकम् २३
प्रासादस्याग्रके वापि दक्षिणे चोत्तरेऽपिवा

गोमयालेपिते शुद्धे मण्टपे समलंकृते २४
प्राक्सूत्रं वसुभिः कुर्यादुदक्सूत्रन्तथैव च
मद्धये व्योमपदाग्राह्य लेपयेदभिकोष्ठकम् २५
त्रीणि चाभ्यन्तरे त्यक्त्वा चतुर्दिक्षु क्रमाद्बुधः
द्वारार्द्धञ्च महाशासु पदमेकं परित्यजेत् २६
स्थण्डिलं कारयेद्धीमानष्टद्रोणैश्च शालिभिः
तस्य मद्धये लिखेत्पद्ममष्टपत्रं सकर्णिकम् २७
स्थापयेत्कर्णिका मद्धये चंद्रकुंभं नवं शुभम्
सौवर्णं राजतं वापि पंकजं त्वर्द्धचंद्रवत् २८
कुंभमद्धये तु तोयं स्यात्तोयमद्धये तु पंकजम्
पंकजस्यैव मद्धये तु चंद्ररूपं प्रशस्यते २९
ससूत्रं सापिधानञ्च सवस्त्रं वारिपूरितम्
पूजयित्वा यथान्यायं वारुणं मन्त्रमुच्चरन् ३०
पायसान्नं ददेत्पश्चात्तांबूलन्तु निवेदयेत्
पालिकादौ न्यसेद्धीमान् द्वाराणां पार्श्वयोर्द्वयोः ३१
विन्यसेत् घटिकादौ तु कोणेषु च पदद्वयोः
शेषेषु च शरावाणि स्थापयेद्धृदयेन तु ३२
दर्भाग्रैश्च कुशाग्रैर्वा निच्छिद्रं सुषिरैः कुरु
अश्वत्थपत्रपूर्वेण तन्तुना वेष्टयेत्पृथक् ३३
वालुकैर्गोमयैर्मृद्भिः पालिकादीनि पूरयेत्
पूजयित्वा यथान्यायं पुण्याहं तत्र कारयेत् ३४
ततोजनेभ्यस्तांबूलं दापयेत्तु विशेषतः
बीजानि वापयेत्पश्चात्पयसिप्लावितानि वै ३५
मुद्गमाषकुळुत्थाश्च निष्पावं शिंबमाढकम्
तिलसर्षपशालिश्च सिद्धार्त्थं नवबीजकम् ३६
उत्तमं नवबीजानि षड्बीजं मद्धयमं भवेत्

अधमं त्रीणि बीजानि यथालाभं प्रकल्पयेत् ३७
पयसैव तु संक्षाळ्य विन्यसेत्तु क्रमेण तु
बीजमुख्यं विशेषेण विन्यसेद्बीजमद्धयमे ३८
शकृत् मृद्भिस्तदापूर्यसेचयेत्तु जलेन तु
तिलसर्षपमुद्गानि माषशिंबाढकानि तु ३९
कुळुत्थं सप्तबीजानि हृदयेन विशेषतः
आचार्योवार्पयेत्तत्र प्राङ्मुखोदङ्मुखोऽथवा ४०
सोमकुंभस्थतोयेन पालिकादीनि सेचयेत्
आचार्यं पूजयेत्तत्र वस्त्रहेमांगुलीयकैः ४१
भद्रमेतत्समाख्यातं क्षुद्रं वै तत् शृणुष्वथ
प्राङ्मुखं पञ्चसूत्राणि तथैव च उदङ्मुखम् ४२
मद्धये चतुष्पदन्त्यक्त्वा स्थंडिलं कारयेद्बुधः
मद्धयमे सोमकुंभन्तु पूजयेत्पूर्ववत्क्रमात् ४३
हृदयेन तु मन्त्रेण पालिकादीनि विन्यसेत्
शरावं पालिका चैव घटिका च यथाक्रमम् ४४
ईशानादिसमारभ्य प्रत्येकं युगसंख्यया
पूर्वोक्तविधिना सर्वं कारयेद्देशिकोत्तमः ४५
विधानैस्सर्वपात्राणि त्वनुगुप्तं निधापयेत्
आपूर्णानि च कृष्णानि श्यामळानि तथैव च ४६
सधूम्राणि च कुब्जानि तथा तिर्यग्गनानि च
अंकुराद्ययशुभान्यत्र तद्दोषशमनाय च ४७
अस्त्रमन्त्रं समुच्चार्य जुहुयाच्छतसंख्यया
शूलं प्रदक्षिणं कुर्यात् तीर्थांकुरस्य सुव्रत ४८
अन्येषाञ्चैव सर्वेषां वर्जयेत्तु प्रदक्षिणम्
प्राङ्मुखोदङ्मुखो वाथ निर्व्रजेद्देशिकोत्तमः ४९
सर्वदेवमयं शूलं अलंकृत्य विशेषतः

नदीतीरे तटाके वा उद्याने वा विशेषतह् ५०
सुक्षेत्रे पर्वते चैव मृत्संग्रहणमारभेत्
शुद्धस्थानमनुप्राप्य शुद्धिं कृत्वा महीं ततः ५१
मृत्तिकाग्रहणार्त्थाय पुरयाहस्वस्तिवाचकैः
गन्धादिनासमारभ्य हृदयेन तु देशिकः ५२
अस्त्रमभ्यर्च्यविधिना गन्धपुष्पादिनाबुधः
घातयेदस्त्रमन्त्रेण मृदं संगृह्यवामतः ५३
मृदमभ्यर्च्य विधिना प्रदक्षिणमथाचरेत्
प्रविशेदालयं पश्चात् बीजनिर्वापमारभेत् ५४
सौवर्णं राजतं वापि पंकजञ्चार्द्धचंद्रकम्
कुंभमद्धये तु तोयं स्यात् तोयमद्धये तु पङ्कजम् ५५
पंकजस्य तु मद्धये तु चंद्ररूपं प्रशस्यते
श्वेतवर्णं द्विनेत्रञ्च श्वेतपद्मोपरिस्थितम् ५६
द्विभुजं कुमुदोपेतं श्वेतवस्त्रेण वेष्टितम्
सर्वैराभरणैर्भूष्यैर्मुक्ताभरणभूषितैः ५७
किरीटमकुटोपेतं प्रभामण्डलमद्धयगम्
कृत्तिकां दक्षिणे भागे रोहिणीं वामपार्श्वके ५८
दुकूलवसनोपेतां सर्वाभरनभूषिताम्
एवं ध्यात्वा विशेषेण पालिकावृतमद्धयमे ५९
द्विभुजमखिललोकद्वंद्वनासं द्विनेत्रं कुमुदयुगळहस्तं कोमळं
बीजपार्श्वे
गगनसहितलोकं सर्वबीजाधिपत्यं सकलभुवननाथं
विन्यसेत्कुंभमद्धये ६०
अंकुरादंकुरं नास्ति पूर्वे निर्दिष्टमुच्यते
शीतळा ऋजवोदीर्घास्फुटाश्च बहुदीर्घकाः ६१
ह्रस्वाश्चकुटिलाकारा अप्लनास्सुखयां कुरु

अंकुरोर्ध्वमुखञ्चैव पूर्वोत्तरद्वयोत्तमम् ६२
वह्निर्यमश्च निर्ऋतिर्वारुणो वायुरुत्तरः
ज्वरं व्याधिमनो दुःखं रिपुनाशञ्च वर्द्धते ६३
चंद्रोंकुराणामधिपो नव्रणादीनि वा व्रतम्
चंद्रदृष्टौ पराह्णे वा तथासद्वांकुराधिपः ६४
चंद्रदृष्टौ विहीनं स्यात्प्रातः काले समर्चयेत्
नाळिकेरप्रसूनैश्चाप्यक्षतैर्लाजसंयुतैः ६५
अंकुरारयर्पणं कृत्वा सर्वकर्मसमाचरेत्
सद्योंकुरार्पणञ्चेत्तु दिवाकाले समर्चयेत् ६६
तद्वयोरर्पणं नेष्टं क्षपायामेवमिष्यते
दिवाकाले कृतञ्चेत्तु कर्तृनाशं धनक्षयम् ६७
अतः कार्यं प्रयत्नेन रजन्यामंकुरार्पणम्
भास्करास्तमनात्पश्चात्पञ्चनाडयास्ततोपरि ६८
सुयोगे सुमुहूर्ते च सुनक्षत्रे तिथौ दिने
अंकुरार्पणकार्यन्तु प्रागुक्तविधिनाचरेत् ६९
शुभं पीतेषु शुक्लेषु रक्तेषु कलहो भवेत्
तिर्यग्गतेषु रोगं स्यात् अग्र ऊर्ध्वे वृतं भवेत् ७०
सर्वेषामेव देवानां बलिभोज्य क्रमं श्रुणु
वैकर्त्तनस्य शुद्धान्नं यवोदनं विवस्वतः ७१
मार्तण्डस्य गुळान्नं स्यात् भास्करस्य घृतोदनम्
मुद्गोदनं रवेस्साज्यं रंभाशर्करयान्वितम् ७२
लोकप्रकाशकस्यैव पायसं गुळदुग्धयुक्
तिलोदनं लोकसाक्षी नैवेद्यं पनसान्वितम् ७३
त्रिविक्रमस्य दद्धयन्नमादित्यस्य पयोदनम्
शाल्यन्नं सूर्यमूर्तेस्तु तिलचूर्णघृतान्वितम् ७४
हरिद्रान्नं सूपयुक्तं सघृतञ्चाशुमालिनः

दिवाकरस्य दुग्धान्न तेषान्नैवेद्यमुच्यते ७५
यराद्यष्टवसूनान्तु घृतोदनबलिं क्षिपेत्
गगनाद्यष्टवायूनां शुद्धान्नेन बलिं क्षिपेत् ७६
कदळीनाळिकेराज्य गुळयुक्तं बलिं क्षिपेत्
सर्वेषामेव शुद्धान्नमुक्तोदनविहीनके ७७
अथवा क्षीरमिश्रेण तण्डुलेनाज्य मिश्रतः
सर्वेषामेव देवानां बलिन्दद्याद्विशेषतः ७८
उत्तमं करपूर्णेन मद्धयमं लिकुचोपमः
अथवाप्यक्षमात्रं वा बलं सर्वत्र दापयेत् ७९
तत्तत्पदस्य रेखायां प्रक्षिपेत् बलिमुत्तमम्
अथवापूर्वदिक् भागे मण्डलो विशेषतः ८०
पृथक्पृथक् बलिन्दद्यात्कर्मसाफल्य हेतवे
श्रीकरं विजयं पुण्यमायुरारोग्यवर्द्धनम् ८१
अंकुरार्पणकन्त्वादौ कृत्वा कर्म समाचरेत्
एवं यः कुरुते मर्त्यस्सपुण्यां गतिमाप्नुयात् ८२
इति पूर्वकारणे प्रतिष्ठातन्त्रे अंकुरार्पणपटलो विंशतिः

कुण्डलक्षणविधिपटलप्रारंभः

अथ वक्ष्ये विशेषेण कुण्डानां लक्षणं शृणु
सर्वलोकहितं पुण्यं सर्वदेवप्रियार्थकम् १
श्रुत्यश्रं योनिचापाश्रमग्न्यश्रं वर्तुळाकृतिम्
भूताश्रं पंकजाश्रञ्च वस्वश्रञ्च विधीयते २
कोट्याहुत्याष्टहस्तं स्यात् लक्षहोमन्तु षट्करम्
अयुतस्य चतुर्हस्तन्तथैवाष्टसहस्रकम् ३
द्विहस्तं पञ्चसाहस्रे हस्तं साहस्रहोमके
रक्तिमात्रं शताहुत्यामुष्टिमात्रं शतार्द्धके ४

मुष्टिमात्रमधोमानमष्टहस्तात्परन्नहि
मात्रांगुलेन कर्त्तव्यमन्नयमानेन कारयेत् ५
कुण्डविस्तारमानेन कुर्यादवटकन्ततः
कुण्डं त्रिमेखलोपेतमेकमेखलमेव वा ६
त्रिमेखलोद्धर्वमानन्तु श्रुत्यग्न्यश्विनिकांगुलैः
षडंगुलोच्चविस्तारं कर्तव्यं ह्येकमेखला ७
एवं हस्तप्रमाणस्य कुण्डस्य परिकीर्तितम्
द्विहस्ते ऋतुभूतांशौ मेखलांगुलयः क्रमात् ८
चतुष्करे तु वस्वब्धिकौशिकांगुलयः क्रमात्
षडस्ते दशरन्ध्राष्टमेखलांगुलयः क्रमात् ९
अष्टहस्तं तथा कुर्यात् भानुरुद्रदशांगुलम्
यदा काराणि कुण्डानि तदाकारा च मेखला १०
अग्न्यंगुलन्तु विस्तारं भूतांगुलन्तु दैर्घ्यकम्
क्रमेण कृशतां योनिः कुर्यात्पिप्पलपत्रवत् ११
योनिलक्षणमेवोक्तं कुण्डास्यै करस्य तु
विस्तारस्य त्रिभागैकमुत्सेधं परिकीर्तितम् १२
द्विहस्तादि समारभ्य यावदष्टकरान्वितम्
विस्तारे त्वंगुलाधिक्यं दैर्घ्याश्विन्नयंगुलाधिकम् १३
योनिलक्षणमेवं स्यान्मेखले परिकल्पयेत्
पद्मांगुलं समुत्सेधं च लतांगुलन्तु विस्तरम् १४
पद्माकारन्तथा नाभिं कुर्यात्कुण्डस्य मद्धयमे
द्विभागदळमानं स्यात् एकभागन्तु कर्णिका १५
द्विहस्तादिसमारभ्य वसलस्तान्तकं क्रमात्
विस्तारे चांगुलाधिक्य -त्सेसधार्द्धांगुलाधिकम् १६
नाभिलक्षणमेवं स्याद् कर्णमानं प्रकल्पयेत्
कुण्डस्य परितश्चाश्वांगुलेनैव हस्तकम् १७

हस्तद्वयं समारभ्य यावद्वसुकरान्तकम्
अर्द्धांगुलवि--या तु विष्टरं संप्रकल्पयेत् १८
योन्नयाष्टनाभिनेमीनामुक्तमुच्छ्रायविस्तरम्
योनौ योनिर्न कर्त्तव्या पद्मेनाभिन्नकारयेत् १९
सुधापक्तेष्टकाभिर्वा मृदा चैव तु कारयेत्
सन्निकृष्टदिने चैव स्थण्डिलं कारयेत् बुधः २०
कुण्डानां वर्द्धनार्त्थाय चतुरश्रं तु साधयेत्
प्राक्सूत्रं तु न्नयसेत्पूर्वं मत्स्यन्तु दक्षिणोत्तरम् २१
कुर्यात्पश्चिमपूर्वन्तु यावत्कुण्डस्य विस्तरम्
पूर्वापरायतं सूत्रं मद्धयात्प्रागायतं समम् २२
पूर्वापरसमानेन सूत्रेणोत्तरदक्षिणे
अंकयेदपरानेकान् पूर्वानपि तथैव च २३
तत्तत्क्षेमार्धमानेन मत्स्यं कोणेषु साधयेत्
तत्र सूत्रप्रधानेन चतुरश्रं भवेदिह २४
चतुरश्रं पुनः कृत्वा चतुष्कोष्ठसमन्वितम्
कुण्डानामपिसर्वेषां वेदाश्रं योनिरुच्यते २५
श्रोत्रार्द्धार्द्धाशमानेन क्षेत्रार्त्थं पार्श्वयोस्ततः
क्षेत्रार्द्धावधिकं भ-म्याक्षेत्रपञ्चैकभागिकम् २६
तत्पुरस्तात् बहिन-स्त्वा तस्मात्तद्वयपार्श्वयोः
सूत्रे संयोजिते क-णं भवेत्पिप्पलपत्रवत् २७
श्रोत्रार्द्धन्तु परिग्राह्य क्षेत्रार्द्धे तु विनिक्षिपेत्
द्विधाकृत्वाधिकन्तत्र याम्योनिरप्रदेशयोः २८
एकैकांशन्नयसेत् बाहो सूत्रादभ्यन्तरे ततः
तन्मानेन भ्रमेद्विद्वान् चापाभ--चोत्तरे क्रमात् २९
क्षेत्रे तु भूतभागे तु --केकांशन्तु पार्श्वयोः
विन्नयस्येच्छफरन्तत्र नैर्ऋते व--देशके ३०

त्रिकोणाभ्यन्तरे सत्रं कृत्वा वै --यपुच्छके
संयोज्य त्रिगुणानेव त्रिकोणाय --स्मृतम् ३१
श्रोत्रार्द्धन्तु परिग्राह्य क्षेत्रार्द्धन्तु विनिक्षिपेत्
द्विधाकृत्वाधिकन्तत्र व्योमांशो बाह्यतो न्यसेत् ३२
वर्त्तयेत्तेन मानेन वर्त्तुळं कुण्डमुत्तमम्
तत् षट् भागैकभागेन क्षेत्रार्द्धेनैव वर्त्तुळम् ३३
तद्वृत्ताकारमादाय रव्यंशं विभजेत्ततः
धात्वंशेन भुजं कुर्यात् भूताश्रन्तु भवेत्स्फुटम् ३४
तत्क्षेत्रमष्टधा कृत्वा भागैकं पार्श्वयोर्बहिः
तयोर्मद्ध्यं गृहीत्वार्धं सूत्रेणैव भुजं तथा ३५
षट्सूत्रं परितः कृत्वा षट्कोणं तद्भवेदिह
अष्टभागकृतक्षेत्रे दिक्षु चैकांशकं न्यसेत् ३६
तत्पुरस्तात्बहिर्न्यस्त्वा तस्मात्तु द्वयपार्श्वयोः
सूत्रे संयोजिते कुण्डं भवेत् पिप्पलपत्रवत् ३७
चतुर्भागकृतं क्षेत्रमेकैकांशं न्यसेत्ततः
क्षेत्रार्द्धन्तेन मानेन मत्स्यं कृत्वा विचक्षणः ३८
तन्मद्ध्यमाच्चतुर्दिक्षु चतुष्पत्रन्तु वर्तुळे
बिसिनी कुण्डमेवन्तु क्षेत्रे गायत्रिभाजिते ३९
तदेकांशं बहिर्न्यस्त्वा परितश्चतुरश्रकम्
कर्णार्त्थं सूत्रमानेन कोणात्कोणन्तु लाञ्च्छयेत् ४०
चतुर्दिक्ष्वष्टकोणाख्यं कुण्डं कुर्यात्सलक्षणम्
सप्तभागैकभागेन क्षेत्रार्द्धेनैव वर्तुळम् ४१
क्षेत्रं षोडशभागैकं क्षेत्रार्द्धेनैव योजयेत्
वर्त्तयेत्तेन मानेन धात्वश्रं भवति स्फुटम् ४२
मानहीने महाव्याधिरधिके शत्रुवर्द्धनम्
भग्ने चैव त्वनावृष्टिः स्फुटिते सस्यनाशनम् ४३

इति पूर्वकारणे प्रतिष्ठा तन्त्रे कुण्डलक्षणविधिपटल एकविंशतिः

त्रिभक्तचतुरश्रन्तु षोडशस्तं भसं युतम्
नासिकाभिर्द्विरष्टाभिर्युक्तम्मद्ध्येंकणान्वितम् १
मद्ध्योद्ध्वंकूटयुक्तं वा प्रभावादविधानतः
कृत्वैकाशीतिभागान्निशितविपुलधीमण्टपाभ्यन्तरन्तस्तन्मद्ध्ये
वेदिर्नवांशा भवति ततस्त्रीणि भागानि मद्ध्ये । अश्रं योन्नयर्द्धचंद्रं
गुणभुजमपरं वै सुवृत्तं षडश्रं पद्मं वस्वश्रकुण्डं सुरपति
भवनादिक्क्रमेणैव कुर्यात् ॥ २
नवनव केनकेन तु वेदि नवनव मद्ध्यपदेकपदेकः ।
नवनवकुण्डमधाष्टमादधाना नवनव देवता होममिदं स्यात् ॥ ३
अस्त्रविस्मृतिघातवत् चतुष्कोटिकन्दिशिदिशित्रिसूत्रकम् ।
सतिमेखलमथ द्विकन्तुवा धातुभूतगणमात्रकोन्नतम् ॥ ४
व्यासमन्ध्यनलपक्षमात्रकैर्योनिमूद्ध्वं इहेष्टवत्कुरु । ५
तारदैर्ध्यकसमुद्गमञ्चतुष्षरणवांगुलिभिरग्निसंमुखः ।
देवं नयनांगुलोन्नतं मेघयुतन्तु वा पुनः ॥ ६
तालं गाढमथवैकमेखलं सर्वकुण्डकं कर्णयोनिकम् ।
वृत्तसन्निभमधोतदा कृतिर्वायुकेषु रसमात्रवै पुनः ॥ ७
व्यासवेदगुणतुंगकनाभिमब्जमिवकुण्डमद्ध्यमे ।
न्यस्यैकांशपञ्चभागैः पुरस्तात् कोणस्यार्द्धार्द्धं गृहीत्वातस्तत् ॥ ८
कोणं यावत् भ्रामयेत्तद्वदन्यं योन्नयाकारं स्याद्विसूत्रप्रयोगात् ।
व्यासेधर्म्मां शशमूद्ध्वंवादधस्तात् नीत्वैवर्जा पातयित्वा च सूत्र ९
तन्मानेन भ्रामयेदर्द्धचंद्रं कुण्डं युक्त्या वास्तुविद्वा विधिज्ञैः ।
क्षेत्रव्यासो षट्कृते चाष्टभागे मानेनानेन त्रिसूत्रप्रयोगात् ॥ १०
त्र्यश्रं प्रोक्त्यब्धिन्नवांशेशकन्तत् बाह्ये न्नयस्यभ्रामयेद्वृत्तकुण्डम् ।
व्यासे बुद्धिकांशं चांशकं पुच्छयोस्तत् बाह्येन्नयस्यानेन मद्ध्यात् ॥

११
मत्स्यं कृत्वा युग्यदङ्घिपश्चात् षट्कोणं स्यात्पातयेत्सूत्रषट्कम् ।
वृत्तं कृत्वा पूर्ववत् तस्य मद्धये वृत्तं ग्राम्ये द्वयं मद्धयतस्तत् ॥ १२
पद्मस्याकारं यथा कर्णिकादीन् विद्यान्नयापद्मे येन योग्यान् ।
द्मेत्रव्यासे षट्चतुर्भागिकेस्मिन् भागं बाह्ये न्यस्यसूत्रं समन्तात् ॥
१३
कोणस्यार्द्धं कोणकाख्यानलिख्येदष्टाश्रं स्यादष्टसूत्रप्रयोगात् ।
सैक्यत्वेदाष्टांशकैः पट्टदैर्घ्यं सप्तसप्तसूत्रप्रयोगात् १४
तत्तर्द्धेलोपात्तभागेषु तत्तत् भागं कृत्वा प्राग्निपैकैकभागे ।
न्यूनाधिक्ये नाश्रनाहस्य तुल्यं युक्त्याधीमान् योजयेत्सर्वकुण्डम् १५
अथवान्नयप्रकारेण कुण्डलक्षणमुच्यते
रत्निमात्रसमं कृत्वा मुष्टिमात्रन्तदर्द्धकम् १६
त्रिमेखलसमायुक्तमथवा एकमेखलम्
षडंगुलप्रमाणेन विस्तारोत्सेधमेखलः १७
ऊर्द्ध्वमेखलसंयुक्तञ्चतुरंगुलविस्तृतम्
मद्धये त्रियंगुलञ्चैव आधारे द्वयंगुलस्य तु १८
उत्सेधन्तु समं ज्ञेयं विस्तारन्तत्समं भवेत्
चतुरश्रं त्रियश्रञ्च षडश्रञ्च पुमान् भवेत् १९
योन्नयाकारन्धनुः पद्मं स्त्रीरूपं प्रतिकीर्तितम्
सुवृत्तमष्टकोणञ्च नपुंसकं हुताशनः २०
पर्वस्यांसृष्टिबहुलं कन्नयालाभन्तु पावके
शत्रुक्षयं स्याद्याम्ये तु नैर्ऋत्यांरोगनाशनम् २१
पश्चिमे सस्यवृद्धिस्स्याद्वायौ वायुप्रदं भवेत्
उत्तरे धनवृद्धिस्स्यादीशाने भुक्तिमुक्तिदम् २२
इन्द्र ईशानयोर्मद्धये सर्वप्राणिसुखावहम्
मद्धये ब्रह्मपदे वेदी दैविके मंगलायुतौ २३

मानुषे च पदे कुण्डं पैशाचे तोरणन्न्यसेत्
वह्नौ तु दक्षिणे पूर्वे चोत्तराभिमुखस्ततः २४
अन्नयेषु प्राङ्मुखो भूत्वा होमं कुर्याद्विचक्षणः
भवश्शर्वस्तथेशानः पशुवतिर्नील एव च २५
उग्रो भीमो महादेवो विद्धयष्टमूर्त्तयस्मृताः
पूर्वादीशानपर्यन्तं कुण्डानामधिदेवताः २६
पञ्चाग्न्यायतनञ्चेत्तु ब्रह्मादिपञ्चमूर्त्तयः
एकाग्न्यायतनञ्चेत्तु यथा कुण्डे सदाशिवः २७
स्थण्डिलं भूमिदैवत्यं कुण्डन्तु विष्णुदैवतम्
वर्द्धनी ब्रह्मदैवत्यं प्रोक्षणी देवपुष्करम् २८
प्रणीतावरुणदैवत्यं परिधी भव देवता
परिस्तरो ऋषिदैवत्यं समिधश्चैंद्रदेवताः २९
अक्षतन्नागदैवत्यं गन्धमश्विनिदेवता
पुष्पं गन्धर्वदैवत्यं व्याघ्रं श्रीदेविरुच्यते ३०
दीपं प्रजापतिर्देवं प्रोक्षणी भृगुदैवतम्
लाजानक्षत्रदैवत्यमित्येते अधिदेवताः ३१
प्राक् भूतकुंभन्तदेकाग्निकुंभं दाक्षिरायवेदैन्नैर्ऋत्यदाग्निम् ।
वारुणयषट्कन्ततश्चाग्निवायौ सोमे युगस्यात्त्रयकुंभमीशे ३२

इति विशेषकुण्डलक्षणविधिरेकविंशतिपटलः

अग्निकार्यविधिपटलप्रारंभः

अग्निकार्यविधिं वक्ष्ये सर्वलोकहिताय च
कुण्डं वा स्थण्डिलं वापि अग्निरायतनं द्विधा १
चतुरश्रा कृतिं विप्र सर्वकामार्त्थसाधनम्
प्रजावृद्धिकरं योनौ चार्द्धचंद्रेरिपुक्षयम् २
गुणाश्रे शान्तिदं प्रोक्तं पर्जन्यार्द्धन्तु वर्तुळे

पञ्चाश्रे रोगनाशार्त्थञ्जयार्त्थञ्चैव पद्मके ३
वस्वश्रे पुष्टिदं प्रोक्तं सप्ताश्रे सस्य वर्द्धनम्
कुण्डानाञ्च फलं ह्येवं स्थण्डिलञ्चाधुनोच्यते ४
गोमयालेपितां भूमिमभिसम्मृज्य वै हृदा
निकुड्योत्तरमादाय प्रोद्यसौम्ये विवर्जयेत् ५
शुद्धदेशोद्भ्वसिकतैरनाद्यैरस्तविस्तृतम्
अंगुलत्रयमानोच्चं समन्निम्नोन्नतं तथा ६
प्रागग्रास्तिस्त्ररेखास्तु तद्वत्सौम्याग्ररेखया
ब्रह्मावैवस्वतस्सोमो मद्धये दक्षिणवामयोः ७
तिसृणां प्रागग्राणामधिदेवाः प्रकीर्तताः
रुद्रोविष्णुश्च शक्रश्च मद्धये पश्चिमपूर्वयोः ८
तिसृणामुदगग्राणामधिदेवाः प्रकीर्तिताः
कुण्डञ्चेत् शोधनञ्चैव क्षाळनं शोषणन्तथा ९
पावनं प्रोक्षणञ्चैव सद्यादि ब्रह्मपञ्चकैः
सूर्यकान्तोद्भवं श्रेष्ठं काष्ठजं मद्धयमं भवेत् १०
श्रोत्रियागारजं वह्निः कन्नयसञ्चेति कीर्तितम्
शरावेताम्रपात्रे वा पावकन्तु समानयेत् ११
होतुरग्रे तु विन्नयस्य संप्रोद्य बहुरूपिणा
गन्धादिभिस्समभ्यर्च्य वर्मणाचावकुण्ठयेत् १२
प्रक्षिप्येन्धनमग्नौ तु वह्निरायतनान्तरे
स्थण्डिले चैव षड्रेखान् ब्रह्मादीनां प्रपूजयेत् १३
नाभिमद्धये तु वागीशीन्नीलोत्पलसमप्रभाम्
ऋतुस्नातां सकूर्चस्थान्ध्यात्वा तन्मूलमन्त्रतः १४
संपूज्याग्निं समादाय संभ्राम्यायतनंत्रिधा
योनिमार्गेण निक्षिप्य वह्निबीजमनुस्मरन् १५
उपस्थानञ्च कृत्वा तु मन्त्रजुष्टोतदूनकम्

सदर्भैरिन्धनं क्षिप्त्वा दर्भाग्रैर्हृदयेन तु १६
गर्भाधानमिदं प्रोक्तं कुर्यात्पुंसवनन्तथा
हृदयेन जपेदीशमेतत्पुंसवनं स्मृतम् १७
अघोरेण यजेदर्घ्यं सीमन्तस्यादिकन्तथा
अग्निं प्रज्वाल्यवक्त्रेण पुष्वाज्ञतसमायुतम् १८
निक्षिप्य शिरसा मंत्री जातकर्मविधिं श्रुणु
द्विमुखञ्चैकहृदयञ्चतुश्रोत्रं द्विनाहिकम् १९
आस्यद्वयञ्च षण्णेत्रं पिंगलं सप्तहस्तकम्
त्रिमेखलं त्रिपादञ्च सप्तजिह्वा समायुतम् २०
चतुश्शृंगं वृषारूडं बालादित्यसमप्रभम्
उपवीतसमायुक्तञ्जटामकुटमण्डितम् २१
सव्यभागे चतुर्हस्तं त्रिहस्तमपसव्यके
स्रुक्स्रुवौ चाक्षमाला च सशकिर्दक्षिणे करे २२
चामरं व्यजनञ्चैव घृतपात्रन्तु वामके
सव्यवक्त्रे चतुर्जिह्वा वामवक्त्रे त्रयस्तथा २३
हिरण्याकनकारक्ता कृष्णा चैव तु सुप्रभा
अतिरक्ताबहुरूपा सप्तजिह्वाः प्रकीर्तिताः २४
हिरण्यादिचतस्त्रस्तु जिह्वादक्षिणवक्त्रके
तिस्त्रस्तु सुप्रभादिस्स्याज्जिह्वा वै वामवक्त्रके २५
हिरण्यावारुणे जिह्वा कनका मद्ध्यमस्थिता
रक्ताचोत्तरजिह्वा स्यात्कृष्णायाम्यदिशिस्तथा २६
सुप्रभापूर्वजिह्वा स्यादतिरक्तग्नौ व्यवस्थिता
बहुरूपेशजिह्वा स्यात् जिह्वास्थानं प्रकीर्तितम् २७
सर्वसिद्धिप्रदं ह्येतत् वह्निरूपं प्रजापते
अग्निमद्ध्ये स्थितन्ध्यात्वा सासीनं पश्चिमाननम् २८
संप्रोक्ष्यैशानमन्त्रेण दत्वार्घ्यं पुष्पमिश्रितम्

तन्नामकरणं प्रोक्तमेवं संस्कारपञ्चयुक् २९
दर्भैणेन्धनमग्नौ तु उपस्थानं हृदा क्षिपेत्
दर्भैश्चैव परिस्तीर्य प्रतिदिग्दशभिस्ततः ३०
दक्षिणाश्चोत्तराश्चैव उत्तराश्चाधरास्तथा
पूर्वाग्राश्चोत्तराग्राश्च प्रागादीनि क्रमात्क्षिपेत् ३१
देवस्य त्वेतिमन्त्रेण पूर्वे चैव परिस्तरेत्
स्रुक्स्रुवौ च घृतस्थालीं प्रणीता प्रोक्षणी तथा ३२
समित्कूर्चञ्चरुन्दर्वीं विहरञ्च कमण्डलम्
द्रव्यपात्राणि सर्वाणि वामे काशोपरिन्यसेत् ३३
अधोमुखानि पात्राणि द्वंद्वपात्राणि साधयेत्
प्रोक्षणी पात्रमादाय जलेनैव प्रपूरयेत् ३४
वितस्तिमात्रमायामं तन्मद्ध्ये ग्रन्धिसंयुतम्
अंगुष्ठानामिकाभ्यान्तु उदकोत्प्लवनं कुरु ३५
संस्कृत्य तेन तोयेन प्रोक्ष्य पात्राणि वर्मणा
स्रुक्स्रुवौ चेन्धनादीनि सर्वद्रव्याणि दक्षिणे ३६
संस्थाप्य तेन तोयेन प्रोक्षयेत्स्नानशेषकान्
द्रव्यान्होमार्हकान्विद्धि पात्राण्यूर्द्ध्वाननं कुरु ३७
बद्ध्वा तु सप्तभिर्दर्भैः कूर्चं होतुश्च दक्षिणे
निधायार्घ्यं विरिञ्चिन्तु ब्रह्मबीजेन बुद्धिमान् ३८
प्रणीतान्तोयसंपूर्णान् कूर्चपुष्पाक्षतान्वितान्
होतुर्वामे न्नयसेदूर्द्ध्वे मेखलोपरिमद्ध्यमे ३९
गन्धपुष्पादिभिश्चैव विष्णुबीजेन पूजयेत्
वह्नौ तु दक्षिणे पूर्वे चाग्नोत्तराभिमुखस्थितः ४०
अन्नयेषु प्राङ्मुखो भूत्वा होमं कुर्याद्विचक्षणः
घृतेन पात्रमापूर्य नीत्वांगाराणि पश्चिमे ४१
तस्योर्द्ध्वे तु न्यसेत्पात्रे द्विकुशाग्रं विनिक्षिपेत्

पर्यग्निञ्च कुशाग्रञ्च कृत्वाग्नौ तु विनिक्षिपेत् ४२
प्रादेशमात्रकूर्च्चेन मद्धयग्रन्धियुतेन च
हृदयेन तु मन्त्रेण त्रिस्संप्लवनमाचरेत् ४३
ग्रन्धिं विसृज्य संप्रोद्य वह्निमद्धये विनिक्षिपेत्
घृतं प्रदक्षिणं नीत्वा योन्यूद्धर्वे तु निधापयेत् ४४
स्रुवं प्रक्षाळ्य तोयैश्च दर्भाग्रैर्हृदयेन तु
सम्मृज्यमद्धयमं मद्धये मूलं मूलैश्च शोधयेत् ४५
अग्रमग्रेण संस्पृश्य प्रन्तप्याधोमुखं स्रुवम्
क्षिप्त्वा परिधयस्तत्र पाशभृद्याम्यसौम्ययोः ४६
वर्मनेत्रास्त्रमन्त्रैश्च प्रक्षिपेत्तु यथाक्रमम्
पलाशोदूम्बराश्वत्थप्लक्षन्यग्रोधजास्त्विह ४७
शमीखादिरबिल्वार्क अपामार्गं यथाविधि
द्वादशांगुलमात्रेण इध्मञ्चाष्टादशांगुलम् ४८
तेष्वपि द्वंद्वसमिधौ संयोज्यानीलानलयोः
क्षिपेदग्नौ तथैशान्यां हृदा च शिरसा कुरु ४९
अनुयाज्ञं समित्तत्र प्रणीतोर्ध्वे न्यसेद्धृदा
पावकं गन्धपुष्पाद्यैः पूजयेत्तु विशेषतः ५०
लोकपालान्नयथास्थाने पूजयेद्देशिकोत्तमः
परिषेचनं ततः कृत्वा कदितेन्वादिमन्त्रकैः ५१
प्रागग्रां प्रथमं याम्ये ततोदीच्यान्तु पश्चिमे
त्रित्रीयमुत्तरे प्राच्यां चतुर्त्थञ्च समन्त्रकम् ५२
आज्याभिघारं तत्रैव नेत्रेणास्त्रेण बुद्धिमान्
क्षुरेणोद्धाटयेदास्य मस्त्रेणैव तु निष्कृतिः ५३
गृह्यपञ्चदशेध्मानि सकृन्मूलेन होमयेत्
सद्योजातेन मन्त्रेण वायव्याग्नेयमाहुतिम् ५४
हृदयेन तु मन्त्रेण नैर्ऋतेशानमाहुतिम्

अघोराहुतिरेवं स्यादाज्यभागमतः परम् ५५
सौम्ये तत्पुरुषं हुत्वा बहुरूपन्तु याम्यके
शिखामन्त्रं तथैंद्रे तु जुहुयान्नेत्रपश्चिमे ५६
मद्धयमे तु शिखामन्त्रं जुहुयाद्देशिकोत्तमः
अग्निबीजमनुस्मृत्य हुत्वा वै पञ्चविंशतिः ५७
अन्नप्राशनमेवं स्यात् चौळोपनयनं स्मृतम्
समावर्तनमेवं स्यात्सद्यादिब्रह्मपञ्चकैः ५८
यथाक्रमेण जुहुयात्सप्तसंख्या पृथक्पृथक्
अग्निमद्धये विशेषेण आसनं परिकल्पयेत् ५९
ध्यात्वा सदाशिवं देवं पञ्चमावरणान्वितम्
गंधपुष्पादिभिश्चैव पूजयेत्तु विशेषतः ६०
शिवे दशाहुतिः प्रोक्तमन्येषामाहुतिर्भवेत्
शिवाग्निजनितो ह्येवं होमकुर्याद्विचक्षणः ६१
अग्निकर्णे हुतं द्रव्यं कुर्याद्व्याधिञ्च पीडनम्
अन्धतां नेत्रयोर्हुत्वा कण्ठे तु गुरुनाशनम् ६२
लिंगे तु स्थाननाशाय जानुरुच्चाटनं भवेत्
मरणं पादमूले तु जिह्वायां सर्वकामदम् ६३
तस्मादग्नौ विशेषेण जिह्वायां होममाचरेत्
हिरण्यायां हुनेदिध्मं कनकायां घृतञ्चरुम् ६४
जुहुयाल्लाजञ्च कृष्णायां रक्तायाञ्च यवं हुनेत्
सुप्रभायां हुनेत्सक्तुमतिरक्तौ तिलाहुतिम् ६५
सिद्धार्त्थं बहुरूपायां सर्वासु व्याहृतिं हुनेत्
द्रव्याण्येतानि सर्वाणि कनकायां हुनेत्क्रमात् ६६
वह्नेस्तु रक्तजिह्वानि ज्ञात्वाकर्मसमाचरेत्
शब्दं वर्णञ्च गंधञ्च शिखाधूम्रन्तथैव च ६७
भेर्याश्च गजनादाश्च शब्दास्त्वेति शुभास्मृताः

खरस्वरो महानादो वयश्शब्दस्त्वशोभनम् ६८
शातकुंभमयञ्चैव वैढूर्यादित्य सन्निभम्
सिन्दूरमिन्दुकोपाभं पिंगलञ्चंद्रमंडलम् ६९
रौप्यं वज्रं हरीताळं नीलाभं कृष्णवर्णकम्
रौप्यनीलहरीताळं कृष्णाभान्यशुभानि वै ७०
अन्नद्यानि सर्ववर्णानि सर्वसिद्धिकराणि हि
उशीरपाटले चैव पुन्नागं चंपकन्तथा ७१
आज्यगुग्गुलुगन्धानि सर्वसिद्धिकराणि च
स्विन्नगन्धं तथा मूत्रं विष्ठा च खरपूतिकम् ७२
एतान्यशुभगन्धानि सर्वदोषकराणि हि
शिखाशिखाप्रतीकाशाश्छत्राकारस्तु कंपकम् ७३
एताश्च शुभदाःप्रोक्ताः कुरारावर्तुळाशुभा
कुन्दकाशनिभं धूम्रं सर्वसिद्धिप्रदं स्मृतम् ७४
कपोतशुकपिंछाभं धूम्रं तदशुभं भवेत्
अप्रदक्षिणमावर्तं सस्फुलिंगञ्च दर्शनम् ७५
तथापसव्यगमनमपशब्दञ्च मक्षिकम्
करणानि तथैतानि सर्वदोषकराणि तु ७६
तिर्यक्प्रदक्षिणञ्चैव मद्ध्यभागमधो गतिः
पुनरावर्तकञ्चैव घानाञ्च शुभानि वै ७७
अशुभैर्लक्षणैर्युक्तं प्रायश्चित्तन्तु कारयेत्
अस्त्रेणैव तु मन्त्रेण हुनेदष्टशतं क्रमात् ७८
दशाहुतिञ्च कर्तव्यं व्याहृतिञ्च विशेषतः
तदूर्ध्वे समिधौ चैव वर्मणापरिधिः क्रमात् ७९
तन्मन्त्रेण क्षिपेदग्नौ आघारसमिधौ तथा
प्राग्गुप्तब्रह्मकूर्चस्य ग्रन्धिं मुक्त्वाविसर्जयेत् ८०
अनुयाजिं समादाय वह्निमायोप्य रक्षयेत्

आरोपणस्य मन्त्रन्तु योन्ते योनिर्न्नृत्वियः ८१
अथवाग्नौ विनिक्षिप्य अनुयाजत्रियां द्विज
प्रणीतापात्रमादाय प्रोक्षणयाद्भिस्तु सेचयेत् ८२
प्रणीतातोयं प्राच्यादिप्रणीताद्भिः स्पृशेद्बुधः
प्रणीताधोमुखं कृत्वा तेनैव प्रोक्ष्यसर्वतः ८३
आज्यशेषं समादाय नैर्न्नृत्यांस्त्रावयेत् भुवि
राक्षसेंद्रश्च तेनैव तृप्तिमाप्नोति नित्यशः ८४
दर्भास्तरणमानीय साग्रमेकं विहाय वै
ततश्चाभ्युज्यदर्भांश्चक्रमादग्रादहेत्ततः ८५
तदेकं प्रोक्ष्य वह्नौ तु क्षिपेदग्रं दहेत्ततः
तद्भस्मसंगृहीत्वा तु त्रिपुंड्रं पापनाशनम् ८६
श्रीकरं विजयं पुण्यमायुरारोग्यवर्द्धनम् ८७

इति पूर्वकारणे प्रतिष्ठातन्त्रे अग्निकार्यविधिपटलाद्वाविंशतिः

वह्निरूपविधिपटलप्रारंभः

अतः परं प्रवक्ष्यामि वह्निरूपं प्रजापते
वकारो वर्धते ज्ञानं ह्निकारेण मलक्षयः १
प्रज्ञोत्पन्नोमलच्छेदात् वह्निरित्यभिधीयते
वागीशी अग्निमाता च पितावागीश्वरस्तथा २
वागीशी संभवा गौरी वागीशस्तु महेश्वरः
अर्षणाप्रतिष्ठान्तं प्रतिष्ठाद्युत्सवान्तकम् ३
प्रायश्चित्ते तथान्यस्मिन् मंगळे शान्तिकर्मणि
कर्मारंभेषु सर्वेषु वह्निरूपो महेश्वरः ४
पूजनीयो विशेषेण रूपद्ध्यानपुरस्सरम्
सर्वदेवमयोवह्नि सर्वमन्त्रमयस्तथा ५
सर्वविद्यात्मकश्चासौ सर्वज्ञानातकस्तथा

तस्मात्सर्वेषु कार्येषु ध्यातव्यो विधिमार्गतः ६
अग्निपूजाविनायत्र तत्र वै निष्फलं भवेत्
बिन्दुस्थानात्परेशाख्य क्षोभात्सञ्जायते नलः ७
अतस्तद्रूपममलं मार्तण्डकोटिसन्निभम्
ज्वलदग्निसमप्रख्यमेवमेवं विचिन्तयेत् ८
सदाशिवस्य हृदये शक्तिश्शिवहृदि शिवा
उभयोरन्तरं नास्ति वायुरंबरयोरपि ९
शिवशक्तिसमायोगाच्छिवाग्निस्तु समुद्भवः
शिवाग्नेस्तु सहस्त्रांशात् गार्हपत्य समुद्भवः १०
गार्हपत्यसहस्त्रांशात् दक्षिणाग्निसमुद्भवः
दक्षिणाग्निसहस्त्रांशादाहवनीयमुद्भवः ११
तस्मात्सर्वप्रयत्नेन अग्निरुद्भवमुच्यते
अग्नित्रयमिदं प्रोक्तं बालयौवनवृद्धकाः १२
दीक्षाशान्तिस्तु बालाग्निः प्रोक्षणोत्सवयौवनम्
प्रतिष्ठानित्यवृद्धाग्निरग्निभेदं त्रिधाभवेत् १३
नामान्तं बालमग्निस्स्यादावृतान्तं तु यौवनम्
विवाहान्तन्तु वृद्धाग्निरग्नित्रयमिति स्मृतम् १४
शिवाग्निः प्रथमं विद्यात् द्वयञ्चाहवनीयकम्
वृद्धाग्निश्च तृतीयं स्यात् दक्षिणाग्निश्चतुर्त्थकम् १५
पञ्चमं यौवनाग्निश्च गार्हपत्यञ्च षष्ठकम्
बालाग्निं सप्तमञ्चैव अष्टमं केवलाग्निकम् १६
सामान्याग्निश्च नवममग्निभेदं प्रकीर्तितम्
अग्निभेदं तथावक्त्रं जिह्वाभेदानुरूपकम् १७
बीजभेदं त्रियाद्रव्यं ज्ञात्वासर्वं समाचरेत्
पूर्वतो वसतो वह्निः पूर्वतस्तच्छिवद्विजः १८
अग्निमन्त्रं शतं जप्त्वा प्रीतिप्रत्यङ्गखो भवेत्

पाशमद्धये च सौम्ये च याम्ये राद्धसके भवेत् १९
पूर्वाग्नौ रुद्रदिग्भागे सुरस्यादीनि योजयेत्
पूर्ववद्रूपसंयुक्ता स्वाहादेवी च भावयेत् २०
प्रतिष्ठोत्सवकाले तु दीद्धाकाले तथैव च
वृद्धरूपं प्रतिष्ठाग्नि उत्सवादीनि यौवनम् २१
दीद्धाग्निं बालरूपन्तु अग्नित्रयमिति स्मृतम्
नित्याग्नौ वृद्धयः प्रोक्ता यौवनाग्नौ च उत्सवः २२
बालाग्नौ तु प्रतिष्ठा च अग्निरूपमिहोच्यते
बालाचवृद्धा च सुयौवना च त्रेताग्निरूपं कथितं प्रशस्तम् ।
बालाग्निरूपं कथितं प्रतिष्ठा नित्याग्निवृद्धोत्सवयौवनाग्निः ॥ २३
गार्हपत्याहवनीयदद्धिणान् बालयौवनवृद्धस्वरूपकान् ।
स्थापनोत्सवनित्यविधौ सदा पूजयेत्तु शिवाग्निस्वरूपकान् २४
अनलशतसहस्रं रूपभूतञ्च वक्त्रं स्रुवमभयपरशुं खड्गघण्टाञ्चसव्ये
।
वरदमनलखेटञ्चांकुशञ्चान्यहस्तं दधतिजनितरूपं
शैवमाहुश्शिवाग्निम् २५
पञ्चवक्त्रयुतं रक्तं पञ्चजिह्वासमायुतम् २६
अजवाहनसंरूढं सृष्टिसंहारकारणम्
दशहस्तसमायुक्तं शैवमग्निस्वरूपकम् २७
वृद्धरूपत्रियद्धचतुर्भुजमद्धपिंगमथो वृषवाहनम्
दीप्तमग्निसमुज्वलितावरश्शक्तिपाणिश्शिवाग्निमथाचरेत् २८
सर्वत्राहवनीयाग्निमावाह्याभ्यर्च्य हूयते
यदि भेदेन किंकार्यं ब्रूहिचंद्रार्द्धशेखर २९
विवाहादिशुभे कार्ये गार्हस्थ्यं समुदाहृतम्
पितृयुक्तेषु कार्येषु दद्धिणाग्निं प्रकल्पयेत् ३०
देवकार्येषु सर्वेष्वाहवनीयं तथैव च

रक्तवर्णं द्विनेत्रञ्च एकवक्त्रं चतुर्भुजम् ३१
शुक्लवस्त्रसमायुक्तं शुक्लयज्ञोपवीतिनम्
जटामकुटसंयुक्तं सर्वाभरणभूषितम् ३२
त्रिपादयुक्तञ्चैष्वेकं कुंचितोर्ध्वे व्यवस्थितम्
दक्षिणे भयहस्तञ्च वामे वरदसंयुतम् ३३
स्रुक्स्रुवौ तु द्विहस्ते च धारणन्तु प्रशस्यते
मेषारूढोग्ररूपं स्यात्सशक्तिसहितस्तथा ३४
एवञ्च गार्हपत्याग्नौ दक्षिणाग्निरथोच्यते
रक्तारूपांगनेत्रं श्रुतिकरवदनं पद्मशृङ्गन्तु चैवं
रक्तावस्त्रावृतं स्यादभयवरदके स्रुक्स्रुवोर्ध्वेवहन्तम् ।
हारंकेयूरमालागुणचरणजटालंकृतं सत्रिपादं
अश्वारूढं सशक्तिं रथगजध्वजयुतं गार्हपत्याग्निरूपम् ३५
द्विमुखं षट्भुजं सूत्रं सितं हसितवर्णकम् ३६
जटामकुटसंयुक्तं षणेत्रं पिंगलप्रभम्
रौद्रदंष्ट्रं महाकायं किञ्चित्प्रहसिताननम् ३७
सर्वे भयं स्रुवं खट्गन्धारीतञ्चाभयं करम्
वरदं कूर्च्चकं फालं वामांशे धारितं पुनः ३८
उद्धारूढं त्रिपादन्तु स्वाहासञ्चिभरूपकम्
दक्षिणाग्निस्वरूपन्तु विस्पष्टं गद्यते मया ३९
वक्ष्ये चाहवनीयाग्निरूपमुद्भवपूर्वकम्
दक्षिणाग्नेस्सहस्रं स्यादुत्भूतस्य चतुर्मुखम् ४०
द्विमुखञ्च त्रिपादञ्च नासिकाद्वयसंयुतम्
त्रिमेखलसमायुक्तं षणेत्रं पिंगलप्रभम् ४१
चतुश्शृंगोवृषारूढो बालार्कसमकेशधृक्
सप्तजिह्वासमायुक्तन्तेषु त्रीणि च वामके ४२
सव्यवक्त्रे चतुर्जिह्वा वामवक्त्रे त्रयन्तथा

सव्यभागे वेदहस्तमग्निहस्तमपसव्यके ४३
स्रुक्स्रुवौ चाक्षमाला च सशक्तिस्सव्यहस्तके
चामरव्यञ्जनञ्चैव घृतपात्रन्तु वामके ४४
हिरण्याकनकारक्ता कृष्णा चैव तु सुप्रभा
अतिरक्ताबहुरूपा सप्तजिह्वाः प्रकीर्तिताः ४५
एवमावाहनीयाग्निस्वरूपञ्चाधुनोच्यते
एकवक्त्रं द्विनेत्रञ्च द्विभुजञ्च द्विपादकम् ४६
रक्तवर्णनिभञ्चैव अजारूढं स्मिताननम्
ब्राह्मणानां विशेषेण वैदिकाग्निस्वरूपकम् ४७
दिक्पतेश्च सहस्रांशात् केवलाग्निसमुद्भवः
द्विनेत्रो द्विभुजश्चण्डो वरदाभयसंयुतः ४८
शुक्लवस्त्रपरीधानश्चेतवर्णस्मरद्युतिः
केवलाग्निरिति ख्यातो महासनमिहोच्यते ४९
केवलाग्नेस्सहस्रांशादुद्भवश्च महासनम्
एकवक्त्रो द्विबाहुश्च मेषारूढो वृषासनः ५०
रक्तांबरसमायुक्तस्त्रिशिखश्च ज्वलत्कचः
चतुश्शृंगं त्रिणेत्रञ्च स्रुवं स्याद्दक्षिणे करे ५१
प्रसार्य च करोपेतो हितांगो वृषरूढधृत्
महासनमिति ख्यातो व्यक्तरूपं पितामहः ५२
रक्तनिभषण्णयनयुग्ममुखजिह्वासप्तगुणपादकरसप्तकरयुग्मम्
दक्षकरशक्तिस्रुवस्रुक्नयनमालाञ्चामरव्यजनं घृतपात्रकरमन्नये ५३
तेषु वत्स्या कृतिं विप्र प्रथमं प्रोच्यतेधुना
द्विभुजञ्च द्विपादञ्च रक्तकुञ्चितमूर्द्धजः ५४
रक्तवस्त्रपरीधानो रक्तमाल्यानुलेपनम्
शुक्लयज्ञापवीतञ्च शुक्लवस्त्रोत्तरीयकम् ५५
स्रुवं सव्ये वहन्वामे स्रुक्सन्धाय वै तथा

दिव्याभरणसंयुक्ता शान्तरूपस्थिताननाः ५६
एवं वह्न्याकृतिः ख्यातमरूपमधुनोच्यते
त्रिणेत्रञ्चतुर्भुजञ्चैव ज्वालामालाभिशोभितम् ५७
खट्गखेटकहस्तञ्च शरचापधरं प्रभुम्
कालाग्निरुद्रदेवानां रूपञ्चैव ततोच्यते ५८
अग्निश्चैव विवाहाग्निः कालाग्निश्चामलाग्निकः
यागाग्निश्चैव बालाग्निस्सर्वपापहराग्निकः ५९
पूर्वाद्यैशानपर्यन्तं वह्न्यावृतन्ततोच्यते
पूर्वतो वसतो वह्निं पूर्वतस्थः द्विजस्थिताः ६०
अग्निमन्त्रशतञ्जप्त्वा ततः प्रत्यङ्मुखो भवेत्
अग्निकर्णे हुतं कुर्याद्व्याधिभिः परिभूयते ६१
नासिकायां हुतन्दुःखन्नेत्रे होतुर्विनाशनम्
शिखास्थाने हुतञ्चैव राजराष्ट्रं विनश्यति ६२
तस्मात्सर्वप्रयत्नेन जिह्वायां होममाचरेत्
यत्र काष्ठन्तु तत्श्रोत्रं यत्र धूमन्तु नासिकम् ६३
यत्राल्पज्वलितन्नेत्रं यत्र भस्म तु तच्छिरः
यत्र ज्वलितजिह्वायां तथा होमं समाचरेत् ६४
अश्वत्थो दुंबरप्लक्षवटाः पूर्वादिदिक्षु च
शमीखदिरबिल्वार्क्का विदिक्षुक्रमशस्तथा ६५
प्रधानस्य पलाशन्तु समिधस्संप्रकीर्तिताः
द्वादशांगुलमायामं कनिष्ठांगुलनाहकम् ६६
समिधं षोडशं हुत्वा हुनेदिध्मं पृथक्पृथक्
समिदाज्य चरुं लाजान् सर्षपम्माषमुद्गकौ ६७
तिलवेणुयवाश्चैव ततो हूयात्क्रमेण तु
शतद्वयं शतं वापि अर्द्धं वा जुहुयात्तथा ६८
सद्येन समिधं हुत्वा घृतं वामेन मन्त्रतः

हृदयेन चरुं हुत्वा लाजं हुत्वा शिरेण तु ६९
सर्षपं कवचेनैव माषमीशेन मन्त्रतः
मुद्गन्तु घोरमन्त्रेण तिलं तत्पुरुषेण तु ७०
वेणुं वै बीजमुख्येन यवमस्त्रेण हूयते
उक्तानुक्तन्तु यत्सर्वं मूलमन्त्रेण होमयेत् ७१
प्रत्येकं व्याहृतिं हुत्वा शेषाहुतिमथाचरेत्
आज्याहुतिस्तु प्रथमं द्वितीयं समिधा हुतिः ७२
तृतीयन्तु चरुं हुत्वा चतुर्त्थन्तिलमेव च
पञ्चमं सर्षपञ्चैव षष्ठ--माषमेव च ७३
सप्तमं लाजमेवन्तु अष्टमं सक्तुरुच्यते
नवमं क्षीरमित्युक्तन्दशमन्दधिरुच्यते ७४
द्रव्याहुतिर्द्वादशपर्वपूरितं पक्वाहुतिर्बादरिकं प्रमाणम् ।
आज्याहुतिर्माषनिमग्नमात्रं हुताशनस्योपरिषोडशांगुलम् ७५
स्थण्डिलं भूमिदैवत्यं कुण्डन्तु विष्णुदैवतम्
वर्द्धनी ब्रह्मदैवत्यं प्रोक्षणी देवपुष्करम् ७६
प्रणीतावरुणन्देवं परिधिर्भव दैवतम्
परिस्तरे ऋषिः प्रोक्तं समिधश्चेंद्रदैवतम् ७७
अंगारे गुरुदैवत्यमाज्यस्थाल्यां वसुस्तथा
आज्यंकालाग्निदैवत्यमिद्धमं सर्वाधिदैवतम् ७८
मन्त्रं सारस्वतं प्रोक्तं स्वरं सवितृदैवतम्
पुष्पपात्रे श्रियं विद्यात् चरुस्थाल्यां कलानिधिः ७९
अक्षतं योगदैवत्यं गन्धं च क्षितिदैवतम्
पुष्पं गन्धर्वदैवत्यमर्घ्यं श्रीदेविरुच्यते ८०
दीपं प्रजापतिन्देवं धूपं वै भृगुदैवतम्
लाजन्नक्षत्रदैवत्यमित्येतास्त्वधिदेवताः ८१
कुंभस्य वदने रुद्रो मद्धये विष्णुः प्रकीर्तितः

मूले हिरण्यगर्भस्तु जले गंगाप्रकीर्तिता ८२
रत्ने चंद्रमसन्थ्यायेत्कूर्चे वाक् देवतां स्मरेत्
अपादाने महालद्मीमपान्ते वरुणं स्मरेत् ८३
शालीनां वृषभो देवस्तण्डुलानान्तु षण्मुखः
तिले चकाममूर्त्तिस्तु पार्वती च परिस्तरे ८४
रेखायामष्टदिक्पालो लेपिते भूमिदेवता
वेद्यान्तु वेदिकामूर्त्तिरुपवेद्यां सरित्पतिः ८५
आसने नृत्तमूर्त्तिस्तु सुन्दरीमंगळाष्टके
अंकुरेषु च सोमस्स्याद्दीपे ज्वलनदेवता ८६
वर्द्धन्यां वदने गौरीत्येवं धीमान्प्रकल्पयेत्
होमारंभस्य पूर्वे तु स्रुक्स्रुवञ्चेन्धनन्तिलम् ८७
परिधिश्चैव दर्भांश्च समिदाज्य चरुन्तथा
गन्धाद्यतञ्च पुष्पञ्च विष्टरं घृतपात्रकम् ८८
दीपं वै द्रव्यपात्राणि प्रोद्यणीं वर्द्धनीन्तथा
प्रणीतां पुष्पपात्रञ्च चरुपात्रन्तथैव च ८९
आहृत्यहोमसंभारान् कुण्डं प्रतिविशेषतः
प्रथमं कुण्डसंस्कारं द्वितीयं ज्वलनोज्वलम् ९०
तृतीयं परिस्तरणञ्चतुर्त्थं पात्रसादनम्
पञ्चमन्तु पवित्रञ्च षष्ठं वै प्रोद्यणन्तथा ९१
सप्तमं संग्रहेद्द्रव्यमष्टमं घृतसंग्रहः
नवमं परिधिन्यासन्दशमं परिषेचनम् ९२
एकादशञ्चोद्धर्वहोमं द्वादशं होममाचरेत्
समिदाज्यान्नशालिस्तु यवगोधूमवैणवम् ९३
नीवारलाजसक्तुश्च माषमुद्गकुलुत्थकम्
निष्पावतरळञ्चैव लाजमाषाढकन्तिलम् ९४
प्रियंगुसर्षपञ्चैव मधुदधिपयोघृतम्

फलापूपन्तु तांबूलं षड्विंशद्द्रव्यमुच्यते ९५
हिरण्याहेमवर्णाभा कनकाश्यामळाकृतिः
रक्ता च रक्तवर्णाभा कृष्णा चैव हरित्प्रभा ९६
सुप्रभापीतवर्णा चातिरिक्ताश्वेतवर्णिका
बहुरूपाग्निवर्णा च जिह्वावर्णं प्रकीर्तितम् ९७
हिरण्याकनकाशान्ता रक्तावश्यकरी भवेत्
कृष्णा च मारणी प्रोक्ता सुप्रभा मोक्षकारिणी ९८
बहुरूपातिरक्ता च सर्वाभीष्टप्रदा भवेत्
सद्यो जातेन पूर्वायां समिद्धोमं समाचरेत् ९९
आग्नेय्यां हृदयेनैव याम्यायां गुह्यमन्त्रतः
नैर्ऋत्यां शिखया हुत्वा वारुण्यां वाममन्त्रतः १००
वायव्यां कवचेनैव सौम्यायां पुरुषेण तु
ऐशान्यां शिरसा हुत्वा मद्धयमे मूलमन्त्रतः १०१
विवाहे पश्चिमे जिह्वां जातकर्मे च मद्धयमे
चौळोपवीतयोस्सौम्ये पितृकार्येषु दक्षिणे १०२
आग्नेय्यां शान्तिहोमं स्यादीशाने चोग्रकर्मणि
पूर्वे पुंसवनं प्रोक्तमेतद्धोमस्य लक्षणम् १०३
ईशाने मुक्तये होमः पुरुषे चाणिमादिकम्
प्रायश्चित्तादिकं घोरे तथास्येक्रूरकर्म च १०४
वश्याकर्षणमोहार्थं वामदेवे तु होमयेत्
नित्यकर्मविधानन्तु वक्त्रेस्मिन्पश्चिमे हितः १०५
वश्याकर्षणयोराद्या कनकास्तंभने हिता
विद्वेषमोहयो रक्ता कृष्णामारणकर्मणि १०६
सुप्रभाशान्तिके प्रोक्ता सुरक्तोच्चाटने मता
एकैवबहुरूपा च सर्वकामफलप्रदा १०७
मूलं कर्मविनाशाय मद्धयेन पुत्रनाशनम्

अग्रतो व्याधिदश्चैवाप्येकहस्तेन निर्धनम् १०८
मूलमद्धयाग्रतश्चैवाप्युपहस्तात्समिद्धनेत्
स्वकारो सूतकं विद्यादाकारो रिपुवर्द्धनम् १०९
हकारो ब्रह्महत्यानामाहुतिः कुत्रदीयते
नादान्ते चाहुतिं कुर्यात्सर्वसिद्धिकरं भवेत् ११०
आज्यहोमे नशयनं शेषमासीन एव वा
तथेंद्रे मेखलापादं द्विभुजौ दक्षिणोत्तरे १११
पश्चिमे तु शिरोविद्यात् शिखा तद्योनिरुच्यते
तत् ज्वाला ---- यस्य तन्नाळन्नाभिरुच्यते ११२
अनलं प्राणमित्युक्तं कुंडमूर्तिरुदाहृता ११३

इति वह्निरूपविधिपटलस्त्रयोविंशतिः

स्रुक्स्रुवलक्षणपटलप्रारंभः

अतस्रुक्स्रुवयोर्वक्ष्ये लक्षणन्तु प्रजापते
यज्ञोक्तलक्षणैर्वृक्षैः कारयेत्स्रुक्स्रुवौ बुधः १
वैकंकतशमीबिल्वचूतन्यग्रोधखादिराः
अश्वत्थोदुंबरप्लक्षपनसंश्च शिरीषकाः २
यज्ञवृक्षास्समाख्याताः प्रागुक्तलक्षणान्विताः
मूलाग्रन्तु विनिश्चित्य वृक्षसंग्रहकालके ३
मूलाग्रेण च तेनैव कार्यं मूलाग्रकं तयोः
स्रुक्स्रुवावेकवृक्षार्द्धात् मद्धये सारं प्रगृह्य च ४
द्विधा विभज्य तद्वक्षं त्वक्पार्श्वे बिलमाचरेत्
मूलं स्रुक्स्रुवयोर्दण्डे तरोरग्रे तु पंकजम् ५
कृत्वा सलक्षणं ह्येवं सर्वदोषविवर्जितम्
मानहीने भवेद्रोगं भिन्ने प्राणिकुलक्षयम् ६
अधिके शत्रुवृद्धिस्स्यात्स्फुटिते मूर्तिनाशनम्

विलद्वारे त्रियानाशं खाताधिक्ये धनद्वयम् ७
तस्मात्सर्वप्रयत्नेन यथोक्तं सम्यगाचरेत्
उत्तमं मद्धयमञ्चैव कन्नयसं त्रिविधं मतम् ८
वस्वंगुलैस्त्रिगुणितैः स्रुवदैर्घ्यमुक्तमृद्वांगुलैर्भवति तस्य तुमूलनाहम्
।
ग्रास्याग्रनाहमपि मूलवदेव कुर्यात्कर्णस्य नाहमिदमद्धयममुक्तमेव
९
नासापुटप्रतिमपुष्करमास्यकार्यं कर्षाज्य पूरमनलांगुलदैर्घ्यमुक्तम् ।
मूलात्क्रमेण कृशतानपि तद्गळान्तं कुर्वीतसर्वभवनेषु मनोज्ञरूपम्
१०
त्रितालायामसंपन्नविस्तारे कलशद्वयोः
कालोत्सेधसमोपेता स्रुग्भवस्तस्य कर्मणा ११
सप्तांगुलं भवेदास्यं विस्तारायामतोबहिः
त्रिभागादेकमग्रं स्यात्करणठायामं कलार्द्धतः १२
वेदिकां सम्यगाकल्प्य तन्मुखौ चतुरी कृताः
तन्मद्धये तु बिलं कुर्याद्वर्तुळं श्वभ्रशोभनम् १३
पार्श्वेष्टपत्रसंयुक्तं प्रान्तरेखाविभूषितम्
तत्परं पद्मिकां कुर्यात्तस्याः कर्णप्रमाणतः १४
परितः पवमानन्तु तत्परं पत्रचित्रितम्
बाह्ये वेदिकयायुक्तं दण्डाग्रे गण्डिकात्रयम् १५
मुखमेवं प्रकल्प्यैव मग्रे स्यात्तु तदर्द्धकम्
गंडिकां पद्मचित्रं वा दण्डमूले स्रुवे भवेत् १६
स्रुवमाययाममानेन तथारत्नमिदं भवेत्
षडंगुलपरीणाहमग्रे स्यात्तत्तदर्द्धकम् १७
गोपादसदृशाकारं भद्रे स्यात्तु पुटद्वयम्
कर्षप्रमाणपूर्णन्तत्स्रुवमेवं विधीयते १८

इति लक्षणसंयुक्तौ न्यस्त्वातौ होमसाधनैः ।
वेदभानुयुगनागतुंगकमन्यमेतदृषिभिः पुरातनैः ।
कुंभदण्ड उपदेशका तथा वेदिका गळकृतं मुखं क्रमात् १६
तस्य दण्डपरीणाह षट्पुनः गर्तमस्य चतुरं गुलं बुधैः ।
खातव्योमा अग्निपरितोत्रवेत्रयुक्पद्मपुष्पमथ पृष्ठदेशके २०
कनिष्ठताराकृतवर्द्धनीस्त्रुवं गर्तगंडिपरितो इदं स्त्रुवम् २१
त्रित्रिहस्तं समारभ्य यावद्रुद्रकरान्तकम्
तोरणस्योच्छ्रयं विद्यादधमादित्रयंत्रयम् २२
भित्यूर्ध्वोत्सेधकार्द्धन्तु तस्याकारमिति स्मृतम्
तद्विस्तारं त्रिधाभज्य एकभागप्रमाणतः २३
मद्धये शूलं प्रकर्तव्यं पातायेऽपि तथैव च
तद्विस्तारद्वयांगुल्यं खनमेकांगुलं भवेत् २४
रसांगुलं समारभ्य यावन्मन्वंगुलान्तकम्
द्वारोत्सेधस्तथोत्सेधद्वारविस्तारविस्तृतम् २५
तोरणाग्रे तु शूलं स्यात्त्रिःत्रिःकीलसमावृतम्
सप्तांगुलस्य विस्तारं युगाङ्गुलघनं भवेत् २६
तोरणस्येवमाख्यातमष्टमंगळमुच्यते
देवाष्टमं गलञ्चैव द्विजानामष्टमंगळम् २७
नृपाष्टमंगलञ्चैव वैश्यानामष्टमंगळम्
देवानाञ्च विशेषेण अष्टमंगळमुच्यते २८
दर्पणं पूर्णकुंभञ्च वृषभं युग्मचामरम्
श्रीवत्सं स्वस्तिकं शंखं दीपो देवाष्टमंगळम् २९
देवाष्टमंगळं प्रोक्तं द्विजाष्टमंगळं श्रुणु
पताकाशं खचक्रञ्च पूर्णकुंभं सपत्रकम् ३०
छत्रं लक्ष्मीप्रदीपञ्च द्विजानामष्टमंगळम्
द्विजाष्टमंगळं प्रोक्तं नृपाष्टमंगळं श्रुणु ३१

भेरीवृषो गजश्चैव चामरी केसरी ऋषः
पताका च प्रदीपञ्च भूभुजामष्टमंगळम् ३२
नृपाष्टमं दळं प्रोक्तं वैश्याष्टमंगळं श्रुणु
सवस्त्रस्ये तु पतका भेरी कुंभञ्च दीपिका ३३
नन्द्यावर्तञ्च देवानां वैश्यानामष्टमंगळम्
वैश्याष्टमंगळं प्रोक्तं शूद्राष्टमंगळं श्रुणु ३४
दर्पणं पूर्णकुंभञ्च पताकाछत्रभेरिका
श्रीवत्सं स्वस्तिकं पद्मं शूद्राणामष्टमंगलम् ३५
एवं पञ्चविधं ज्ञेयं लक्षणं वक्ष्यते श्रुणु
याज्ञिकं वृक्षमादाय कारयेत्सप्रमाणतः ३६
उत्सेधं षोडशांगुल्यं विस्तारन्तु तदर्द्धकम्
तद्विंशांशं घनं प्रोक्तं ग्राहयेत्फलकाष्टकम् ३७
एतदन्यत्प्रकारेण विस्तारोत्सेधमुच्यते
विस्तारं पूर्ववत्ग्राह्यमर्घ्यांगुलविहीनकम् ३८
उत्तमोत्तममारभ्य तन्नयसस्याधमान्तकम्
उत्सेधञ्चैवमाख्यातं विस्तारं तद्वयं क्षयेत् ३९
नवधामानमित्युक्तं फलकानां प्रजापते
अथवान्यप्रकारेण विस्तारोत्सेधमुच्यते ४०
षोडशांगुलमायामं विस्तारन्तु तदर्द्धकम्
अधस्तात्पद्मपीठन्तु चतुरंगुलमानतः ४१
तदूर्ध्वे दर्पणादीनि लेखयेदथ कारयेत्
दर्पणं दर्शनञ्चैव पूर्णकुंभन्तु कुंभकम् ४२
वृषभे वृषभञ्चैव सव्यानो युग्मचामरैः
श्रीवत्से चैव श्रीदेवी स्वसिकेतुसरस्वती ४३
शंखे च विमलं प्रोक्तो दीपे तु ज्वलनं स्मृतः
स्वस्वनाम्नासमभ्यर्च्य सूत्रपातन्तु कारयेत् ४४

दर्पणास्यह्युमादेवी पूर्णकुंभस्य जाह्नवी
वृषभस्य स्वधादेवी करवी युग्मचामरे ४५
श्रीवत्सस्य तु श्रीदेवी स्वस्तिके तु सरस्वती
शंखस्य शशिनीदेवी दीपस्य स्कन्ददेवता ४६
ऊर्वशी मेनका चैव रंभा चैव तिलोत्तमा
सुमुखी दुर्मुखी चैव कामुकी कामवर्द्धनी ४७
एताश्चाप्सरसः प्रोक्तास्त्वष्टमं गळधारिकाः
अष्टमंगळमाख्यातमायुधानान्ततश्शृणु ४८
वज्रं शक्तिञ्च दण्डञ्च खट्गं पाशांकुशन्तथा
गदात्रिशूलं चक्रञ्च पद्मञ्चैव दशायुधम् ४९
द्वारतारप्रमाणं वा तस्यार्द्धं वा तदर्द्धकम्
युक्तीनाञ्चैव सर्वेषां शिल्पिनाञ्जनसाथवित् ५०
वज्रवृद्धेण कर्त्तव्यं पूर्ववद्रूपमेव च
इंद्रानलयमाश्चैव राक्षसो वरुणस्तथा ५१
वायुस्सोमस्तथैशानो ब्रह्माविष्णुश्च देवताः
वज्रादिपद्मपर्यन्तं खट्गानान्त्वधिदेवताः ५२
विलासिनी रूपिणी चाथ धारिणी विमुखी तथा
निर्मुखी दुर्मुखी चैवमतिभ्रंगी सुमालिनी ५३
सरस्वती च लक्ष्मी च शक्तयः परिकीर्तिताः
विपुला च शचीदेवी स्वधास्वाहा च पार्श्वयोः ५४
नीली च काळकर्णी च जालकेशी सुकेशिनी
हर्षणी च हृदार्दी च मंगरीमांसिषी तथा ५५
ऋद्धिश्चैव निवृत्तिश्च स्वरूपी च निवृत्तिका
सावित्री भारती चैव श्रीदेवी पृथिवी तथा ५६
इत्येवं लोकपालानां शक्तिद्वयमुदाहृतम्
भेदिनी मोहिनी माया ह्लादिनी लोकमातरी ५७

क्षेत्रभर्वी च वीरेशी मालिनी भूतमातरी
सुप्रिया च सुकेशी च जृंभिणी वैरवी तथा ५८
इत्येवं द्वारपालानां शक्तिद्वयमुदाहृतम्
मंगळं शक्तिकुंभञ्च कटकञ्च सरोरुहम् ५९
चामरं मुकुरञ्चैव दीपोदेव्याष्टमंगळम्
नाराचञ्चत्रिशूलञ्च घण्टां खट्वांगमेव च ६०
कपालं डमरूञ्चैव ध्वजपादन्तथैव च
वेताळसूरिपाशञ्च देवीनान्तु दशायुधम् ६१

इति स्रुक्स्रुवलक्षणपटलश्चतुर्विंशतिः

यागशालालक्षणपटलप्रारंभः

समानतो यागशाला लक्षणं वक्ष्यतेऽधुना
मण्टपं कुण्डवेदीञ्च स्रुक्स्रुवावष्टमंगळम् १
दशायुधवितानञ्च दर्भमाला च दिक् ध्वजम्
कदळीपूगदामानि दुकूलकबरीकचम् २
नारंगलिकुचंस्रक्च गात्रवेष्टनदर्पणम्
तोरणं पुष्पमाला च कुंभं तस्य च वर्द्धनम् ३
घटं वा कलशं वापि नाळिकेरं तिलाक्षतम्
गन्धपुष्पगुळञ्चैव द्रव्याण्यन्यानि यानि च ४
होमद्रव्याणि सर्वाणि समापाद्य विधानवित्
उत्सवे च प्रतिष्ठायां दीक्षायां प्रोक्षणेऽपि च ५
स्नपनादिषु कार्येषु यागमण्टपमुच्यते
प्रासादस्याग्रतो वापि पूर्वे याम्ये च वारुणे ६
सौम्ये दिशीशके वापि पावके वा विधीयते
त्रिपञ्चरससप्ताष्ट नवपङ्क्तिश्च रुद्रयुक् ७
भानुत्रयोदशं विंशत् द्वात्रिंशत् हस्तमानकम्

एतैर्मानैः क्रमात्कुर्यान्मण्टपञ्चतुरश्रकम् ८
आशोद्धृवसुधां सम्यक् जानुपर्यन्तमेव च
समीकृत्वौ पलिप्याथ तस्मिन्वास्तु समर्चयेत् ९
मण्टपं कारयेद्धीमान्मात्रांगुलवशात्क्रमात्
मण्टपेषु च सर्वेषु पूर्वे वाष्टादशक्रियाम् १०
गुप्तशल्यनिवृत्यर्थं प्रकुर्यात्तु विचक्षणः
उत्तमत्रयलिंगेषु द्वात्रिंशद्धस्तमिष्यते ११
विंशतिर्मद्धृयमेषूक्तो कन्यसेष्टादशंकरम्
रसाष्टद्वादशं हस्तः पवित्रादिषु कर्मसु १२
बाणसप्तत्रिहस्तं वा चललिंगेंकुरेऽपि वा
मानमादौ विनिश्चित्य मण्टपं कारयेत्सुधीः १३
लिंगस्य स्थापने चैव सकळस्थापने तथा
उत्सवे प्रोक्षणे चैव दीक्षायां बाणलिंगके १४
प्रकर्त्तव्यं विधानेन पदे भुवनसंज्ञके
विमानस्थापने चैव त्रिशूलस्थापने तथा १५
विमानप्रोक्षणे चैव तत्पवित्राधिवासने
कार्यं रुद्रपदे चैव गेहद्वादशसूत्रकैः १६
चललिंगप्रतिष्ठायामष्टबन्धनकर्मणि
प्रायश्चित्तादिके कार्ये सकळप्रोक्षणेऽपि च १७
कार्यन्नन्दपदे धीमान् शेषं युक्त्या प्रकल्पयेत्
सूत्रपातं प्रकुर्वीत प्रागग्रञ्चोत्तराग्रम् १८
शालिपिष्टार्द्धसूत्रेण पङ्क्तिसूत्रमथाचरेत्
मण्टपाभ्यन्तरं सर्वमेकाशीति पदं कुरु १९
ब्राह्मयन्नवात्मकं प्रोक्तं दैविकं षोडशं क्रमात्
चतुर्विंशतिसंख्यञ्च मानुषं पदमीरितम् २०
द्वात्रिंशदात्मकं ज्ञेयं पैशाचं यागवेश्मनि

मानुषञ्च पदन्तत्र देशिकस्थानमुच्यते २१
मद्धये ब्रह्मपदे वेदी देविके मंगळाष्टकम्
मानुषे च पदे कुण्डं पैशाचे तोरणं भवेत् २२
मद्धये त्वेकपदे कुंभं प्रधानं वर्द्धनीमुमाम्
अभितः पदविद्येशान्देविकेषोडशाह्वये २३
अष्टमंगळमित्युक्तञ्चतुर्विंशतिसंज्ञके
मानुषे कुण्डमित्युक्तं द्वात्रिंशत्पदसंज्ञके २४
पैशाचे तोरणञ्चैव कलशश्च यथाक्रमम्
वृक्षञ्च खादिरञ्जातिक्रमुकन्नाळिकेरकम् २५
न्यग्रोधं वेणुदण्डञ्च पङ्क्तिमानमथोच्छ्रयम्
नाहं विंशतिरंगुल्यं क्रिमिकाटरवर्जितम् २६
मण्टपं वापि कूटं वा प्रपां वापि प्रकल्पयेत्
नाळिकेरदळेनैव तालपूगदळेन वा २७
ऊर्द्ध्वमाच्छादयेत् मंत्री नीरन्ध्रन्तु सलक्षणम्
द्वादशस्तंभसंयुक्तं षोडशस्तंबसंयुतम् २८
षट्त्रिंशत्स्तंभसंयुक्तञ्चतुष्षष्ट्यंघ्रिसंयुतम्
दशाष्टषट्करोत्सेधैश्श्रेष्ठादीनामनुक्रमात् २९
षड्विंशद्धस्तदीर्घं स्यादष्टतालसु विस्तरः
वितानमद्धयोर्मद्धये यागसद्मनिदेशिकः ३०
कलातालोत्तमं विद्धि मद्धयमं रवितालकम्
कन्यसं वसुतालं स्यात् तोरणञ्चार्द्धविस्तरम् ३१
षडंगुलं समारभ्य यावन्मन्वंगुलान्तकम्
तोरणांघ्रिं प्रकुर्वीत याज्ञिकैः पादपैस्तथा ३२
तद्विस्तारं त्रिधाभज्य तेषु शूलन्नयसेद्बुधः
शूलं रसांगुलायामं नेत्रांगुलसुविस्तरम् ३३
व्योमांगुलघनन्तत्र कल्पयेद्देशिकोत्तमः

ऋषिबाणाग्निदर्भाग्रैर्विंशत्यंगुललंबनम् ३४
सप्तद्वित्र्यंगुलं योज्यं कारयेद्दर्भमालिकाः
नेत्रांगुलमिदं रज्जु बन्धयेत्तोरणाग्रके ३५
अष्टदिक्षुद्ध्वजानष्टौ लंबयेत्तु प्रदक्षिणम्
पूर्वस्यां पीतवर्णन्तु पावके रक्तवर्णकम् ३६
नीलांबुजनिभं याम्ये धूमाभं राक्षसे ध्वजम्
क्षीराभं वारुणे देशे शबळाभन्तु मारुते ३७
तप्तहेमनिभं सौम्ये स्फटिकाभन्तुशांकरे
गायत्र्यंगुलविस्तारं द्विकलांगुलमायतम् ३८
विस्तारेण समं पुच्छं पुच्छार्द्धं शिखरं भवेत्
ध्वजमद्धये लिखेद्धीमान् दिग्गजांश्च विशेषतः ३९
चतुःपुच्छं त्रिपुच्छं वा पुच्छद्वयमथापि वा
पूर्वद्वारोत्तरे कुंभे नन्दिशान्ति द्विकुंभकौ ४०
तद्याम्ये त्रिषु कुंभेषु शककाळरविं यजेत्
अग्निश्चानलदिक् भागे कुंभमेकं प्रपूजयेत् ४१
याम्यस्य पूर्वदिक्भागे भृंगिविद्या द्विकुंभकौ
तत्पश्चाद्यमविघ्नेशौ कुंभयुग्मं प्रपूजयेत् ४२
नैर्ऋत्यां त्रिषु कुंभेषु ब्रह्मानिर्ऋतिकेशवम्
प्रतीच्यान्दक्षिणे भागे वृषभञ्च निवृत्तिकम् ४३
तस्योत्तरत्रिकुंभेषु स्कन्दोमावरुणान्यजेत्
वायौ च वायुविघ्नेशौ कुंभयुग्मं प्रपूजयेत् ४४
उदीच्यां पश्चिमे भागे द्विकुंभे संयजेत् गुरुः
गौरीप्रतिष्ठा तत्पूर्वे तथा सोमञ्च चण्डकम् ४५
ईशाने त्रिषु कुंभेषु गुरुमीशविधिं यजेत्
वास्तुपन्निर्ऋतिं विष्णुं द्विपदे तु प्रकल्पयेत् ४६
तथा च वरुणस्कन्दौ श्रियञ्च द्विपदे क्रमात्

गुरुमीशविधिञ्चैव द्विपदे तु प्रशस्यते ४७
अन्येषां सर्वदेवानां तत्तत्स्थानेषु पूजयेत्
दिव्यन्तरिक्षभूमिष्ठ विघ्नानुद्वास्य बुद्धिमान् ४८
दक्षजंघासमुत्क्षिप्य वामजंघां विवर्जयेत्
दक्षिणाग्रे पार्ष्णिदेशं चतुरंगुलमुन्नतम् ४९
भूमौ त्रिताडनं कृत्वा पार्ष्णिघातं विधीयते
शान्तिभूतिबलारोग्य तोरणेषु प्रकल्पयेत् ५०
उत्तमं त्रिंशदंगुल्यं मद्धयमं षोडशांगुलम्
अधमं द्वादशांगुल्यं वेदिकोत्सेधमुच्यते ५१
कुंडं सलक्षणं कुर्यात् मानांगुलवशेन तु
उत्तमन्तु शिलाधानं मद्धयमं त्विष्टिका तथा ५२
कन्नयसं मृणमयं प्रोक्तं त्रिविधं कारयेत्क्रमात्
कुणडं हस्तप्रविस्तारं त्रिमेखलसमायुतम् ५३
त्रिमेखलं त्रितत्वञ्च ब्रह्मविष्णवीशरूपकम्
मूले चैव विधातारं मद्धयमे विष्णुदैवतम् ५४
अग्रे शिवमयं कृत्वा त्रिमेखलाधिदैवतम्
शिवमेखलविस्तारं उत्सेधन्तु यथांगुलम् ५५
अग्न्यंगुलन्तु विस्तारमुत्सेधं विष्णुमेखला
अंगुलद्वयविस्तारमुत्सेधं शिवमेखला ५६
चतुरश्रं त्रयश्रञ्च षडश्रञ्च पुमान्भवेत्
योन्याकारं धनुः पद्मं स्त्रीरूपं संप्रकीर्तितम् ५७
सुवृत्तमष्टकोणञ्च नपुंसकं हुताशन
अष्टाश्रं चतुरश्रञ्च वृत्तञ्चेति षडश्रकम् ५८
पुमान्कुणडमिति प्रोक्तं स्थितं वा कुणडमुच्यते
योन्याकारं त्रिकोणञ्च वर्तुळं पद्मकुंडकम् ५९
आसीनन्तु प्रकर्तव्यं स्त्रीरूपमिह चोदितम्

अर्द्धचंद्रञ्च पञ्चाश्रमष्टाश्रं शयनं भवेत् ६०
नपुंसकमिति ज्ञेयं त्रिविधन्तु प्रजापते
ब्रंहणाञ्चतुरश्रन्तु राज्ञां वर्तुळमिष्यते ६१
वैश्यानामर्द्धचंद्राभं शूद्राणां त्रयमीरितम्
चतुरश्रन्तु सर्वेषामष्टमे सर्वतां त्रिकम् ६२
कुंडस्वरूपं जानीयात् परमं प्रकृतेर्वपुः
वृत्तपीठस्य लिंगस्य वृत्तमेवमुदाहृतम् ६३
पद्मपीठस्य पद्मं स्यात् चतुरश्रयुतस्य च
पीठस्य तु युगाश्रं स्यात्कुरडं मानांगुलेन तु ६४
मेखलात्रितयं कुरडे पादत्रयमिहोच्यते
योनौ योनिं विजानीयात्खातं कुक्षिं विचिन्तयेत् ६५
परिधित्रितयं बाहु नाभौ नाभिञ्च भावयेत्
एकज्योतित्रिपादञ्च चतुश्शृंगं द्विधाशिराः ६६
सप्तजिह्वा सप्तहस्ता सप्त-----
ऊर्ध्वास्यस्सुमुखो भूत्वा सुखासनसमन्वितः ६७
स्वाहास्वधा च तत्पत्नी दक्षिणे वामके तथा
------ चतुरंगुल्यमविच्छिन्नं घृताहुतिः ६८
पञ्चाननं शिरोग्रीवं पञ्चादश सुलोचनम्
दशहस्तं वृषारूढं त्रिपदाग्निसदाशिवम् ६९
पूर्वे चाहवनीयाग्निर्दक्षिणे वैदिकं यजेत्
पश्चिमे केवलाग्निश्च गार्हपत्यमुदक् दिशि ७०
ईशाने च प्रधानन्तु वह्निरूपं विशेषतः
हिरण्यायां समिद्धूयात्कनकायां घृतं हुनेत् ७१
रक्तायान्तु यवं प्रोक्तं कृष्णायामन्नकं हुनेत्
सुप्रभायां हुनेत्सक्तुमतिरिक्ता तिलन्तथा ७२
सिद्धार्त्थं बहुरूपायां सर्वासु व्याहृतिं हुनेत्

द्रव्याण्येतानिसर्वाणि कनकायां हुनेत्ततः ७३
यो जिह्वा तु न जानाति तद्धुतन्निष्फलं भवेत्
तस्मात्सर्वप्रयत्नेन कनकायां हुनेत्क्रमात् ७४
समिधायां शिवं प्रोक्तमाज्ये च परमेश्वरी
चरोस्तु परमो विष्णुर्लालानामृषिरेव च ७५
सर्षपञ्चाग्निदैवत्यं सक्तूनां सूर्यदेवता
मधूनां सोमदैवत्यमिक्षूणां वायुरेव च ७६
तिलस्य पितरः प्रोक्ता मुद्गस्य वरुणस्तथा
माषमीश्वरदैवत्यं नीवारं वृषभेश्वरम् ७७
आढकीशुकदैवत्यं शालीनां सोमदेवतम्
दधिनां माधवं प्रोक्तं क्षीरस्य श्रुतिरेव च ७८
अपूपस्य गणेशन्तु गुळस्य स्कन्ददैवतम्
होमद्रव्यादि सर्वेषामधिदेवाः प्रकीर्तिताः ७९
सूकरी च मृगीहंसी होममुद्रास्त्रयस्मृताः
तर्जनी मद्ध्यमांगुष्ठैश्शान्तिकर्मणि हंसिका ८०
मद्ध्यमानामिकांगुष्ठैः काम्यार्थे च मृगीस्मृता
सर्वैरंगुलिभिश्चोग्रकार्येषु सूकरीस्मृता ८१
मुद्राहीनन्तु यद्धोमं तद्धोमं निष्फलं भवेत्
घृतं कर्षार्द्धहोमं स्यात् क्षीरस्य मधुनस्तथा ८२
शक्तिमात्रं हुनेद्दध्ना ----- पायसस्य तु
कर्षार्धं सर्वभक्ष्याणां लाजानां मुष्टिरेव च ८३
खण्डत्रयन्तु मूलानां स्वप्रमाणविमिश्रितम्
ग्रासार्द्धञ्चैवमन्नानां ------ ८४
इक्षोरापर्विकम्मानं भूतानामंगुलद्वयम्
पत्रं पुष्पं स्वमानेन समिधो द्वादशांगुलम् ८५
चंद्रचन्दनकाश्मीर कस्तूरी यक्षकर्दमान्

कला ----- गुग्गुलं बदरास्थि ८६
कन्दानामष्टभागन्तु अपूपं सप्रमाणतः
नाळिकेरं तथाभिद्यदशांशं होमयेत्ततः ८७
फलानि स्वप्रमाणेनाप्यन्नमद्यप्रमाणतः
तिलञ्च सर्षपं शुक्त्या होमयेत्तु यथाविधि ८८
इति यागशाला लक्षणपटलः पञ्चविंशतिः

आचार्यलक्षणपटलप्रारंभः

आचार्यलक्षणं वक्ष्ये लिंगसंस्थापनाय च
पञ्चशैवास्समाख्यातास्सिद्धान्ते तु प्रजापते १
प्रथमो नादिशैवस्तु सशैवस्तु सदाशिवः
आदिशैवोद्वितीयस्तु सशिवब्राह्मणस्मृतः २
आदौ सदाशिवेनैव दीक्षितस्त्वादिशैवकः
कौशिकः काश्यपश्चैव भारद्वाजोऽथ गौतमः ३
अगस्त्यश्चैव पञ्चैते पञ्चवक्त्रेषु दीक्षिताः
कौशिकश्शिवमूर्त्या तु दीक्षितश्शिवगोचरः ४
काश्यपस्त्वीश्वरेणैव शिखागोचरसंस्थितः
ईशानेन भरद्वाजो दीक्षितो ज्योतिगोचरः ५
गौतमो ब्रह्ममूर्त्त्या तु सावित्री गोचरस्थितः
अगस्त्यश्चोर्द्ध्ववक्त्रेण दीक्षितो व्योमगोचरः ६
ऋषीणामेव पञ्चानां गोचरास्संप्रकीर्तिताः
आदिशैवा इमे ख्याताः गोचरं कुलमुच्यते ७
कुलेष्वे तेषु सञ्जाता स्थापनादिक्रियार्हकाः
सदाप्रवर्त्तकास्त्वेते ह्यादिशैवा इति स्मृताः ८
तृतीयन्तु महाशैवस्सशैवो विप्र उच्यते
चतुर्त्थश्चानुशैवोक्तो नृपश्चैव तथास्मृतः ९

पञ्चमोऽन्तरशैवस्तु शूद्रश्चेति तथामतः
बिंद्वर्द्धेनाश्रितः प्रोक्तस्त्वादिशैव इति स्मृतः १०
आदिशैवा इति प्रोक्ता महाशैवस्तु कथ्यते
महाशैवाश्रितः प्रोक्तश्चानुशैव इति स्मृतः ११
अनुशैवाश्रितः प्रोक्तश्चानुशैवोऽपि कथ्यते
महाशैवानुशैवाश्च तथा चान्तरशैवकाः १२
आत्मार्त्थयजनं कुर्यान्नकुर्यात्तु परार्त्थकम्
तेषु मन्त्रेण शूद्रस्तु ज्ञात्वा सम्पूजयेच्छिवम् १३
आदिशैवस्य कर्त्तव्यं आत्मार्त्थञ्च परार्त्थकम्
स्थापनं यजनं सर्वञ्चादिशैवार्हको विदुः १४
कृतञ्चेदन्यथा स्यातामभिचाराय चैव हि
यथागोरन्नचवत्सव्यन्नदु ऋृत्येव तद्रसम् १५
तस्मात्सर्वप्रयत्नेन आदिशैवेन कारयेत्
कुमारी हिमवन्मद्धयं पूतं कृष्णमृगोद्भवम् १६
जातश्चात्रादिशैवश्च आचार्याः परमस्मृताः
अद्धयापकञ्चाद्धयनं याजनं यजनन्तथा १७
दानप्रतिग्रहञ्चैव षट्कर्मनिरतस्सदा
जातस्तत्रादिशैवस्तु तथा चार्यवरस्त्रयः १८
शैवसिद्धान्ततत्वज्ञो देवाग्निगुरुभक्तिमान्
सर्वाचारसमायुक्तस्तपस्वी जनवत्सलः १९
सहिजिष्णुर्जितश्रीमान् जितेंद्रयो विगतस्पृहः
हेयोवेदार्त्थतत्वज्ञस्तत्वार्त्थे तु व्यवस्थितः २०
धर्मत्रियादिनिपुणो वीतरागोविमत्सरः
परापवादहीनश्च रन्ध्रान्वेषिणहीनकः २१
परतत्वे सदाद्धयायी शिवशासनतत्परः
सर्वशास्त्रार्त्थकुशलस्समयाचारपालकः २२

ग्रहस्थस्सरसो वाग्मी सुशीलः प्रियदर्शनः
शिखी च बद्धकेशो वाश्मश्रु रोमादिवर्जितः २३
अरोगीदीक्षितश्शैव मन्त्रमुद्राक्रियान्वितः
पदवाक्यप्रमाणज्ञः पशुशास्त्रपराङ्मुखः २४
शिवतन्त्रैकचित्तात्मा सर्वप्राणि हितेरतः
वास्तुविद्या कृताभ्यासश्शल्योद्धारविशारदः २५
सर्वावयवसंपूर्णस्सर्वलक्षणलक्षितः
ईदृक् लक्षणसंपन्नस्थापकश्रेष्ठ उच्यते २६
पिंगाक्षोडांभिकः कुब्जो वामनः कुनखी कृशः
व्यसनी निर्दयस्तब्धः चपलः पारदारिकः २७
व्रतच्युतश्शठः क्लीबो दीनोनैपुणयवर्जितः
सन्यासी तार्किकश्शुद्धः शिवशास्त्रच्युतो वरः २८
पणयांगनोपजीवी च कृतघ्नो नास्तिकः खलः
गुरुदेवद्विजातीनां निन्दकोदन्तुरो भिषक् २९
खल्वटश्श्यावदन्तश्च कुसुमाक्षी च पातकः
शिपिविष्टोधिकांगश्च नास्तिकश्चातिदीर्घकः ३०
हीनांगः विशुनश्चैव दुश्शीलो दन्तहीनकः
बालो बहुगुणोपेतो वृद्धो विकटदन्तकः ३१
परापवादो व्यसनी बधिरश्चिबुकस्तथा
अतिस्थूलश्च काणश्च धूर्तो वै रक्तकेशकः ३२
गायकोनर्तकश्चैव खञ्जोनग्नो व्रतच्युतः
दुराचारी जडः पंगुः पतितः पापकर्मभुक् ३३
आलस्यो विकटांगश्च रोमशस्त्वतिभोजकः
एभिस्सलक्षणैर्युक्तो गर्हितस्सर्वकर्मसु ३४
आदिशैवकुले जातास्तादृशास्थापकास्मृताः
देशिकारब्धतन्त्रे तु निपुणावीतसंशयाः ३५

स्थापकाश्चानुकूलास्ते त्वभिप्रायविदस्तथा
मूर्त्तिज्ञामूर्त्तिपास्सर्वे सर्वकर्मसुपेशलाः ३६
आचार्यस्साधकश्चैव पुत्रकस्समयस्तथा
दीक्षिताश्च प्रतिष्ठाश्च आचार्यस्यैव योग्यकः ३७
व्याख्याता शिवशास्त्राणामुत्सवे स्नपनेऽपि च
पवित्रारोपणञ्चैव शान्तिके पौष्टिके तथा ३८
अन्येष्वपि च सर्वेषु मन्त्रकर्मसुयोग्यकः
तस्यैव साधकस्यापि दीक्षास्थापनवर्जितः ३९
त्रियासर्वास्त्वयोग्यास्स्युः पुत्रकस्तु विशेषतः
व्याख्यानं वर्जयेत्ताभ्यां समयीनामनन्तरम् ४०
कुर्यादात्मार्थमर्चाञ्च शुश्रूषा देशिकादिषु
अन्यकर्मविशेषेण वर्जयेत्तु विचक्षणः ४१
पञ्चानां कौशिकादीनां गुरुस्थापनमुच्यते
कौशिकस्य महच्छत्रं काश्यपस्य उपानहम् ४२
भरद्वाजमुनेश्चैव नाभोद्भवं प्रकीर्तितम्
नातिगीरिकञ्चतुर्त्थस्य चरडोमं पञ्चमस्य तु ४३
ऋषीणाञ्चैव पञ्चानां गुरुस्थानं प्रकीर्तितम्
शिवगोचराविज्ञेया गुह्यमन्त्रेण संयुताः ४४
शिखागोचरविख्यातो वाममन्त्रेण संयुतः
ज्योतिर्गोचरसंज्ञेयो घोरमन्त्रेण संयुतः ४५
सावित्री गोचरो यस्तु बहुरूपेण संयुतः
व्योमगोचरगो यस्तु चैशमन्त्रेण संयुतः ४६
गोचरस्त्विति विख्यातो वर्गिणश्च ततश्शृणु
कौशिको नन्दको दक्षो विश्वामित्रस्सुनन्दनः ४७
वाल्मीकी च मुनिस्सत्यं पुलस्त्यो विपुलस्तथा
अतिदीर्घश्च वक्रांगो बोधायनस्सनातनः ४८

सनत्कुमारो मेधावी वाल्मीको मद्धयमस्तथा
आश्लायनश्चाङ्गिश्च शिवगोचरवर्गिणः ४९
काश्यपोंगिरसस्थूलः कर्दपश्चयवनोदकः
नाटचायनश्च शाण्डिल्यश्शंकुकर्णः पुरान्तनः ५०
शंखस्थूलशिखिश्चैव मुख्यो वै रोमहर्षणः
आपस्तंभा इमे सर्वे शिखा गोचरवर्गिणः ५१
भारद्वाजस्त्रिशंकुश्च मार्क्कण्डेयो शनोरजः
सुमहादेवलोजंखः पिंगळोवरुणस्तथा ५२
विश्वसृड्व्याघ्रपादश्च रोमश्चान्तरवाजसः
कृष्णश्चैव इमे सर्वे ज्योतिर्गोचरवर्गिणः ५३
गौतमोगलपश्चैव मुद्गलोवयवस्तथा
गव्यश्च विजयश्चैव बिन्दुश्चोपन्तवस्तथा ५४
ऋग्यश्चांगो वसिष्ठश्च कात्यायनो बृहस्पतिः
सावित्रिगोचराश्चैव पुनस्ते व्योमगोचराः ५५
भूधरोगौ तमश्चैव श्वेतःकौत्सोविभावसुः
पराशरश्च बिलशश्शंबरो नीललोहितः ५६
पलवश्च इमे सर्वे व्योमगोचरवर्गिणः
कुलेष्वे तेषु सञ्जातास्त्वादिशैवा इति स्मृताः ५७
एतेषां संकरं ज्ञात्वा वैवाह्यंकुरुदेशिक
शैवञ्चतुर्विधं ज्ञेयं शैवं पाशुपतन्तथा ५८
सोमं लागुळमित्येते चतुर्भेदाः प्रकीर्तिताः
एतेषु शैवभेदेषु यदातेनैव देशिकः ५९
तत्तन्मन्त्रेण कर्त्तव्या स्थापनादिक्रियान्विताः
एतेषु दीक्षितेष्वेषु सर्वान्वै स्थापनादिकान् ६०
यः करोत्यन्यतन्त्रेण तन्त्रसंकरमुच्यते
तेन दोषेण तद्वास्तु राजाराष्ट्रञ्च नश्यति ६१

तस्मात्सर्वप्रयत्नेन वर्जयेत्तन्त्रसंकरम्
वामदक्षिणसिद्धान्तस्त्रिविधं शुद्धशैवकम् ६२
मूलावतारतन्त्रादि शास्त्रं यद्वामशैवकम्
तत्भेदानि च सर्वाणि प्रोक्तं द्विजमयापुरा ६३
स्वच्छन्दादीनि शास्त्राणि दक्षिणं शैवमुच्यते
आचार्येण समायुक्तं मया प्रोक्तं पुरा तथा ६४
कामिकादीनि तन्त्राणि सिद्धान्ता इति कीर्तिताः
संकरन्दोषमेतेषां वर्जयेत्तु प्रयत्नतः ६५
कामिकं योगजं चिन्त्यं कारणं त्वजितन्तथा
दीप्तं सूक्ष्मं सहस्रञ्च अंशुमान्सुप्रभेदकम् ६६
विजयञ्चैव निश्वासं स्वायंभुवमथानिलम्
वीरञ्च रौरवञ्चैव मकुटं विमलन्तथा ६७
चंद्रज्ञानञ्च बिंबञ्च प्रोद्गीतं लळितन्तथा
सिद्धं सन्तानसर्वोक्तं पारमेश्वरमेव च ६८
किरणं वातुळं त्वेतास्त्वष्टाविंशतिसंहिताः
वातुळान्ताः कामिकाद्याः प्रादुरासन् शिवास्यतः ६९
एतेषामेकभेदत्वान्न दोषन्न तु संकरम्
कश्चिदेषविशेषोऽस्ति तं विशेषं श्रुणु द्विज ७०
प्रारब्धं येन तन्त्रेण तत्तन्त्रेण समापयेत्
नोक्तञ्चेदन्यतन्त्रेण तत्सर्वन्तु समाचरेत् ७१
समापयेद्यागकार्यं यागार्त्थञ्च व्रतञ्चरेत्
संभवे सूतकप्रेते चाशौ चन्नतुसंस्पृशेत् ७२
येनैव वर्तमानायाः त्रियायाः कारणं विना
साचान्येन कृता चेत्तु तत्स्यादाचार्यसंकरः ७३
गुरुणाकरणस्यैव विरोधे सति यत्र तु
सात्रिया तस्य शिष्येण कर्तव्या तेन शास्त्रतः ७४

अन्यधासा कृता चेत्तु कर्तृनाशं न संशयः
ज्ञात्वाचार्यस्य सद्भावं त्रिया करणकौशलम् ७५
ज्ञात्वा सिद्धान्नवैदूष्यं पाठकर्मबलन्तथा
एवमादीन् परीक्ष्याथ कारकं संग्रहेद्गुरुः ७६
अज्ञात्वा तस्य वृत्तान्तं गुरुसंग्रहणं कृतम्
तत्कृतं विफलं प्राहुः कर्तृनाशं धनक्षयम् ७७
अज्ञेनस्थापितं बिंबं पुनः संस्थापयेद्बुधः
स्थापनादावभावे तु राज्ञां मरणमादिशेत् ७८
अतस्संस्थापनं दक्षैः करणीयं विशेषतः ७९

इति आचार्यलक्षणपटलषष्ड्विंशतिः

कलान्यासविधिपटलप्रारंभः

अथ वक्ष्ये विशेषेण कलान्यासविधिक्रमम्
कूटब्रह्मकलां वक्ष्ये कलाशक्तिसमन्विता १
कलाः पुमांस इत्युक्तास्तत्कलाशक्तयस्त्रियः
निष्कळाश्चेति विख्याता तत्कलाशक्तयः कलाः २
ईशानस्य कलाः पञ्च पुरुषस्य चतुष्कला
अघोरस्य कलाश्चाष्टौ वामदेवे त्रयोदश ३
अष्टौ सद्यकलाश्चैव मकुटादिक्रमान्न्यसेत्
ईशानश्चेश्वरो ब्रह्मा शिवश्चेति सदाशिवः ४
तत्पुरुषश्च महादेवो रुद्रश्चेति प्रचोदयात्
अघोरश्चाप्यघोरश्च घोरघोरतरस्तथा ५
सर्वतस्सर्वशर्वश्च रुद्रस्य घोरकस्य तु
वामो ज्येष्ठश्च रुद्रश्च कलाश्चैव कलास्तथा ६
विकरीणो बलश्चैव विकरेणौ बलस्तथा
बलप्रमथनस्सर्वभूतश्चात्मन एव च ७

सद्योजातश्च सद्यश्च भवश्च भव एव च
तथानादिभवश्चैव भवस्वेति भवोद्भवः ८
कलास्त्वेतास्समाख्याताः कलाशक्तिरथोच्यते
शशिनी चांगदा चेष्टा मरीची ज्वालिनी तथा ९
पञ्चैताश्शक्तयः प्रोक्ताः कलानां पञ्चमस्य तु
निवृत्तिश्च प्रतिष्ठा च विद्याशान्तिस्तथैव च १०
चतस्त्रश्शक्तयः प्रोक्ताः कलानां पुरुषस्य तु
तमो मेधाद्वया निष्ठाधृः तिद्वान्तिः स्मृतिः द्विातिः ११
अघोरस्य कलानान्तु चाष्टौ वैशक्तयः स्मृताः
रजोरद्वारतिः पाल्या वामासंयमनीक्रिया १२
तृष्णामोहाद्वुधापीताग्रामणीभ्रामणी तथा
वामदेवकलानान्तु शक्तयस्तु त्रयोदश १३
ऋद्धिवृष्टिर्द्युतिर्लद्मीर्मेधाकान्तिर्बुधाः प्रजाः
सद्यमन्त्रकलानान्तु ह्यष्टौ वै शक्तयस्मृताः १४
ईशानस्य कलाः पञ्च न्यसेदीशानमूर्द्धसु
पूर्वे च पश्चिमे याम्ये सौम्ये चैव क्रमेण तु १५
चतुष्टयेषु वक्त्रेषु पुरुषस्य कलान्नयसेत्
हृदये कण्ठदेशे चाप्यंसयोरुदरेऽपि च १६
नाभौ पृष्ठौ रसश्चैव घोरस्यैव कलान्यसेत्
गुह्ये गुदे च मेढ्रे चाप्यूर्वोर्जान्वोश्च जंघयोः १७
स्फिक् द्वयोश्चैव कटयाश्च वामदेवकलान्नयसेत्
पादयोरुभयोश्चैव हस्तद्वितलयोरपि १८
बाह्वोरास्ये शिरश्चैव सद्योजातकलां न्यसेत्
उक्तस्थाने कलाश्चैव विन्यसेच्छक्तिसंयुतः १९
गौरी कलास्त्वहं वद्मये गौरी बीजसमुद्भवाः
ताराचेशकला ज्ञेया विद्यावक्त्रकलास्मृताः २०

मृत्युः श्रद्धारजो मेधा स्वधा स्वस्तिश्च वर्मणा
पालिनी ज्वालिनी तृष्णा धृतिः क्षामा मतिः प्रजा २१
चिन्ताभूतिः क्रियाक्षान्तिर्वामदेवकला इमे
शान्तिर्दान्तिर्दयासूतिर्द्युतिस्सिद्धा तु सद्यजा २२
पञ्चविंशत्कला ह्येते गौरीदेहे तु विन्यसेत्
तारञ्च विन्यसेन्मूर्ध्नि वक्त्रे विद्याञ्च विन्नयसेत् २३
हृदये च गळे चांसौ जठरे नाभिदेशके
अघोरस्य कलान्नयस्त्वा योनौ गुह्यप्रदेशके २४
ऊर्वोर्जानुद्वयोश्चैव जंघयोश्च प्रकोष्ठके
उभयोः पार्श्वयोश्चैव वामदेवकलान्नयसेत् २५
पादयोरुभयोश्चैव हस्तयोरुभयोरपि
स्तनयोरुभयोश्चैव सद्योजातकलान्नयसेत् २६
उक्तस्थाने कला चैव विन्नयसेच्छक्तिसंयुतम्
कलावर्णञ्च तत्वञ्च पदमन्त्रञ्च भौवनम् २७
एवं षडध्वमार्गेण मन्त्रेन्यासं समारभेत्
पञ्चब्रह्मकलाब्रह्मपञ्चपूर्वोक्तवन्नयसेत् २८
एवमक्षमतो वापि केवलन्तु कलान्यसेत्
एवं लिंगप्रतिष्ठान्तं न्यासं कुर्वति देशिकः २९
महेशप्रतिमानान्तु ऊर्द्ध्ववक्त्रप्रदेशके
ईशानस्सर्वविद्यानां शशिन्याद्याश्चमूर्ध्निषु ३०
तत्पुरुषाय विद्महे भूते चेति वक्त्रके
समानञ्चैव सर्वेषामघोरादि क्रमेण तु ३१
अघोरस्य कलाश्चैव वामदेवकलास्तथा
सद्योजातकलाश्चैव वामदेवकलास्तथा ३२
सद्योजातकलाश्चैव प्येकविंशत्कलान्यसेत्
एकविंशत्कलाह्येते गौरीदेवीन्तु विन्यसेत् ३३

अन्यासां देवतानाञ्च प्रतिष्ठायां तथाक्षरान्
अक्षराणान्तु विन्यासं प्रवक्ष्यामि प्रजापते ३४
आदौ नादस्समुत्पन्नो नादात् बिन्दुः प्रजायते
बिन्दोश्शक्त्या कृतिर्जाता शक्तेराद्यः स्वरो भवेत् ३५
तस्मात्स्वरद्वये जातास्तेषां भेदास्त्रयोदश
स्वराष्षोडशका जीवा कादयोऽपि च संस्मृताः ३६
प्राणोपाधिविभेदेन पञ्चाशन्मातृका स्मृताः
तैरेव चार्चिता देवास्सर्वशास्त्रे प्रजापते ३७
अकारादिक्षकारान्तं मातृकां विन्यसेत्क्रमात्
शिरोललाटनेत्रेषु कर्णयोस्तु द्विगण्डयोः ३८
नासिकोष्ठद्वयोश्चैव दन्तपंङ्क्तिद्वयोरपि
जिह्वायां तालुमूले च स्वराष्षोडशविन्यसेत् ३९
कवर्गं सव्यहस्ते तु चवर्गं वामहस्तके
टवर्गं दक्षिणे पादे तवर्गं वामपादके ४०
पफौ दक्षिणपार्श्वे तु बभौ वै वामपार्श्वके
कण्ठदेशे मकारन्तु कुक्षौ पृष्ठे तथान्यसेत् ४१
रसत्वग्रक्तमेदोऽस्थिमज्जाशुक्रधातुषु
यकारादिसकारान्तं क्रमेणैव तु विन्नयसेत् ४२
हकारं हृदिविन्यस्य ळकारं वृषणे तथा
क्षकारं मेढ्रदेशे तु प्रणवेन समन्वितम् ४३
बिन्दुनादसमायुक्तं नमस्कारयुतन्नयसेत् ४४

इति कलान्यासविधिपटलस्सप्तविंशतिः

मुद्रालक्षणपटलप्रारंभः

अथ वक्ष्ये विशेषेण मुद्राणां लक्षणं परम्
मुदं करोति देवानां द्रावयत्यसुरांस्तथा १

मोदनाद्रावणाच्चैव मुद्रेयं संप्रकीर्तिता
लिङ्गमुद्रा नमस्कारा ताळाख्या शंखमुद्रिका २
सुरभी मुकुळी चैव वाराही चैव निष्ठुरा
बीजाख्या पञ्च वक्त्री च द्रव्यमुद्राशिखाख्यका ३
संहारमुद्रिका चैव सादाख्या चैव मुद्रिका
आसनी च महेशाख्या वज्राख्या शक्तिमुद्रिका ४
दण्डमुद्रा तथा खट्गा पाशमुद्रांकुशाख्यका
गदामुद्रा च शूलाख्या पद्ममुद्रा तथैव च ५
चक्रमुद्रा तथा टंका महामुद्रा तथैव च
घण्टामुद्रास्त्रमुद्रा च शरमुद्राधनुस्तथा ६
मुद्राणामुच्यते चैव द्वात्रिंशल्लक्षणं परम्
अंगुष्ठञ्चोद्ध्वंगम्मुष्टिं कृत्वा वामेन वेष्टयेत् ७
लिंगमुद्रा तु विख्याता प्रच्छन्नेति प्रदर्शयेत्
मणिबन्धौ तु संयोज्य चांगुल्यश्चोद्ध्वंगाः क्रमात् ८
सन्निवेश्य हृदिस्थाने नमस्कारेति चोच्यते
हस्ताभ्यान्तडयेत्ताळमुद्रां कुर्यात्तु शोथने ९
तर्जनीमूलपर्वस्थावगुष्ठावञ्जली कृतौ
एषा हि शंखमुद्रा स्यात्स्नानकाले प्रदर्शयेत् १०
मणिबन्धन्ततः कृत्वा चांगुष्ठौ तलमद्धयगौ
तर्जनी मद्धयमे लग्नौ कनिष्ठाभ्यामनामिके ११
मुद्रे यं सुरभिरख्याता द्रव्यशुद्धयर्थकारिणी
संयोज्यं तेन हस्ते तु चान्तरे सुषिरन्तयोः १२
बिसिनी मुकुळा कारा स्नानान्ते तु प्रदर्शयेत्
कृत्वा करतलेंगुष्ठौ श्लिष्टोद्ध्वाशेषतः क्रमात् १३
कृते च वराहनीख्याता कुर्यादावाहने तथा
मुष्टिं कृत्वा तु हस्तौ च करपृष्ठौ च योजयेत् १४

कनिष्ठौ प्रसृतौ दीर्घौ निष्ठुरौ सन्निरोधने
अंगुष्ठौ प्रद्विपेन्मद्धये कनिष्ठौ प्रसृतौ युतौ १५
बीजमुद्रे यमाख्याता दर्शयेच्छक्तिकल्पने
द्वौ हस्ततलिकौ योज्य मद्धचांगुल्यग्रसंयुतौ १६
तर्जन्नचानामिकौ योज्या चांगुष्ठाभ्यां कनिष्ठके
इयं पञ्चमुखीख्याता दर्शयेद्वक्त्रकर्मणि १७
कराभ्यामञ्जलिं कृत्वा सवक्त्रो स्यादनामिके
तयोरग्रौ तु संलग्नौ शेषाश्च प्रसृतास्तथा १८
द्रव्यमुद्राभवेदेषा द्रव्याभावे प्रदर्शयेत्
उत्तानौ तु करौ कृत्वा वेणीबन्धन्तु कारयेत् १९
प्रसार्यमद्धचमे ज्ञेयौ शिखाख्यस्थापने तथा
वामांगुलयःप्रसृता चांगुष्ठद्वयसंस्थितम् २०
दद्विणे मुष्टिबन्धस्थमंगुष्ठञ्चोद्धर्वसंस्थितम्
तन्मुष्टिमूद्धर्वकं कृत्वा सामुद्रासंहृतावरा २१
उत्तानौ तु करौ कृत्वा वेणिबन्धन्तु कारयेत्
तर्जन्यौ च कनिष्ठौ च प्रसृतौ संयुतौ तथा २२
मुद्रासदाशिवाख्याता वाहनान्ते प्रदर्शयेत्
उत्तानौ तु करौ कृत्वा वेणिबन्धं तथा कुरु २३
प्रसार्य मद्धचमांगुष्ठौ तर्जन्यांगुष्ठसंयुतौ
निधायांगुष्ठशिरसा तर्जन्यग्रे विशेषतः २४
अनामिकाग्रौ संलग्नौ वक्रेणैव समायुतौ
कनिष्ठौ चोद्धृतौ युक्तौ मद्धचमन्तु तथा भवेत् २५
आसनाख्या तथा कुर्यात् सिंहासनं प्रकल्पयेत्
उत्तानौ तु करौ कृत्वा वेणिबन्धन्ततः कुरु २६
प्रसार्य मद्धचमांगुष्ठौ कनिष्ठौ च समायुतौ
महेशाख्या तु सामुद्रा प्रतिष्ठान्ते प्रदर्शयेत् २७

उत्तानौ तु करौ कृत्वा कनिष्ठांगुष्ठसंयुतम्
तर्जन्यनामिका मद्धया प्रसृता च तथा भवेत् २८
सव्योपरिस्थिताया च वज्रमुद्रा प्रकीर्तिता
उत्तानौ तु करौ कृत्वा चांगुष्ठौ तलमद्धयगौ २९
शेषाः परस्परं प्रोद्य तर्जनी प्रसृतौ युतौ
शक्तिमुद्रेति विख्याता मुष्टिं कृत्वा तु दक्षिणम् ३०
तर्जनी प्रसृतौ दीर्घौ दण्डेयं परिकीर्तिता
पताकादक्षिणं कृत्वा बाह्योच्छचलनन्तथा ३१
खट्गमुद्रेति विख्याता पूजादौ तु प्रदर्शयेत्
उत्तानौ तु करौ कृत्वा मुष्टिं बद्धवा विशेषतः ३२
प्रसार्य चांगुष्ठतर्जन्यावधश्चोद्धर्वं प्रयोजयेत्
उत्तरांगुष्ठतर्जन्नयामुत्तरांगुष्ठयोगतः ३३
पाशमुद्रा भवेदेषा पाशच्छेदनहेतुका
उत्तानौ तु करौ कृत्वा कुञ्चितावामतर्जनी ३४
प्रसार्य तर्जनी सव्यान्यस्त्वामुष्टियथांकुशा
उत्तानौ तु करौ कृत्वा मद्धयमौ प्रसृतौ युतौ ३५
अन्यावक्रास्समायुक्ता गदाख्येयं प्रकीर्तिता
द्विहस्तांगुलयश्चोद्धर्वमद्धयतर्जन्यनामिकाः ३६
कनिष्ठांगुष्ठकालग्नौ मुद्रेयं शूलसंज्ञका
उत्तानौ तु करौ कृत्वा वेणिबन्धन्तु कारयेत् ३७
मद्धयमे कुंचितांगुष्ठौ शेषाः प्रविरळास्तथा
पद्ममुद्राभवेदेषा तलोपरितलन्नयसेत् ३८
कनिष्ठांगुष्ठसुव्यक्तौ चक्रमुद्रा प्रकीर्तिता
उत्तानौ तु करौ कृत्वा मणिबन्धन्तु कारयेत् ३९
प्रसार्य मद्धयमा युक्तौ तर्जनी कुञ्चितावुभौ
टंकमुद्रा भवेदेषा सर्वशत्रुविनाशिनी ४०

हस्ताभ्यां संस्पृशेद्धीमान् कादिपादान्तकं यथा
एषामुद्रामहामुद्रा करसंस्कारकर्मणि ४१
उत्तानौ तु करौ कृत्वा वेणिबन्धन्तु कारयेत्
प्रसार्य मद्धयमौ द्वौ तु शेषामुष्टिस्तु कुण्डलौ ४२
घण्टामुद्राभवेदेषा भूतपैशाच नाशिनी
उत्तानौ तु करौ कृत्वा हस्तयोस्तत्परस्परम् ४३
अंगुष्ठतर्जनीभ्यान्तु स्फोटनञ्चास्त्रमुद्रिका
उत्तानौ तु करौ कृत्वा सव्यमूद्धर्वे तु दक्षिणम् ४४
प्रसार्य मद्धयमौ द्वौ च त्वधश्चोद्धर्वं विचक्षणः
शरमुद्रा भवेदेषा सर्वायुधजिता भवेत् ४५
उत्तानौ तु करौ कृत्वा मुष्टिबन्धद्विहस्तयोः
दक्षिणं कर्णमूले वा कर्षयेद्वामहस्तकम् ४६
धनुर्मुद्रा भवेदेषा सर्वशत्रुविनाशिनी ४७

इति मुद्रालक्षणपटल अष्टाविंशतिः

स्नानविधिपटलप्रारंभः

अथ स्नानविधिं वक्ष्ये शौचाचमनपूर्वकम्
हिताय देशिकादीनां शिवस्य यजनाय च १
प्राणिनां नित्यकर्मत्वादावश्यकरणात्पुरा
ब्राह्मे मुहूर्ते चोत्थाय सञ्चिन्त्यगुरुपादुकाम् २
शिवसंस्मरणञ्चैव स्तोत्रं बहुविधं वदेत्
गुरूपदिष्टमार्गेण शिवं सञ्चिन्तयेद्धृदि ३
ब्राह्मे मुहूर्ते यो विप्रश्शयनं भार्यया सह
कुरुते यदि मूढात्मा सवैकर्मबहिष्कृतः ४
ब्राह्मे मुहूर्ते दंपत्यौ शयाते यत्र मन्दिरे
तत्गृहं पापभूयिष्ठं सदेशः प्रेतमेदिनी ५

अतोद्धयानं प्रकर्तव्यं निद्रां हित्वा समाहितः
उत्थाय च बहिर्ग्रामात् छौमूर्द्धा च दण्डधृत् ६
वामयज्ञोपवीतिश्चाप्येकाकीवाग्यमस्सुधीः
पूर्वापराह्णयोर्भानोर्मण्डलं दक्षिणं यथा ७
दक्षिणाभिमुखो रात्रौ तृणमादाय भूतले
मूत्री कृत्वा तु तस्योद्धर्वे न शीघ्रं विसृजेन्मलम् ८
अनावृत्य शिरोमोहाद्योविप्रो मलमूत्रयोः
उत्सर्गं कुरुते पापी सतुवैब्रह्महा भवेत् ९
गोवासे जलतीरे वा नद्यास्तीरे श्मशानके
कूपे चैव द्रुमच्छायां चत्वरे च समुद्रगे १०
शैत्यवृक्षे च वल्मीके हलाकृष्टस्थलेऽपि वा
देवागारे भूधरे च दृषदादौ च शाड्वले ११
स्त्रीणां गोविप्रलिंगानां सम्म--न्द्र---ः
विण्मूत्रौ च न कर्तव्यौ ग्रहे वा वश्यकक्रियाम् १२
स्नानमाचमनञ्चैव सन्ध्योपासनमेव च
सर्वमन्त्रात्मकत्वाच्च कूपस्नानन्न दोषभाक् १३
तृणलोडयोपलेनाथ मृत्पिण्डेनैव वागुदम्
प्रमृजेद्वामहस्तेन शेफं संगृह्य बुद्धिमान् १४
दक्षिणेन मृदं ग्राह्य संप्रविश्य जलाशयम्
तीरं प्रक्षाळ्य तद्देशे मृदं क्षिप्त्वाथशर्कराम् १५
तृणमूल्यादिकान्त्यक्त्वा जलेनार्द्रीं कृतान्तुताम्
आमलीफलमात्रेण सव्येनादाय वामके १६
निक्षिप्य वामहस्तेन घर्षयेत्तु पुनःपुनः
जलन्नीत्वा तु सव्येन सप्तापाने करेनव १७
मृदाशोद्धय गृहस्थस्य द्विगुणं ब्रह्मचारिणाम्
गृहस्थत्रिगुणं ज्ञेयं यतीनान्तु चतुर्गुणम् १८

यावन्मात्रं मनश्शुद्धिस्तावच्छौचं विधीयते
वामे तराणां यज्ञन्तु कृत्वा चैवोत्तराननम् १९
दन्तानन्तर्बहिश्शोद्धय दन्तकाष्ठैस्तु घर्षयेत्
करञ्जरी च बिल्वात्थं खादिरञ्चार्जुनन्तथा २०
अपामार्गञ्च बुत्बूरं वटप्लक्षञ्च केशरम्
अम्रैर्जंबुपलाशैर्वा निंबेन दन्तधावनम् २१
संगृह्य दन्तकाष्ठन्तु कनिष्ठांगुलिनाहकम्
वस्वंगुलन्तु दैर्घ्यं स्याद्दन्तधावनमाचरेत् २२
प्राङ्मुखो वाथ पादौ च हस्तौ प्रक्षाळ्य तन्मुखम्
वामपादञ्जले स्थित्वा स्थले दक्षिणपादकम् २३
जानुमद्धयकरोभूत्वा हस्ते गोकर्णवत्कृते
माषमग्नजलं ग्राह्य निर्दोषं त्रिःपिबेत् बुधः २४
आस्यं द्विःप्रमृजेदस्त्रं सकृत्मृज्यमुखं शनैः
पादावभ्युद्धयमूर्द्धानमंगुष्ठानामिकेन तु २५
चक्षुषिसंस्पृशेद्विद्वान् तर्जन्यंगुष्ठकेन तु
नासिद्वारपुटौ स्पृष्ट्वा कनिष्ठांगुष्ठकेन तु २६
श्रोत्रौ स्पृष्ट्वा जलोपेतम्मद्धयांगुष्ठेन बाहुकौ
नाभिमंगुष्ठकेनैव सर्वांगुल्यग्रपिण्डितम् २७
हृत्प्रदेशन्तु संस्पृश्य सर्वांगुल्यग्रमूर्द्धनि
ऋग्यजुस्सामवेदानां त्रिःपानं तृप्तिरिष्यते २८
आस्यद्विमार्जनादत्राप्यथर्वेदेतिहासयोः
सकृन्मार्जनाद्वक्त्रस्य गणेशस्य प्रियं भवेत् २९
पाच्छिरोभ्युक्षणेनैव ऋषीणान्तु प्रियं भवेत्
नयनस्पर्शनेनैव प्रियं स्यात्सोमसूर्ययोः ३०
नासिका स्पर्शनेनैवाप्यश्विन्योस्तु प्रियं भवेत्
श्रोत्रसंस्पर्शनेनैव दिशाप्रीतिकरं भवेत् ३१

इन्द्रविरणवनलानाञ्च बाहुनाभिहृदस्पृशात्
मूर्ध्निसंस्पर्शनेनैव शिवप्रीतिकरं भवेत् ३२
क्षुधे च कफजाते च सद्यश्चाचमनं कुरु
स्पर्शयित्वा ततश्श्रोत्रमंगुष्ठेनास्यकम्मृजेत् ३३
आचम्येवंविधानेन स्नानार्त्थाय मृदं पुनः
शुद्धिं संग्राह्यतीरे तु त्रिधा कृत्वा तु शोधिताम् ३४
प्राक्पिरडम्मूलमन्त्रेण याम्यपिरडं हृदा तथा
अघोरेणैव मन्त्रेणाप्युत्तरञ्चाभिमन्त्रयेत् ३५
अस्त्रेण प्रक्षिपेद्दिक्षु दशस्वपि यथाक्रमम्
याम्यपिरडं समादाय स्वांगमालिप्य मन्त्रवित् ३६
मूर्द्धानं वक्त्रहृदये गुह्यं पादौ तु भागशः
हृदयेनास्त्रमन्त्रेण सर्वांगानि स्पृशेत्क्रमात् ३७
सौम्यपिरडं क्षिपेदप्सु बाहुभ्रमणकान्तरे
अवगाह्य जले तत्र मूलमन्त्रमनुस्मरन् ३८
स्नायाद्राजोपचारैस्तु रजन्यामलकादिभिः
स्वसूत्रोदितमार्गेण सन्ध्योपस्थानमाचरेत् ३९
जप्त्वा ब्रह्मषडंगानि तीर्त्थं संग्राह्य चात्मनि
जलादुत्तीर्य तद्वस्त्रमात्रं त्यक्त्वा समाहितः ४०
देवानृषीन्पितॄंश्चैव वामाघोरकसद्यकैः
कनिष्ठांगुष्ठमूलाभ्यां देवांस्तर्प्योदपुष्पयुक् ४१
कंगुळ्यग्रेण हस्ताभ्यां मुनीन्तर्प्यकुशैस्तथा
कनिष्ठांगुलिमूलाभ्यां मनुष्याणां तथैव च ४२
यज्ञं कृत्वापसव्यन्तु जलैस्तु तिलमिश्रकैः
दक्षिणांगुष्ठतर्जन्योर्मूलेनैव पितृनपि ४३
प्रत्येकमेकविंशद्भिस्संख्याभिस्तर्पयेद्गुरुम्
आचम्यपुनराचम्यपुष्पहस्तो विशेत् गृहम् ४४

वारुणं स्नानमाख्यातं भस्मस्नानमथ शृणु
सर्वतीर्थेषु यत्पुण्यं सर्वयज्ञेषु यत्फलम् ४५
तत्फलं कोटिगुणितं भस्मस्नानाच्च सिद्धयति
श्रीकरञ्च पवित्रञ्च हारमाभरणं तथा ४६
लोकवश्यकरं पुण्यं भस्मस्नानं दिनेदिने
ज्वरापस्मारपैशाचब्रह्मराक्षसनाशकृत् ४७
भुक्तिदम्मुक्तिदं दिव्यं साक्षात्कैवल्यदायकम्
गंगास्नानसहस्रन्तु मन्त्रस्नानं सदक्षिणम् ४८
विभूतेरणुमात्रेण सर्वस्नानफलं भवेत्
निष्कद्वयन्तथानिष्कं निष्कार्द्धकमथापि वा ४९
भस्मस्नानार्थमुद्दिष्टं पापनिर्हरणक्षमम्
भस्मदेवाकृतिं वक्ष्ये विशेषेण महेश्वरम् ५०
त्रिणेत्रं त्रिशिरं रौद्रं त्रिहस्तं गुणवक्त्रकम्
त्रिपादं वह्निनयनं भस्मकुण्ठितविग्रहम् ५१
ताण्डवाडंबरं भीमं रक्तपुष्पोपशोभितम्
रक्षामन्त्रेश्वरं देवं ध्यात्वाशान्तिं लभेन्नरः ५२
कपिलागोमयं ग्राह्यमथवासितगोमयम्
भूमौ वा पतितं तेन पिण्डम्मूलेन कारयेत् ५३
संशोद्धय सद्यमन्त्रेण वामदेवेन पाचयेत्
अघोरेणैव मन्त्रेणाप्यग्निहोत्रेऽथवा पुनः ५४
मृत्पात्रे लाबुपात्रे वा नीत्वा तु बहुरूपिणा
प्रक्षाळ्यपाणिपादौ चाप्याचम्य पुनराचरेत् ५५
सकृत् जप्त्वा तु मन्त्राणि भस्मोद्धूळनकं कुरु
उद्धूळने त्वशक्तश्चेत्त्रिपुंड्रं सर्वसन्धिषु ५६
त्रिपुंड्रं भस्मना कृत्वा सार्द्रेण धवळेन च
यथा गंगाजलं शुद्धं तथा भस्मापि पावनम् ५७

भासयत्यखिलं ज्ञानं नित्यं भासयते च यत्
भक्षणात्सर्वपापघ्नं भस्मेति परिगीयते ५८
भस्मस्नानविहीनस्तु शिवपूजान्न कारयेत्
भस्मस्नानं पुरा कृत्वा शिवपूजां समाचरेत् ५९
विप्राणां क्षत्रियाणाञ्च मूलादिचरणान्तकम्
विशान्तु शूद्रजातीनां नाभ्यन्तं परिकीर्तितम् ६०
अन्येषां सर्वजातीनां भस्मस्नानं विनाचरेत्
उद्धूळने त्वशक्तश्चेत्त्रिपुंड्रादीनि धारयेत् ६१
षडंगुलप्रमाणेन ब्रांहणानां त्रिपुंड्रकम्
नृपाणां चतुरंगुल्यं वैश्यानान्तु त्रयंगुलम् ६२
शूद्राणां द्विरंगुलं प्रोक्तं स्त्रीणामेकाङ्गुलं भवेत्
अनुलोमादिसर्वेषां त्रिपुंड्रं पितृवत् ६३
त्रिपुंड्रञ्चैव विप्राणां वर्तुळं नृपवैश्ययोः
अर्द्धचंद्रन्तु शूद्राणामन्येषामूर्ध्वपुंड्रकम् ६४
भस्मवामकरे स्थाप्य दक्षिणेनाभिमन्त्रयेत्
मद्ध्यांगुलिजलैर्युक्तमपरे जलवर्जितम् ६५
त्रिपुंड्रं विधिनाधार्यं सर्वदोषनिकृन्तनम्
ब्रह्माविष्णुर्महेशश्च रेखात्रयमिति स्मृताः ६६
अधोब्रह्मा ततो विष्णुस्कन्धोर्ध्वे तु महेश्वरः
द्वात्रिंशत् सन्धिदेशेषु ह्यथवा षोडशेष्वपि ६७
अष्टसन्धिषु वा मंत्री त्रिपुंड्रं विधिना कुरु
मूर्द्धाललाटकर्णौ च चक्षुषीघ्राणकस्तथा ६८
आस्यंग्रीवा तथाप्यंसौ बाहुकूर्परके तथा
मणिबन्धौ च हृन्नाभि मेढ्रं पायुस्तथैव च ६९
ऊरू च जानुकौ चैव जंघे स्फिजौ तथैव च
पादद्वयं तथैव स्युः द्वात्रिंशत्सन्धयः क्रमात् ७०

प्रियं वै चाष्टमूर्तीनां विद्येशानां भवादिनाम्
दिक्पालानां वसूनाञ्च मूर्द्धादिपरिकल्पयेत् ७१
ग्रीवाललाटमंसौ च बाहू च कूर्परे तथा
हृदयं जठरञ्चैव पार्श्वे च मणिबन्धकौ ७२
नाभिपृष्ठञ्च विज्ञेयास्सन्धयः षोडशक्रमात्
शिरोललाटकर्णञ्च बाहू च हृदयन्तथा ७३
नाभिः पृष्ठमिति ज्ञेयास्त्वष्टौ वै सन्धयः क्रमात्
शिरोललाटहृन्नाभि पादानि पञ्चसन्धयः ७४
शिरईशानमन्त्रेण पुरुषेण मुखन्तथा
हृत्प्रदेशमघोरेण गुह्यं वै वाममन्त्रतः ७५
सद्यो जातं न्यसेत्पादे सर्वांगं प्रणवेन तु
शिवादिपञ्चमूर्तीनां वामादीनां तथैव च ७६
अश्विन्योस्तु प्रियं ज्ञेयं मूर्द्धादिपरिकल्पयेत्
क्रमेण ब्रांहणानाञ्च देवतानां प्रियं भवेत् ७७
पञ्चांगुलेन मूर्ध्नि स्यात्प्रासादेन तु मन्त्रतः
ललाटे तु त्रयंगुल्यं शिरोमन्त्रेण देशिकः ७८
सद्येन दक्षकर्णौ तु वामदेवेन वामतः
अघोरेण तु कर्णौ च मद्धयांगुल्येन संस्पृशेत् ७९
हृदये हृदयेनैवाप्यंगुल्यैस्त्रिभिरेव च
विन्यस्य दक्षिणे बाहौ शिखामंत्रेण देशिकः ८०
वामबाहौ न्यसेद्धीमान् कवचेन त्रयंगुलम्
संस्पृश्य नाभावीशेन कारयेत्तु विचक्षणः ८१
शिरस्थाने स्वयं ब्रह्मा ललाटेस्कन्द एव च
कर्णे भुजंग एवोक्तं बाहुयुग्मे च केशवम् ८२
हृदये चैश्वरः प्रोक्तो नाभौ चैव प्रजापतिः
जानुनोरश्वनीदेवौ पादाभ्यां पन्नगस्तथा ८३

भस्मालेपनमात्रेण स्वस्था मद्धया भवन्ति हि
भस्मस्नानं जलस्नानात्पुण्यं कोटिगुणाधिकम् ८४
निद्धिपेन्मूलमन्त्रेण सर्वज्ञानार्हको भवेत्
भस्मस्नानं समाख्यातम्माहेंद्रस्नानमुच्यते ८५
आदित्यरश्मिसंबन्धं वृष्टीनां यत्र संभवेत्
पदसप्तोत्तरे गम्य मूलमन्त्रमनुस्मरन् ८६
वर्तमानेर्करश्मिश्च वृष्टौ सततमिष्यते
प्राङ्मुखश्चोद्धर्वबाहुश्च वामे सव्येतरे स्थिता ८७
वामपादाग्रविन्यस्य सव्यपादैकमूलके
मूलमन्त्रं जपित्वाथ यावद्वै पदसप्तकम् ८८
आदित्याभिमुखःपश्चात्तन्नमस्कृत्य बुद्धिमान्
एवं कृते महापापान्मुच्यते नात्र संशयः ८९
स्नानम्माहेंद्रमित्युक्तं मारुतं त्वधुना श्रुणु
पूर्वाह्ने वा पराह्ने वा रजसागोद्धते न तु ९०
अभिषिक्तस्तदा मंत्री मूलमन्त्रमनुस्मरन्
मारुतस्नानमित्युक्तं मंत्रस्नानं ततः श्रुणु ९१
मंत्रस्नानन्तदेतेषां सर्वपापनिकृन्तनम्
मारुतस्नानमन्त्रे तु प्रद्माळ्यजानुपादयोः ९२
प्रद्माळ्यपादावाचाम्य पात्रे द्धिप्त्वा जलन्तथा
व्योमव्यापि पदैश्चैव षडंगैर्ब्रह्मपञ्चकैः ९३
मूलेनैव तु तत्तोयमभिमंत्र्य सकृत्सकृत्
संस्पृशेत्तेन तोयेन मूलमंत्रेण वर्मणा ९४
मूर्द्धादिपादपर्यन्तं त्रिधा संस्पर्शयेत्ततः
मंत्रस्नानं समाख्यातं सर्वपापद्मयो भवेत् ९५
सर्वव्याधिविनिर्मुक्तिस्सर्वसिद्धिकरं परम्
वारुणं भस्ममाहेंद्रम्मारुतम्मंत्रसंज्ञकम् ९६

एवं पञ्चविधं स्नानं सर्वकार्येषु पूजितम् ९७

इति स्नानविधिपटल एकोनत्रिंशतिः

नित्यार्चनविधिपटलप्रारंभः

वक्ष्ये नित्यार्चनं पुण्यं शुभदं पापनाशनम्
महापातकदोषघ्नं सर्वयज्ञफलप्रदम् १
आत्मार्थञ्च परार्थञ्च पूजा द्विविधमुच्यते
दत्ते च गुरुणा लिंगे स्थण्डिले स्वयमात्मनि २
क्षणिके मण्डले तोयेऽप्यात्मार्थयजनं स्मृतम्
मण्डले तु शतं पुण्यं स्थण्डिले तु सहस्रकम् ३
अयुतं कौतुके लिंगे कोटिकोटिगुणं भवेत्
शैलजं रत्नजञ्चैव लोहजन्दारुजन्तथा ४
मृण्मयं क्षणिकञ्चैव षड्विधं लिंगमुच्यते
सिकतन्तण्डुलञ्चान्नन्नदीमृत्गोमयन्तथा ५
नवनीतञ्चरुद्राक्षं भस्मचन्दनकूर्चकम्
पुष्पमालागुळञ्चैव क्षणिकं द्वादशं भवेत् ६
मानसान्मण्डलं श्रेष्ठम्मण्डलात्क्षणिकं परम्
क्षणिकात्फलमुत्कृष्टं पटञ्चैव ततः परम् ७
पटादाभासमुत्कृष्टमाभासात् बिंबमुच्यते
बिंबाद्वै लिंगमुत्कृष्टं लिंगाद्वै निष्कळं परम् ८
सर्वयज्ञतपोदानतीर्थदेशेषु यत्फलम्
तत्फलं कोटिगुणितं शिवलिंगार्चनात्फलम् ९
सर्वेषां रक्षणार्थाय ग्रामादिषु विशेषतः
स्थापितं विधिना लिंगं सुरैर्वा मुनिभिर्नरैः १०
स्वयमुद्भूतलिंगञ्च प्रतिमाञ्चेश्वरात्मकम्
तत्परार्थं समाख्यातं सर्वेषामात्मनः फलम् ११

सर्वेषामात्मरक्षार्थमिष्टलिंगार्चनं गृहे
आत्मार्थमिति विख्यातं परार्थञ्च ततश्शृणु १२
स्वयंभूर्दैविकश्चैव दिव्यमानुषमार्षकम्
राक्षसं बाणलिंगञ्च सप्तैते लिंगमुच्यते १३
स्वयंभूः स्वयमुत्पन्नं देव्यर्चनन्तु दैविकम्
दिव्यं देवार्चनञ्चैव ऋषिपूजितमार्षकम् १४
मानुषैः स्थापितं लिंगं मानुषं परिकीर्तितम्
असुरैः राक्षसैः पूज्यमासुरं राक्षसं भवेत् १५
बाणनामजलं प्रोक्तं तज्जातं बाणलिंगकम्
बाणेन पूजितं लिंगं बाणलिंगमिहोच्यते १६
विप्रक्षत्रियविट्शूद्रादीक्षिताश्च प्रवेशताः
आत्मार्थयजनं कुर्यात् न कुर्याच्छपरार्थकम् १७
आत्मार्थञ्च परार्थञ्च स्वादिशैवेन पूजितम्
आदिशैव इति प्राक्तस्सशिवब्राह्मणो गुरुः १८
शिवोद्भवन्तु शैवं स्याच्छैवोद्भवस्सदाशिवः
सदाशिवात्तु संभूता शिवसृष्टिरुदाहृता १९
शिवेनस्थापितं शैवं शैवेन स्थापितं शिवम्
शिवशैवविशुद्धात्मा शिवब्राह्मण इष्यते २०
चतुर्वेदाधिकारित्वाच्छवसिद्धान्तपारगः
चातुर्वर्णाधिकारत्वादादिशैव इति स्मृतः २१
आदिशैवश्शिवो रुद्रो शुद्धात्मा शुद्धशैवकः
तस्माच्छैवः प्रकर्तव्यं प्रतिष्ठामुत्सवान्तकम् २२
उत्सवादिप्रायश्चित्तमादिशैवेन कारयेत्
आगमोक्तप्रकारेण प्रतिष्ठालिंगपूजनम् २३
आदिशैवस्य पूजा च सर्वसिद्धिकरी स्मृता
अन्यविप्रस्पृशेनैव सर्वैर्देवलको भवेत् २४

यदि मोहेन कुर्वीत राज्ञो राष्ट्रस्य दुस्थितिः
कोपी मलिनधारी तु शिवं स्पृशति यो द्विजः २५
स एकविंशति कुलं सोद्धयन्नरकं व्रजेत्
कौशिकः काश्यपश्चैव भारद्वाजोऽथ गौतमः २६
अगस्त्यश्चैव पञ्चैते पञ्चवक्त्रेषु दीक्षिताः
तेषां वंशेषुसञ्जाताश्शिवब्राह्मणनामकाः २७
विन्ध्याद्रेर्दक्षिणे देशे शैवोत्पत्तिः प्रकीर्तिता
कौशिकाद्याश्च ऋषयो प्यादिशैवाः प्रकीर्तिताः २८
शुद्धैश्शिवद्विजैर्मुख्यैस्सदाचारसमन्वितैः
रुद्रभद्रसमायुक्तैर्वेदवेदांगपारगैः २९
एतैरधिष्ठितं विन्ध्यगिरेर्दक्षिणभूमिका
शैवन्तु द्विविधं ज्ञेयं कलाकलविभेदतः ३०
कलं वै शिवगर्भं स्यादकलं ऋषिगर्भकम्
प्रतिष्ठास्थापनन्नित्यपूजनं प्रोक्षणन्तथा ३१
उत्सवादीनिसर्वाणि काम्यकर्माणि यानि च
तानि सर्वाणि कार्याणि कलेन तु विशेषतः ३२
शास्त्रार्चनं रुद्रबिंबपूजनञ्चान्यपूजनम्
स्वेष्टलिंगार्चनं ग्रामदेवताराधनन्तथा ३३
अकलेन प्रकर्तव्यं शैवतन्त्रानुसारिणा
नित्यन्नैमित्तिकं काम्यं वर्जनीयं परार्थके ३४
कर्षणादिप्रतिष्ठान्तमादिशैवेन कारयेत्
---------- ३५
सदाशिवाख्यस्य शिवस्य वक्त्रे ये दीक्षिताः कौशिककाश्यपाद्याः
तेषाम्मुनीनां विधिवत्क्रमेण जाताश्शिवब्राह्मणनामधेयाः ३६
अनादिशैवस्सशिवस्त्वादिशैवश्शिवद्विजः
महाशैवन्तु विप्राणामनुशैवन्तु भूभुजाम् ३७

अवान्तरन्तु शूद्राणां पञ्चशैवोद्भवं क्रमात्
सर्वेषां भस्मधारीणां शैवं सर्वसमुच्चयम् ३८
आदौ येन शिवेनैव नियुक्तोऽपि शिवाद्भवरे
आदावनादिशैवेन दीक्षितस्त्वादिशैवकः ३९
शिवमुत्पद्यशैवं हि शैवेनोत्पद्यते शिवः
शिवशैवैक्यरूपत्वाच्छिवब्राह्मण उच्यते ४०
इति नित्यं षडाधारन्ततः पूज्योदिवाकरः
विनासूर्यार्चनं कर्म ततो निष्फलतां व्रजेत् ४१
सौवर्णेन कृतं लिंगं भुक्तिमुक्तिप्रदं भवेत्
ताम्रजंपुत्रदं प्रोक्तं रंजताश्रीकरं भवेत् ४२
सुखदं कांसमित्युक्तं पैत्तळं रोगनाशनम्
आयसं पुत्रनाशन्तु त्रिलोहम्मरणं भवेत् ४३
तस्माद्वै सर्वजातीनां बाणमेवोत्तमोत्तमम्
क्षुद्रं भद्रं द्विधा प्रोक्तं क्षुद्रमात्मार्द्धपूजनम् ४४
भद्रं परार्त्थमित्युक्तं ग्रामादौ स्थापनं हितम्
आत्मशुद्धिस्तु पूर्वं स्यात्स्थानशुद्धिर्द्वितीयकम् ४५
तृतीयं द्रव्यशुद्धिस्स्यात् चतुर्त्थं लिंगशोधनम्
पञ्चमं मन्त्रशुद्धिस्स्यादित्येताः पञ्चशुद्धयः ४६
विधिना स्नानकं कृत्वा देहशुद्धिरतः परम्
पादप्रक्षाळनं कृत्वा समाचम्यविधानतः ४७
द्वाराग्रमंटपं गत्वा पूजकस्तु सुखासनः
शास्त्रोक्तदहनं भस्मदेशिको धारयेत्क्रमात् ४८
अद्भूळने त्वशक्तश्चेत्त्रिपुंड्रं सर्वसन्धिषु
द्वात्रिंशत्सन्थिदेशेवाप्यथवा षोडशेष्वपि ४९
अष्टसंधिषु वापञ्च स्थाने धार्यं त्रिपुंड्रकम्
संध्यग्रे च निशीथे च शय्यापूर्वा वसानयोः ५०

हुत्वा भुक्त्वा पयः पीत्वा कृत्वा चावश्यकादिभिः
स्त्रीपुन्नपुंसकं शूद्रं बिडालं बकमूषिकम् ५१
स्पृष्ट्वा यथा विधावन्ते चाग्नेयस्नानमाचरेत्
देवाग्निगुरुविद्यानां समीपे यदि दर्शने ५२
अशुद्धभूतले मार्गे कुर्यान्नोद्धूळनं व्रती
भस्मवामकरे स्थाप्य दक्षिणेनाभिमन्त्रयेत् ५३
मद्धयांगुल्याजलैर्युक्तमपरैर्जलवर्जितम्
हस्तौ संशोद्धय चास्त्रेण सर्वांगं धारयेत्क्रमात् ५४
मूर्ध्नि चैव ललाटे च हृदये गुह्यपादयोः
कर्णे चांसद्वये बाहौ कूर्परे मणिबन्धके ५५
पृष्ठे च पार्श्वयोश्चैव सर्वांगं धारयेत्क्रमात्
पञ्चांगुलेन मूर्ध्नि स्यात् प्रासादेन तु मन्त्रितः ५६
ललाटे च त्रयंगुल्यात्वीशतत्पुरुषेण तु
वक्षस्य घोरमन्त्रेण वाममंत्रेण गुह्यके ५७
सद्योजातेन पादाभ्यां हृदये हृदयं भवेत्
शिरोमंत्रेण करठे च शिखामन्त्रेण हस्तयोः ५८
कूर्परे कवचेनैव मणिबन्धे च नेत्रतः
सर्वांगमस्त्रमंत्रेण धृत्वा संप्रोक्षयेत्ततः ५९
ब्रह्माविष्णुर्महेशश्च त्रयोरेखा इति स्मृताः
अधो ब्रह्मा ततो विष्णुस्तदूर्ध्वे तु महेश्वरः ६०
त्रिपुंड्र द्वयरंध्रेषु मद्धये च्छिद्रं प्रयत्नतः
षणमुखश्च गणेशश्च द्विरेखा त्वधिदेवताः ६१
ललाटे हृदिबाह्वोश्च दैर्घ्यकन्तु षडंगुलम्
शेषमेकांगुलं प्रोक्तं त्रिपुंड्रं धारयेत्क्रमात् ६२
ऊर्ध्वपुंड्रमनायुष्यं दीर्घपुंड्रं तपः क्षयम्
नेत्रयुग्मान्तमानेन धारयेत् भसितं क्रमात् ६३

द्विकालं जलसम्मिश्रं त्रिपुंड्रं धारयेत् द्विजः
विधूयसर्वपापानि सर्वकर्मार्हको भवेत् ६४
द्विकालमेककालं वा भसितं जलमिश्रकम्
त्रिपुंड्रधारणं कुर्यात्सर्वपापच्युतो भवेत् ६५
उत्तराभिमुखो भूत्वा रुचिरासनसंस्थितः
पद्मञ्च स्वस्तिकञ्चैव गोमुखं विशदन्तथा ६६
सूचितञ्चैकपादन्तु कुक्कुटं वीरमेव च
भद्रासनं तथाज्ञेयं कूर्मं विमलमेव च ६७
दण्डपिण्डञ्च गोकर्णं सिंहासनमतः परम्
वृत्तञ्च घटिकञ्चैव गजास्य गजकर्णिकम् ६८
आसनं विंशतिः प्रोक्तं श्रेष्ठं स्थिरसुखासनम्
ऊरुजानुद्वयञ्चैव पादाग्रञ्चैव संपुटम् ६९
ईषन्नासाग्रदृष्टिस्तु देहदीर्घन्तु तम्मृजुः
रुचिरासनमाख्यातं सर्वकार्येषु पूजितम् ७०
गोमुखं स्वस्तिकञ्चैव पद्मञ्चैवार्द्धचंद्रकम्
वीरं योगासनञ्चैव षड्विधञ्चासनोत्तमम् ७१
वामजानूपरिन्यस्त्वा दक्षिणञ्जानुमण्डलम्
द्वयोः पादतले चैव विन्यसेत्पार्श्वपृष्ठयोः ७२
एवं कृत्वा तु सुस्निग्धं गोमुखं विशदं स्मृतम्
ऊरुपार्श्वतले न्यस्त्वा जंघामग्रन्तु स्वस्तिकम् ७३
ऊरुपार्श्वतले न्यस्त्वा पद्मासनमिहोच्यते
ऊरुपरितले न्यस्त्वा द्वयोः पादतलेषु च ७४
गुल्फद्वयसमं कृत्वा तलौ जंघेन विन्यसेत्
अर्द्धचंद्रं समाख्यातं वीरासनमथ श्रुणु ७५
लंबितन्दक्षिणं पादं वामन्दक्षिणतोपरि
ततो वीरासनं प्रोक्तं योगासनमथ श्रुणु ७६

शरीरं जानुसंबन्धं योगपट्टिकयावृतम्
कूर्परौ चैव विन्यस्तौ योगासनमिहोच्यते ७७
दशदिग्बन्धवास्त्रमंत्रेण दिशिरेचनमारभेत्
कूर्मन्दर्भन्तथाचर्मकंबळं पीठमेव च ७८
आविकं त्वक्जसूत्रोत्थं रुचिरञ्चासनन्तथा
सर्वकर्मार्हकं प्रोक्तं पवित्रमिदमासनम् ७९
प्राणायामत्रयं कृत्वा प्रत्येकन्दशमात्रकम्
अपाने जिह्वति प्राणं प्राणात्प्राणमयन्ततः ८०
प्राणापानसमायोगात्प्राणायामेति चोच्यते
रेचकं पूरकञ्चैव कुंभकन्तु तृतीयकम् ८१
रेचनात् रेचकं प्रोक्तं पूरणात्पूरकन्तथा
कुंभकन्तु निरोधेन प्रणवेन न्यसेत्त्रयम् ८२
रेचकं ब्रह्मदैवत्यं पूरकं विष्णुदैवतम्
कुंभकं रुद्रदैवत्यमधिदेवाः प्रकीर्तिताः ८३
अकारश्च उकारश्च मकारो बिन्दुरेव च
संयोगं बिन्दुनादाभ्यां प्राणायाममिदं विदुः ८४
उकारं सोमरूपन्तु पूरकादित्यसंख्यया
मकारस्यार्करूपन्तु कलासंज्ञस्य कुंभकम् ८५
अकारस्याग्निरूपन्तु वायुसंख्यस्य रेचकम्
प्रथमं वामनास्येन द्वितीयं सव्यनासिका ८६
पुनस्तृतीयं वामेन प्राणायामकृतन्तथा
औदरं वायुमंगुल्या नासिकां पीडयरेचयेत् ८७
दूतिवत्पूरयेत्सम्यक् जठरे बाह्यवायुना
पूरकन्तु समाख्यातं पश्चात्कुंभकमुच्यते ८८
अन्तर्बहिस्थितं वायुन्नगृह्णातिनमुञ्चति
पूर्णकुंभसमं यस्मात्तस्मात्कुंभकमुच्यते ८९

प्राणायामात्परं पुण्यन्न भूतन्न भविविष्यति
रेचकादित्रयं प्रोक्तं सर्वदोषनिकृन्तनम् ९०
गुरुप्रसादात्संलभ्यमन्यधानोपलभ्यते
पूरकं कर्मविच्छेदं कुंभकञ्चात्मबन्धनम् ९१
रेचकं कर्मनाशं स्यात्प्राणायामकृतन्तथा
अनामिकाकनिष्ठे द्वे प्यंगुष्ठञ्च तृतीयकम् ९२
नासापुटन्ततो बद्ध्वा प्राणायामस्य लक्षणम्
गंगा च दक्षिणे कर्णे नासिकाग्रे हुताशनम् ९३
उभयोः स्पृर्शनादेव सर्वपापैः प्रमुच्यते
पादादिजानुपर्यन्तं पृथिवी स्थानमुच्यते ९४
अंभस्थानन्तु नाभ्यन्तं वह्निस्थानं गळान्तकम्
वायुस्थानं ललाटान्तन्तदूद्ध्वं द्वादशांगुलम् ९५
आकाशस्थानमित्युक्तं मूर्द्धादिस्थानमुच्यते
तालमात्रं ललाटोद्ध्वं वितस्ति द्वादशांगुलम् ९६
शिवस्थानमिदं गुह्यं प्रमाणं गदितं मया
तालमात्रादधस्तात्तु भ्रूमद्धये ज्योतिरूपकम् ९७
विशुद्धं व्योमनिलयं बिन्दुस्थानमुदाहृतम्
बिन्दुस्थानं समाख्यातमूर्वादिस्थानपञ्चकम् ९८
चतुरश्रार्द्धचंद्रञ्च त्रिकोणञ्च षडश्रकम्
सुवृत्तञ्च पृथिव्यादिमण्डलाकृतयः क्रमात् ९९
सुखदुःखस्य चरितं विसर्जनञ्च मैथुनम्
अन्येषु भूतवर्गस्स्यात् भूतात्मागुणतावहम् १००
इत्थमात्मन इत्युकं पूजाकालेषु दुर्लभम्
अकारमात्मासंप्रोक्तमन्तरात्मात्विकारकम् १०१
ओंकारं परमात्मा तु तत्वात्मा वै ह्युकारकम्
एकारं सर्वभूतात्मा तेषां वर्णं प्रकीर्तितम् १०२

भूतात्मा योजयेद्विद्वानन्तरात्मा दहेत्पुनः
तत्वा त्मात्वमृतं पूर्यशुद्धात्माप्यानयेत्पुनः १०३
शिखाग्रे व्योमगे शुद्धे शिवतत्वे नियोजयेत्
कृत्वा कायन्दहेत्पश्चात्यान्तेनैव त्रिकोणके १०४
पादांगुष्ठात्समारभ्य दहेद्यावच्छिरोन्तकम्
ज्वालामालासमाक्रान्तं शरीरन्दग्धरज्जुवत् १०५
प्रक्रियान्तस्थममृतं स्त्रवन्तञ्चिन्तयेत्सदा
प्रणवं श्वेतकमलं योगपीठमथो मुखम् १०६
चिन्तयेदमृतन्तस्मिन्सुषुम्नाभिन्नमस्तकम्
आपूर्यान्तस्ततो द्ध्यायेदात्मानममृतेन च १०७
आत्मानमानयेद्धीमानेषा शिवतनुः क्रमात्
शिखाग्रेद्वादशांगुल्य वीणादण्डस्य पार्श्वयोः १०८
सुषुम्ना मद्ध्यगः प्राणमद्ध्येषु सुषिरन्तथा
जीवप्राणसमायुक्तं तेषु मद्ध्येषु सञ्चरेत् १०९
सञ्चारे त्रिषु तत्काले आधारेषु च संस्थिताः
आधेयवान्प्रयुक्तञ्च समाधिक्लेशमाश्रितम् ११०
इडा च पिंगळा चैव वीणादण्डस्य पार्श्वयोः
मूलाधारे स्मरेदग्निं चंद्रसूर्यसमन्वितम् १११
कुण्डल्यन्तु विधातारन्नाभौ विष्णुरुदाहृतम्
हृदये केवलं रुद्रं कण्ठमूले महेश्वरम् ११२
जिह्वामूले च नादाख्यन्नासाग्रे बिन्दुरेव च
नादाख्यन्तु भ्रुवोर्मद्ध्ये ललाटे शक्तिसंज्ञिकम् ११३
ब्रह्मरन्ध्रे शिवं विद्यादूद्ध्वे नृत्तं विचिन्तयेत्
द्वादशान्तात्परो यस्मादतिसूक्ष्मस्थितो विदुः ११४
आनन्दनृत्तकस्साक्षात् देवदेवो जगद्गुरुः
शुक्लशोणितयोर्मद्ध्ये बिन्दुरूपं परात्परम् ११५

तस्य मद्धये गतं प्राणो बिन्दुनादात्मकं शिवम्
एवं कृत्वा विधानेनाप्यथवान्यक्रमं श्रुणु ११६
गुदस्य पृष्ठभागे तु तदूद्ध्वें तु द्वयांगुलम्
वीणादण्डस्य संबन्धात्कदंबदळपद्मकम् ११७
मूलाधारे स्मरेच्चैव चंद्रसूर्यसमन्वितम्
तस्य मद्धये तु संबन्धाच्छिवाग्निं परमाणुकम् ११८
रूपमद्धये स्थितो वायुर्वायुमद्धये स्थितं मनः
मनो मद्धये स्थितो नादं नादमद्धयस्थितोद्ध्वनिः ११९
ध्वनिमद्धये स्थितो नादो नादमद्धये स्थितश्शिवः
शिवमद्धये गतं शान्तं शान्यतीतात्परात्परम् १२०
परात्परपरन्देवमित्येते शिवभावना
प्रथमन्तु करन्यासमंगन्यासमतः परम् १२१
शोधयेदस्त्रमंत्रेण तलिकौ हस्तपृष्ठकौ
अस्त्रेण हुंफडन्तेन द्विर्वामं शोधयेत्करम् १२२
तेन मंत्रेण सव्यन्तु ऊद्ध्वर्वाधश्शोधयेत्त्रिधा
गन्धलिप्तकरौ कृत्वा शिवहस्तप्रकल्पनम् १२३
वामहस्ते जलं स्थाप्य वह्निहस्तन्तु दक्षिणम्
अग्निर्मलस्थशोधेन करन्यासं समाचरेत् १२४
अंगुल्यष्टदळंबद्मंगुष्ठद्वयकर्णिकम्
द्धयायेत्तत्रासनम्मूर्त्तिं शंभुन्तद्वयापकन्नयसेत् १२५
अंगुष्ठादिकनिष्ठान्तं सृष्टिन्यासमुदाहृतम्
कनिष्ठाद्यंगुष्ठकान्तं यत्संहारन्नयासमुच्यते १२६
ईशादिसद्यमंत्रान्तं सृष्टिन्यासमुदाहृतम्
सद्यादीशानपर्यन्तं संहारन्यासमुच्यते १२७
दक्षिणांगुष्ठमादि स्यात्कनिष्ठादीतरे ततः
दशबीजन्नयसेद्धीमान्स्थितिन्यासमतः परम् १२८

तर्ज्जन्यान्तन्तु मद्धयादि क्रमादंगानि विन्यसेत्
न्यसेद्धस्ततले नेत्रे तर्जन्यास्त्रन्नयसेत्क्रमात् १२९
शिवांगान्येवमेवं स्याच्छिवं पर्वणिपर्वणि
गृहस्थस्सृष्टिमार्गेण करन्यसन्तु कारयेत् १३०
वानप्रस्थयतीनान्तु संहारक्रममेव हि
अपत्नीकवनस्थानां संहारन्यासमुच्यते १३१
नैष्ठिके तु स्थितिन्यासं सर्वकार्येषु पूजितम्
करन्यासं समाख्यातमंगन्यासं ततश्शृणु १३२
मूर्द्धादिसृष्टिरत्रोक्तं पादादिस्संहृतिर्भवेत्
स्वमूर्ध्निविन्यसेदीशं वक्त्रेवक्त्रन्तु विन्यसेत् १३३
न्यस्त्वाघोरं हृदिस्थाने वामंगुह्ये तु विन्यसेत्
सद्यमंत्रौ न्यसेत्पादे ततस्त्वंगानि विन्यसेत् १३४
हृदयं हृदयेन्यस्य शिरश्शिरसि विन्यसेत्
शिखायान्तु शिखान्नयस्य कवचं स्तनमद्धयतः १३५
लोचने तु न्यसेन्नेत्रमस्त्रं अस्त्रप्रदेशके
अष्टत्रिंशत्कलान्यासं विधिनाकारयेत्ततः १३६
उत्सृज्य प्राकृतं भावं शिवोऽहमिति भावयेत्
एवं कृत्वा विशेषेणाप्यन्तर्यागं समाचरेत् १३७
नाभिचक्रं समाश्रित्य कारयेद्वह्निमण्डलम्
हृदये धारयेत्सोमं भ्रूमद्धयेरविमण्डलम् १३८
हृदये यजनं कुर्याद्धोमन्नाभौ प्रकल्पयेत्
तथेश्वरन्तु भ्रूमद्धये द्धयायेत्सर्वगतं प्रभुम् १३९
पञ्चावरणमार्गेण पूजयित्वाधिशेषतः
हृत्पद्मे चार्चयेन्नित्यं त्रिकालं वा द्विकालकम् १४०
अथवाप्येककालं वा संयजेनानसेन तु
आत्मशुद्धिरिति प्रोक्ता स्थानशुद्धिमतश्शृणु १४१

शिवाग्रे स्थण्डिलं कृत्वा हस्तमात्रन्तु देशिकः
आवाहयेत्ततो भूमिं सर्वाभरणभूषिताम् १४२
द्विभुजाञ्च द्विनेत्राञ्च करण्डमकुटान्विताम्
हेमयज्ञोपवीताढ्यां पीतनेत्रां सुयौवनाम् १४३
पीताभां पीतवस्त्राञ्च पुण्डरीकदळेक्षणाम्
कृताञ्जलिपुटोपेतां सनाळोत्पलधारिणीम् १४४
सुप्रसन्नां भूमिदेवीं सर्वावयवसुन्दरीम्
गन्धादिभिस्समभ्यर्च्य हृदयेनैव मन्त्रतः १४५
अस्त्रेणैव तु मन्त्रेण दिग्विरेचनमारभेत्
स्थानशुद्धिरिति प्रोक्ता द्रव्यशुद्धिन्ततश्शृणु १४६
शरावं पाद्यपात्रञ्च शंखमाचमनीयकम्
जलभाण्डं वर्द्धनीञ्च पुष्पपात्रार्घ्यपात्रकौ १४७
अस्त्रेण क्षाळयेद्धीमान्निरीक्ष्य हृदयेन तु
कवचेनावकुण्ठ्याथ तेनैवोन्मीलनं कुरु १४८
वर्द्धनीं शंखकेनैव पूरयेत्तु शिवांभसा
पञ्चब्रह्मषडंगानि तोयमद्ध्ये तु विन्यसेत् १४९
पिधायदक्षहस्तेन दशबीजन्नयसेत्ततः
दर्शयेल्लिंगमुद्रान्तु पद्ममुद्रां प्रदर्शयेत् १५०
पात्राणि च हृदाप्रोक्ष्य शंखतोयेन सर्वशः
क्षीरन्दधिघृतादींश्च गन्धं पुष्पञ्च धूपकम् १५१
वर्द्धनीतोयमादाय प्रोक्षयेत्पुरुषेण तु
द्रव्यशुद्धिर्भवेदेवं लिंगशुद्धिन्ततश्शृणु १५२
देवदेवन्नमस्कृत्य द्वारदेवान्प्रपूजयेत्
पतंगञ्च भुवंगञ्चाप्यूर्द्ध्वाधस्संप्रपूजयेत् १५३
पतंगोर्ध्वे गणेशञ्च तस्य वामे सरस्वतीम्
पतंगस्योर्द्ध्वमद्ध्ये तु महालक्ष्मीं यजेत् बुधः १५४

दक्षिणे तु भुवंगस्य गंगान्नंदीशमेव च
यमुनाञ्च महाकाळन्तस्य वामे तु पूजयेत् १५५
द्विभुजञ्च द्विनेत्रञ्च सर्वाभरणभूषितम्
रक्ताक्षं रक्तवर्णञ्च तद्वर्णांबरभूषितम् १५६
दक्षिणे तु शिरोन्यस्य पादमुत्तरतो दिशि
हृदिविन्यस्तहस्तञ्च पतंगद्वारिपूजयेत् १५७
पीतवर्णं द्विनेत्रञ्च भद्रकायं भयं करम्
पीतवस्त्रदधानञ्च करण्डमकुटोज्वलम् १५८
कृताञ्जलिपुटोपेतं भुवंगं भावयेदधः
भुवंगदक्षिणे पार्श्वे गणेशं विधिना यजेत् १५९
गजाननं त्रिणेत्रन्तु श्यामवर्णञ्चतुर्भुजम्
लड्डुकं परशुं वामे सव्ये दन्ताक्षमालिकाः १६०
नागयज्ञोपवीतञ्च लंबोष्ठन्तु गणाधिपम्
पतंगवामपार्श्वे तु पूजयेत्तु सरस्वनीम् १६१
चतुर्भुजां द्विनेत्राञ्च श्वेतवर्णां सलक्षणाम्
अक्षमालाञ्च सव्ये तु पुस्तकं वामहस्तके १६२
अभयं वरदोपेतामथवा वामहस्तके
गण्डिकां सव्यहस्ते तु पंकजं वापि धारयेत् १६३
सर्वलक्षणसंयुक्तां सर्वाभरणभूषिताम्
पतंगस्योर्ध्वमद्धये तु पद्ममद्धये च संस्थिताम् १६४
द्विभुजाञ्च द्विनेत्राञ्च सरत्नमकुटान्विताम्
पीतवर्णसमायुक्तां सर्वावयवसुन्दरीम् १६५
पंकजं दक्षिणे हस्ते श्रीफलं वामहस्तके
हस्तद्वयं द्विपार्श्वे तु सोर्ध्वहस्तयुतैवरैः १६६
घटैस्तस्यान्तु संयोज्याप्यभिषेकं समाचरेत्
दक्षिणे तु भुवंगस्य नन्दिनं रक्तवर्णकम् १६७

त्र्यक्षञ्चतुर्भुजोपेतमभयं वरदान्वितम्
उग्रतोमरशूलञ्चाप्यक्षमालासमन्वितम् १६८
तस्यैव वामपार्श्वे तु द्विनेत्रं द्विभुजन्तथा
गंगायाश्शुक्लवर्णन्तु मकरासनसंस्थितम् १६९
नीलोत्पलं सव्यहस्ते पूर्णकुंभन्तु वामके
चित्रवस्त्रसमायुक्तं सर्वाभरणभूषितम् १७०
द्वारस्य दक्षिणे गंगां नन्दिनं पूजयेद्बुधः
भुवंगवामपार्श्वे तु महाकाळं घनद्युतिम् १७१
चतुर्भुजं त्रिणेत्रञ्च कपालं शूलमेव च
दक्षिणे भयटंकञ्च वामे पाशसमावहम् १७२
जटामकुटसम्युक्तं नागयज्ञोपवीतकम्
तस्यैव दक्षिणे पार्श्वे यमुनाञ्चैव कल्पयेत् १७३
द्विभुजञ्च द्विनेत्रञ्च श्यामवर्णसमन्वितम्
कूर्मासनसमारूढं सर्वाभरणभूषितम् १७४
पूर्णकुंभन्तु वामे तु उत्पलं सव्यहस्तके
यमुनायास्वरूपन्तु सर्वावयवसंयुतम् १७५
विमलञ्च सुबाहुञ्च पूजयेत्तु कवाटयोः
पट्टिकास्कन्दमभ्यर्च्य वलये चंद्रभास्करौ १७६
सुषिरे नवशक्तिन्तु पूजयेद्देशिकोत्तमः
वृषभं पूजयेदग्रे गन्धपुष्पादिभिः क्रमात् १७७
अन्तर्मण्डलकञ्चैव प्रथमन्तु प्रकल्पयेत्
अन्तर्हारं द्वितीयन्तु मद्धयमर्या तृतीयकम् १७८
चतुर्त्थमद्धयमर्यादि महामर्यादि पञ्चकम्
पञ्चप्राकारमेवोक्तं प्राकारे बलिमाचरेत् १७९
गर्भग्रहस्य द्वारे वाप्यर्द्धमण्टपकेऽथवा
अथवा मण्टपस्येव उत्तमं मद्धयमाधमौ १८०

तद्वारे द्वारपालांस्तु आसीनो वा स्थितोऽथवा
डिंडीनां सव्यपार्श्वे तु मुंडीनां वामपार्श्वके १८१
रक्तवर्णं द्विनेत्रञ्च नागयज्ञोपवीतकम्
भीमरूपं सुदंष्ट्रञ्च द्विभुजञ्चैकवक्त्रकम् १८२
विस्मयाविष्टवक्त्राढ्यं दंडायुधसमन्वितम्
सव्यपार्श्वे स्थितन्देवं डिंडीनां रूपमुच्यते १८३
कृष्णवर्णं चतुर्हस्तमेकास्यं भीमरूपकम्
दंष्ट्राकराळवदनं दण्डन्यस्तैकपादकम् १८४
किंकिणीमालयाभूष्यं दण्डाग्रन्यस्तपाणिनम्
कुन्नळालंकृतास्यञ्च डिंडीनान्तु स्वरूपकम् १८५
द्वारेषु देवतास्सर्वाः परस्परनिरीक्षणाः
प्रत्यङ्मुखास्तथाकुर्युः पूजाकाले विशेषतः १८६
पूजान्ते पूर्ववत्कृत्वा द्वारपालांस्तथैव च
घण्टान्तु ताडयेद्धीमानस्त्रमन्त्रं समुच्चरन् १८७
पूजाकाले तु घण्टान्तु ताडनात्किं प्रयोजनम्
यक्षराक्षसपैशाच दानवाब्रंहराक्षसाः १८८
देवसान्निद्ध्यपूजार्थं गच्छन्ति मणिशब्दतः
आवाहने च पूजान्ते पूजारंभे विसर्जने १८९
अर्घ्ये विलेपने स्नाने दीपे गन्धाभिषेचने
अभिषेके च धूपे च नैवेद्ये बलिकर्मणि १९०
अन्येषु सर्वकार्येषु महाघण्टां प्रताडयेत्
अर्चनादित्रियाकाले प्रच्छन्नपटमुत्तमम् १९१
पापरोगीपरिभ्रष्टो नास्तिकश्शिवनिन्दकः
वेदविक्रयकश्चैव ग्रन्थविक्रयकस्तथा १९२
दुर्मुखश्च दुराचारो मूर्खश्च गुरुनिन्दकः
पाषंडः प्रतिलोमश्च शिवद्रव्यापहारकः १९३

लिंगच्छेदीबृहद्बीजी सुरापायी च हेममुक्
मातृहापितृहास्तेयी गुरुद्रव्यापहारकः १९४

प्रविश्यदर्शनं कृत्वा पूजाया निष्फलं भवेत् १९५
प्रच्छन्नपटलं कल्प्य सर्वदोषनिकृन्तनम्
द्वाराधिक्यन्तु विस्तारमायामद्विगुणं भवेत् १९६
वस्त्रमेवं समाख्यातं प्रच्छन्नपटमुत्तमम्
यवनिकां परित्यज्य हृदयम्मन्त्रमुच्चरन् १९७
गर्भगेहं ततः प्राप्य लिंगशुद्धिं समाचरेत्
स्वयंभूदैविकं बाणं गाणवञ्चार्षकन्तथा १९८
शिष्टलिंगमिति ख्यातं पूजां पूर्ववदाचरेत्
शिष्टलिंगे विशेषेणावाहनोद्वाहनन्नहि १९९
सर्वत्र व्यापिनं देवं परमेशं सदाशिवम्
अभीमुखीकरणं यच्च तदावाहनमुच्यते २००
विमुखीकरणं यच्च तदुद्वासनमुच्यते
पूजापरिसमाप्तौ तु विमुखन्तु विसर्जनम् २०१
यथा कुंडगतस्याग्नेर्वायुनाज्वनं भवेत्
तथा च लिंगमन्त्रेण जायते भगवान् शिवः २०२
देवैश्च मुनिभिश्चैव पशुभिः पक्षिजालकैः
मृगादिगणपैश्चैव स्वायंभुवं प्रतिष्ठितम् २०३
रक्षरक्षो गणैश्चैव यल्लिंगन्तु प्रतिष्ठितम्
तच्छिष्टलिंगमित्युक्तं शिवसान्निद्धयकारणम् २०४
तस्मादावाहनं नास्ति न चैवोद्वासनक्रिया
आवाहनं कुतोदेवकुतोदेवासनं ततः २०५
सुराणां देवतानाञ्च विस्मरन्ति विसर्जनम्
लिंगमावाहनञ्चैव लिंगमूर्तिरिति स्मृता २०६

आचार्यं सन्निधौ कृत्वा दर्पणश्च तथैव हि
दीपात्दीपसहस्त्राणि मूलदीपन्न लिप्यते २०७
यस्य देवार्चनं लिंगं मूललिंगन्नयेत् बुधः
गो इत्यनेकवर्णानि क्षीरमेकं समुद्भवम् २०८
मन्त्रमेकं समुत्पन्नं तन्त्रञ्च बहुरूपकम्
कुलालचक्रमृद्भिस्तु नानारूपेण दृश्यते २०९
आचार्यं मनसा द्धयात्वा दृक्छायापरमेश्वरम्
शिलामृद्दारुचित्रेषु देवता यत्र कल्पिते २१०
आकल्पितस्वयञ्जयोतिरात्मनो देवता हि सा
काष्ठादग्निघटे चंद्रः स्वयमावाहयेत्ततः
यद्देवमर्चयित्वा तु तद्देवमात्मभावनम् २११
कृत्वा हृद्गतमञ्जलिञ्च कुसुमं प्रासादमन्त्रं पठन्
भक्त्यानिष्कळगोचरस्समरसीभावं गतस्साधकः ।
द्धयायेद्विक्रमतस्तु शक्तिभवने नादे तथा बिन्दुके
निष्क्रान्तः क्रमतस्तु शक्तिभवने स्यादेवमावाहनम् २१२
पीतं शुक्लं तथारक्तं कृष्णाभं धूम्रवर्णकम्
तथोर्व्यादीनि बीजानि लवरयहकारकाः २१३
प्रथिव्यादीनि भूतानि ब्रह्माद्याः पञ्चमूर्तयः
ब्रह्माविष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः २१४
अधिदेवास्त्विति ख्याताश्चोर्व्यादीनां यथाक्रमम्
हृच्छिरश्शूळिकामन्त्रैर्वर्मणास्त्रेण बुद्धिमान्
पृथिव्यादीनि बीजानि योजयेत्तु क्रमेण तु २१६
पञ्चोद्धातश्चतस्त्रश्च त्रयञ्च द्वयमेककम्
पाशुपतेन चास्त्रेण पञ्चग्रंधिस्तु च्छेदयेत् २१७
पञ्चग्रंधिं ततः कृत्वा तस्मात्प्रकृतिनिश्चयः
पञ्चग्रंथितथाच्छेद्य प्रारभेदात्मयोजनम् २१८

जानुग्रन्थिस्तु प्रथमन्नाभिग्रन्थिर्द्वितीयकम्
गळग्रन्थिस्तृतीयन्तु ललाटे तु चतुर्त्थकम् २१९
पञ्चमन्तु शिरोग्रन्थि च्छेदयेत्तु हृदा पुरा
मूर्तिमन्त्रेण संग्राह्य जीवं हुंकारमूर्द्धनि २२०
कुंभकेन समोपेतं वायुमूद्ध्वंगतन्नयेत्
तेनैव द्वादशान्तस्थ शिवेन सह योजयेत् २२१
आत्मयोजनमेतत्स्यात्ततो भूतानि शोधयेत्
पृथिव्यादौ पयोवह्नि द्वौ द्वौ शोद्धयपरस्परम् २२२
आकाशञ्च विशोधेन यथाशोद्धयन्तदुच्यते
निवृत्यादीनि भूतानि ता---द्धव---कम् २२३
व्याप्यव्यवस्थितादीनि मत्वातानि विशोधयेत्
दहनं वाथ भूतानां परस्परविशोधनम् २२४
मण्डलादिसमायुक्तं भूतशुद्धिरिहोदिता
शोद्धयापरागरहितं कलामात्रव्यवस्थितम् २२५
विचिन्त्य दिव्यदेहार्त्थमत्र चाल्पावनन्नयेत्
ध्यात्वा कुण्डलिनीं शक्तिं मन्त्रतैकस्वरूपिणीम् २२६
तदुत्भूता मृतस्त्रावैस्सिक्तादेवकलां स्मरेत्
भुजंगाकृतिमत्युग्रां प्रबोधैकस्वरूपिणीम् २२७
सप्तारव्यकुण्डलाकारवलयां होमसन्निभाम्
भ्रूमद्धयात्तालमात्रस्थ ब्रह्मरन्ध्रे विचिन्तयेत् २२८
तदुत्पञ्चैकपीयूषैरार्द्रं शुद्धं विभावयेत्
ग्रन्धिपञ्चकमुच्छेद्य शुद्धात्मानं विभावयेत् २२९
कृत्वा हृद्यासनन्तस्मिन् मूर्त्यात्मानं समानयेत्
पुनराप्लवनं कृत्वा करन्यासं समाचरेत् २३०
नाभेस्तु चतुरंगुल्यमधस्थादग्निमण्डलम्
कदंबपुष्पसंकाशमष्टपत्रं त्रिकोणकम् २३१

मूलाधारमधःप्रोक्तं द्वितीयन्नाभिमूलके
भुजंगवलयाकाराप्यष्टवर्त्तुळसंयुता २३२
कुण्डलाख्यामहानाडी भानुमण्डलमुच्यते
आत्मानं गृह्यसंहारमुद्रयाविग्रहाश्रितम् २३३
पञ्चात्मनविधानेन देहादीन्तत्प्रमाणतः
आत्मानमन्तरात्मानं परमात्मानमेव हि २३४
तत्वात्मानन्तथापूतपूर्वात्मानन्तु पञ्चकम्
आत्मा तु दण्डमद्धयस्थमन्तरात्मा तदन्तरम् २३५
परमात्माब्जमद्धयस्थन्तत्त्वात्मापार्श्वदक्षिणम्
भुतात्मावामपार्श्वे तु पञ्चात्मास्थानमुच्यते २३६
इडा च पिंगळा चैव सुषुम्नात्रिविधा मता
स्थितोद्भूतानम्रमुखास्त्रिविधास्तत्गुणामताः २३७
पञ्चात्मस्थानमेवोक्तं पार्श्वमद्धये तु ऊहितम्
आत्मानं सात्विकं प्रोक्तमन्तरात्मा च तामसम् २३८
परमात्मा परन्ध्यात्वा तत्वात्मा रजतो मुखम्
भूतकामत्रियाहारविकार ----- च २३९
राजावर्तनिभास्सर्वे प्रागादिषु प्रकल्पयेत्
गुणत्रयेण संछाद्य सिंहासनं प्रकल्पयेत् २४०
भुतरूपेषु कोणेषु पादाः कृतयुगादयः
श्वेतं रक्तन्तथा कृष्णं पीतन्त्रेधादिवर्णकम् २४१
अव्यक्तो नियतिः कालो कला चेति चतुष्टयम्
अव्यक्तः स्फटिकाभासो नियतिश्चाञ्जनद्युतिः २४२
कालोदाडिमपुष्पाभः कलाभिन्नाञ्जनप्रभा
प्रागादिष्वेळकाप्रोक्ता मद्धयपादस्तु केशवः २४३
एवं योगासनं प्रोक्तं पद्मासनन्ततोपरि
मायातत्वं बृहत्गन्धिश्शुद्धविद्यात्मशोभितम् २४४

विद्येश्वरदळच्छन्नं शक्तिकेसरसंयुतम्
विद्यातत्वमयन्तत्र कर्णकायां प्रपूजयेत् २४५
बीजं प्रवाळवर्णाभमंकुरा रजतप्रभम्
तस्य नाळन्तुवैडूर्यं कर्णिकारक्तपिंगळम् २४६
शंखवर्णादळाग्राश्च रक्ताश्चेतदळास्मृताः
किञ्चिल्लोहितपीतानि मद्धये स्यात्केसराणि च २४७
तन्मद्धये कल्पयेद्धीमान् कर्णिकांकनकप्रभाम्
नवबीजानि तन्मद्धये हेमाभानि प्रकल्पयेत् २४८
वामादिशक्तयश्चाष्टौ केसरेषु प्रकल्पयेत्
इंद्रादीशानपर्यन्तन्नयसेन्मद्धये मनोन्मनीम् २४९
आत्मतत्वन्नयसेत्सव्ये विद्यातत्वन्तु वामके
मद्धयमे शिवतत्वन्तु कल्पयेत्कल्पवित्तमः २५०
एवं पद्मासनं प्रोक्तं तस्योद्धर्वे विमलासनम्
मण्डलत्रयमत्रैव कल्पयेद्विपुलासनम् २५१
सिंहासनञ्चतुष्कोणमनन्तञ्च त्रिकोणकम्
पद्मञ्च वर्तुळाकारं षट्कोणं विमलासनम् २५२
योगासनञ्चाष्टकोणमासनं परिकल्पयेत्
आवाहनासनं योगे स्नाने सिंहासनं भवेत् २५३
अर्चनायाम्महापद्मं विमलाख्यन्तु भोजने
स्तोत्रसंगीतनृत्तेष्वनन्तासनमिहोच्यते २५४
चतुरश्रस्य पीठस्य स्थित्वा लिंगमिहोच्यते
सुवृत्तम्मासनं प्रोक्तमष्टाश्रं यनं भवेत् २५५
उपानं पादुका चैव जगती जंघमेव च
कुक्षिन्तत्कुमुदं ज्ञेयं बाहुस्स्यात्कंपमेव च २५६
कण्ठं कण्ठमिति ज्ञेयमधरे त्वधरं भवेत्
महापट्टिललाटन्तं केशान्तं घृतवारिणा १५७

आसीनं वासुनृत्तं वा स्थितं वाशयनन्तु वा
पूजाकाले सुखासीनमन्यकालेषु पूर्ववत् २५८
आसनम्मूर्तिमावाह्याप्येतत्त्रितयमद्ध्वनि
व्याप्तिव्यापकभावेन ज्ञात्वा यजनमारभेत् २५९
आसनं शुद्धविद्यान्तमूर्त्तिशक्त्यन्तगोचरम्
आवाह्यास्य शिरोमूर्त्तिमूर्त्तिमानुपरिस्थितः २६०
देहस्थस्सकळो ज्ञेयो निष्कळोदेहवर्जितः
आप्तौ वादेशग ------- स्थितः २६१
हंसहंसेति यो ब्रूयाद्धंसोदेवस्सदाशिवः
गुरुवक्त्रात्तु लभ्येत प्रत्यक्षं सर्वतोमुखम् २६२
तिलेषु च यथा तैलं पुष्पे गन्धस्सदाश्रितम्
पुरुषस्य शरीरेऽस्मिन् बाह्याभ्यन्तरसंस्थितम् २६३
उल्काहस्तो यथा कश्चिद्द्रव्यमालोक्यतान्त्यजेत्
ज्ञानेन ज्ञेयमालोक्य तथाज्ञानं परित्यजेत् २६४
सकळं पुष्पवत्तत्र गन्धस्यैव तु निष्कळम्
वृक्षस्तु सकळं विद्याच्छाया तस्य तु निष्कळम् २६५
सकळन्निष्कळाभावे सर्वत्रैव व्यवस्थितम्
लिंगं त --- संज्ञात्वा कल्पयेदासनन्तथा २६६
स्वयंभौ देविके बाणे कल्पयेदेकमासनम्
आर्षे च गाणपेवत्सकल्पयेदासनत्रयम् २६७
मानुषे चैव कर्त्तव्यं पञ्चासनमिति स्मृतम्
आवाहनादियत्कर्म पूर्ववत्परिकल्पयेत् २६८
पूर्वाह्णे सितवस्त्रन्तु मद्ध्याह्णे रक्तवस्त्रकम्
पीतवस्त्रन्तु सायाह्णे सार्द्धयामे तु सर्वशः २६९
आवाहयेत्ततो देवं सद्योजातेन मन्त्रतः
स्थापयेद्वाममन्त्रेणाप्यघोरेण तु सन्निधिः २७०

पुरुषेण निरोधञ्चेशानेन स्वागतं भवेत्
आगतस्य शिवस्यात्र पादौ पाद्यं हृदाददेत् २७१
मुखेष्वाचामनन्दद्यादर्घ्यं शिरसि निक्षिपेत्
अष्टत्रिंशत्कलान्यासम्मकुटादिक्रमेण तु २७२
पञ्चब्रह्मषडंगैश्च व्योमव्यापिं समुच्चरन्
जलेनस्नापयेत्पश्चाद्दधिक्षीरघृतैरपि २७३
नाळिकेरोदकेनैव मधुनाब्रह्मपञ्चकैः
हृदा वै शालिपिष्टेन घर्षयेल्लिंगमादरात् २७४
शिवांभसा तु संस्नाप्य घर्षयेदामलेन तु
लेपयेद्रजनीं पश्चात् स्नापयेत् गन्धवारिणा २७५
आचमनन्ददेत्पश्चात्पञ्चवक्त्रेषु बुद्धिमान्
वस्त्रेण लिंगपीठे तु कारयेत् लंबनं बुधः २७६
हृदयेन तु मन्त्रेण पुष्पम्मूर्द्धनिदापयेत्
घरटान्तु ताडयेत्तत्र क्षिपेद्यवनिकान्ततः २७८
वस्त्रोपवीतगन्धञ्च मकुटं कुरडलन्तथा
हारकेयूरमालाञ्च हृदयेन प्रदापयेत् २७९
धूपदीपं हृदादत्वा पञ्चमावरणान्नयसेत्
कर्णिकायान्तथैशानं पूजयेत्तु विशेषतः २८०
पूर्वे तत्पुरुषञ्चैव कफोरन्दक्षिणे यजेत्
पश्चिमे तु यजेद्वामं सद्योजातन्तु सौम्यके २८१
ईशानं मद्धयमे पूज्य पञ्चवक्त्रे तथार्चयेत्
शुद्धस्फटिकमीशानं पुरुषं कुम्कुमाकृतिम् २८२
सद्योजातन्तु गोक्षीरं पञ्चवक्त्रेषु भावयेत् २८३
सद्योजातं स्थितं देवं वामदेवं सुखासनम्
अघोरन्धनुराकारं पुरुषं वामरूपकम् २८४
ईशानन्नृत्तरूपन्तु पञ्चमन्त्रात्मकं परम्